124
2

अथ

"संक्षेपशारीरकटीका"

Sankh shapasharirak Tika

१ श्रीगणेशायनमः॥ ॐ॥ सत्यंज्ञानमनंतमद्वयसुखंयद्ब्रह्मगत्वागुरुंमत्वालब्धसमाधिभिर्मुनिवरैर्मोक्षायसा
क्षात्कृतं॥ जातंनंदतपोबलान्नरविलानंदायवृंदावनेवेणुवादपरिंदुसुंदरमुखंवंदेरविंदेक्षणं॥१॥ श्रीरामवि

नतुः
॥ ॐ॥ अन्तर्जडविरोधिरूपमनंतमयमलवंधे खिलताविरुद्धं॥ अतिनि
करमविक्रियंमुरारेः परमपदंप्रणयादभिष्टवीमि॥१॥ ॥ ॥

श्वेश्वरमाधवानांप्रणम्यपादांबुजपुण्यपांसून्॥ तेषांप्रभावादहमस्मियोग्यः श्लोकापिचैतन्यमलब्धतैम्य॥ ॥२॥
पूर्वाचार्यवचोविचार्यनिखिलंसत्संप्रदायाध्वनाहिस्तोत्रंखलुमार्गमागमगिरांतात्पर्यपर्याप्तितः॥ विद्धिद्यार्थविभाग

कथनीयं नान्यदा असमाप्तकालत्वात्। एवमिहोचितक्रमे शोधितत्वंपदार्थस्तत्पदार्थस्तदैक्यं चेति प्रमेयप्रतिपादनार्थास्त्रयः श्लोकाः प्रमाण मधु॰

सक्षे॰शा॰टी॰

यं श्रीमच्छारीरकशास्त्रस्याद्यचतुःसूत्रीस्थानीयं। तत्र हि प्रथमसूत्रे ब्रह्मविद्याधिकारिणस्त्वंपदार्थो जिज्ञास्यब्रह्माभे

२ दान्वययोग्यः प्रतिपादितः। तयोर्भेदे हि स्वनिष्ठकर्तृत्वाद्यध्यासरूपबंधनिवृत्तिकामस्य मुमुक्षोः ब्रह्मणि जिज्ञासा न स्या

त्। अन्यज्ञानादन्यत्राध्यासनिवृत्तेरनुपपत्तेः तस्मात्तयोरनन्यत्वमेव। द्वितीयसूत्रे च जगत्कारणत्वप्रदर्शनव्याजेन तत्

पदार्थोपि मुमुक्षुत्वंपदार्थाभेदान्वययोग्यस्तटस्थलक्षणस्वरूपाभ्यां प्रतिपादितः। चतुर्थसूत्रे च तयोरैक्यमैकांतिकं प्रति

पादितं। एतावदेव शास्त्रस्य प्रमेयं त्वंपदार्थस्तत्पदार्थो खंडवाक्यार्थश्चेति। एतत्प्रमाणं तु तत्त्वमस्यादि वेदांतमहावाक्यरू

पं शास्त्रं। तच्चोक्तं शास्त्रयोनित्वादिति तृतीयसूत्रे। अत्रार्थक्रमस्य पाठक्रमाद्बलवत्त्वात्तृतीयचतुर्थसूत्रयोर्व्यत्यासो द्रष्टव्यः

प्रमेये हि कथिते किमत्र प्रमाणमिति जिज्ञासायां प्रमाणं प्रतिपादनार्थस्तु चतुर्थः श्लोक एतावता हि शास्त्रस्य विषयप्रयो

तः प्रकरणान्युद्दिश्यतत्त्वं रहः कुर्वे संप्रति सारसंग्रहमिमं संक्षेपशारीरके ॥३॥ हित्वा हेयमुपादेयमुपादाय विचारतः । प्रायेणाप्र
वेदीकानामिहार्थः प्रकटीकृतः ॥४॥ विशेषाद्विष्ववेदस्य प्रत्यक्‌ विष्णोः परद्वयोः । व्याख्यानं प्रद्दयासे विगुरूणां तो हि नो
गुरू ॥५॥ तत्र श्रीमच्छारीरकशास्त्रस्य तात्पर्यविषयीभूते मुमुक्षुजिज्ञास्ये निर्विशेषब्रह्मणि बोधनीये प्रासंगिकमुमुक्षु
जिज्ञास्यसविशेषब्रह्मोपासनावाक्यानेकविधविचारविक्षिप्ततया दुरवबोधतामाकलय्य तद्विक्षेपपरित्यागेन मुमुक्षु
जिज्ञास्यं निर्विशेषं ब्रह्म शास्त्रतात्पर्यविषयीभूतमनायासेन मुमुक्षुबोधाय सं सुबोधाय संक्षेपशारीरकाख्येन श्लोकग्रं
थेनाविष्कार करुणया श्रीसर्वज्ञात्माचार्यः । अत एव मुमुक्षुजिज्ञास्यप्रासंगिकसविशेषब्रह्मविचारपरित्यागरूपसंक्षे
पविशिष्टं निर्विशेषब्रह्मविचारात्मकं शारीरकशास्त्रमेवैतदिति संक्षेपशारीरकमिति समाख्यास्य युक्तैव । तत्रादौ श्लोकचतु

सत्यंज्ञानमनंतंब्रह्मेत्यादिश्रुत्यनुसारेणनपुंसकलिंगशब्दप्रयोगेनप्रथमश्लोकःसेयंदेवतैक्षतेत्यादिश्रुत्यनुसारेणस्त्रीलिं
२ गशब्दप्रयोगेणद्वितीयःश्लोकःसएषइहप्रविष्टःएषतआत्मांतर्याम्यमृतइत्यादिश्रुत्यनुसारेणपुल्लिंगशब्दप्रयोगेणतृती
यःश्लोकःएतेनसर्वेपिब्रह्मप्रतिपादकाःशब्दाव्याख्याताः।अक्षरार्थस्तुमुरारेर्जगदुपद्रवकारिमुराख्यासुरसंहरणाज्ज
गत्पालयितुःश्रीविष्णोर्जगत्कारणमायासत्वांशप्रतिबिंबचैतन्यात्मनोंतर्यामिणःपरमंमायाकल्पितजगत्कारणत्वादिशून्यत्वे
नसर्वेश्वरंबिंबभूतंपरंस्वरूपंउपाधेःप्रतिबिंबपक्षपातित्वेनबिंबेस्वधर्माकल्पकत्वात्बिंबेश्वरपक्षेअज्ञानप्रतिबिंबितजीवचै
तन्यप्रतियोगितयाबिंबत्वेनव्यवह्रियमाणस्यविष्णोःपरमंपरंबिंबप्रतिबिंबकल्पनाशून्यंनिरुपाधिस्वरूपंबिंबेतमोनिपतिते
प्रतिबिंबकेवेसादिनेश्वरस्यद्वैरूप्यंवस्तुतःपरमत्वंचापरमत्वापादकोपाधिराहित्येनपरत्वंचाविद्यातिरोधानापनयात्सर्वपर

स्प१

तत्र संबंधाः प्रतिपादिता भवंति प्रत्यग्ब्रह्मणोरेकत्वमेव हि विचारपुरस्सराद्वेदांतवाक्यप्रमाणाद्विज्ञातं प्रयोजनं शास्त्रस्यैतदेवोप
यं॰ उपायस्तु द्विविधो विषयस्त्वंपदार्थस्तत्पदार्थश्चेति तस्य चाज्ञातत्वमात्रेण वेदांतप्रमाणविषयत्वं अज्ञातत्वमिथ्याविज्ञानतत्त्वा
भ्यां विचारविषयत्वमिति विवेकः पदार्थज्ञानपूर्वकत्वाद्वाक्यार्थज्ञानस्य पदार्थद्वयरूपविषयकथनपुरस्सरं वाक्यार्थरूपप्रयोजन
कथनं क्रमेणोक्तं चतुर्थे तु शास्त्रशासमंतयोः संबंधः प्रतिपादितः। एतावता हि संक्षेपेणोक्तत्वाच्छास्त्रार्थसमाप्तिः परापरविद्ययोः प
र्यवसानात्तथा च श्रुतिः द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदंति परा चैवापरा च तत्रापरा ऋग्वेदो यजुर्वेद इत्यादिना षडंगवेदचतु
ष्टयात्मकं शब्दब्रह्मापरविद्याविषयत्वेनाख्याय अथ परा यया तदक्षरमधिगम्यत इत्यादिना परं ब्रह्म परविद्याविषयं दर्शयति। स्मृ
तिश्च द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यदित्यादि उत्तरग्रंथस्तस्यैव प्रपंच इति द्रष्टव्यं। संग्रहविवरणाभ्यां शिष्यबोधसौकर्यात्। तत्र

 वेजघन्यवृत्तिकत्वमाचनिरस्ता। एतादृग्भगवत्स्तुतौ च तद्भक्तिरेवासाधारणंकारणमित्याह प्रणयादिति। प्रणयः
४ प्रणयः प्रीतिर्भक्तिरित्यर्थः। सा हि स्वरसतः परमानंदरूपे परमात्मनि समुद्रसंतीधारासंततिरूपा मनोवृत्तिर्भग
वति भक्तिरित्युच्यते। तया चाविघ्नेन सत्त्वशुद्धिज्ञानप्राप्त्यादिद्वारेण परं निश्रेयसं लभ्यते। यस्य देवे परा भ-
क्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इति श्रुतेः भजतां प्रीतिपूर्वकं। ददामि बुद्धियो
गं तमिति स्मृतेः ततः प्रत्यक्चेतनाधिगमोऽप्यंतरायाभावश्चेति योगसूत्राच्च। निर्गुणेऽपि ब्रह्मणि भक्तिरुपपद्य
त इति व्याख्यातं भगवद्गीतासु चतुर्विधा भजंते मामित्यादिना अभिध्येवे प्रकृष्टध्यायानयेसणादृष्टिभंगदोषा
श्च नप्रकृष्टो नयः प्रणय इति व्याख्यानमुपादेयं। तत्र निर्विशेषे वस्तुनि जगत्त्वेन जीवत्वेन परमेश्वरत्वेन च
भ्रामां विक्रियां निषेधयति॥

नीयत्वेन स्वरूपस्य द्रष्टव्यं। तद्विष्णोः परमं पदमिति श्रुतेस्तस्य तत्पदनीयमस्य सर्वस्य पदमात्मेति श्रुतेश्च। अत्र षष्ठ्यंतप्र
थमांताभ्यां तत्पदस्य वाच्यं लक्ष्यं च संपदलक्ष्याभिन्नत्वमपयोग्यं दर्शितं। अत्र च हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः अ
निच्छयापि संस्पृष्टो दहत्येव हि पावक इति स्मृतेः सर्वोपद्रवकारिमुराधसुरारित्वेन भगवत्स्मरणरूपं मंगलमाचरंस्तत्पदाभीष्ट
वस्तुलक्षणं मंगलांतरमाचरति। अभिष्टवीमीति अभितः स्तौमीत्यर्थः। तुरुस्तुशम्यमः सार्वधातुके इत्यनेन विभाषयेडागमः
अत्र निर्विशेषे ब्रह्मणि गुणविशिष्टगुणपभिधानलक्षणायाः स्तुतेरसंभवात् स्तवीमीति निदिध्यासनेन अभितः प्रत्यगभि
न्नतया आभीक्ष्ण्येनावात्तदेकाग्रोस्मीत्यर्थ इति केचित्। तत्स्तुतिरूपं तत्त्वरूपनिरूपणपरं ग्रंथं करोमीत्यन्ये। आनंदो विषयानु
भवो नित्यत्वं चेति संति धर्मा इति टीकोक्तेरकल्पितधर्मस्य काप्यनुपपत्तेः कल्पितसत्त्वाद्धि धर्मपुरस्कारेण गुणकथनरूपा
स्तुतिर्मुख्यैव निर्गुणेऽपि वस्तुनि संभवतीति तत्त्वं अतो ध्याने निदिध्यासनप्रतिज्ञा ग्रंथकरणारंभप्रतिज्ञा मुख्यवृत्तिसंभ

क्रियमिति। जगत्तिजन्माद्या विक्रिया: जीवे जाग्रदाद्या ईश्वरे सृष्ट्याद्या विक्रिया माययाऽप्रस
क्ता निर्विशेषे वस्तुनि सर्वथा न संभवतीति तदविक्रियं। एतेन सर्वविकारशून्यत्वात्सर्वेंद्रि
याग्राह्यतारूपा सूक्ष्मता सर्वोपाधिसंबंधशून्यतारूपा नित्यमुक्तता च दर्शिता। एवं सामान्य
तः सर्वविक्रियाशून्यता मुक्ता विशेषेणाप्याह। अनृतेत्यादिना। अत्राऽनृतविरोधि परमार्थस
त्यमबाध्यं। जडविरोधि स्वप्रकाशं ज्ञानं। रूपं सर्वस्वरूपं सर्वानुस्यूतसन्मात्रं। अंतत्रयविरु
द्धं। अंतानां देशकालवस्तुपरिच्छेदानां यत्त्रयं तद्विरुद्धं। देशपरिच्छेदो ह्यत्यंताभावस्तत्प्र
तियोगित्वेन विभु कालपरिच्छेदो च ध्वंसप्रागभावौ तत्प्रतियोगित्वेन नित्यं। वस्तुपरिच्छेद
श्चान्योन्याभावस्तत्प्रतियोगित्वेनाऽद्वितीयं। एतेन प्रपंचधर्माणामनृतत्वजडत्वव्याद्
तद्रूपत्वाऽविभुत्वाऽनित्यत्वसद्वितीयत्वानां व्याहतिः सिद्धा। मलबंधनदुःखता विरुद्ध

भित्ति जीवधर्माणां व्यावृत्तिः। मलः कर्तृत्वभोक्तृत्वरागादिलेपो ऽशुद्धिस्तद्विरुद्धं कर्तृत्वादिलेपशू-
न्यं शुद्धं। बंधनं· धर्माधर्मतत्फलसंबंधस्तद्विरुद्धं मुक्तं· दुःखता विरुद्धं परमानंदरूपं· ननु तदाश्रय-
ना पि दुःखरूपस्तदाश्रयो वा। जीवो हि रागादिमलैर्धर्माधर्मादिबंधनैर्न सुखदुःखाश्रयत्वेन च प्रसिद्धः
प्रति निकटमित्तीश्वराद्व्यावृत्तिः। वादिभिर्हि पराग्रूपः परोक्ष एवेश्वरः कल्पितः। इदं त्वति निकटं
साक्षादपरोक्षं प्रत्यगात्मस्वरूपमत्यव्यवहितमित्यर्थः। एतेन सत्यं ज्ञानमनंतं ब्रह्म। तदेतद्ब्रह्मा-
पूर्वमनपरमनंतरमबाह्यं· सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं नित्यं विभुं सर्वगतं सुसूक्ष्मं
विमुक्तश्च विमुच्यते· न वर्द्धते कर्मणा नो कनीयान्· शुद्धमपापविद्धं· एष एव परम आनंदः
यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतरः। अयमात्मा ब्रह्म· न जायते म्रियते वा विपश्चित्। निष्क-
लं निष्क्रियं शांतं निरवद्यं निरंजनमित्याद्याः श्रुतयो ऽसत्यत्वादितत्तद्भावापोहेनाखंडं प्रत्यग-
भिन्नं ब्रह्म मुमुक्षु जिज्ञास्यं प्रतिपादयंति। ननु सत्यत्वादिरूपेणास्य निर्विशेषत्वेन सर्वधर्म-

परमेश्वरभेदोजीव १

त्वजीवत्वानि॰ अनुयोगित्वेनप्रतियोगित्वेनचतन्निमित्तोजीवजगद्भेदोजीवेपरस्परभेदोजगत्प
रस्परभेदोजगत्परमेश्वरभेदश्चेतियःपंचविधोभेदस्तेनचकलुषीकृतोऽकलुषोपिकलुषःकृतोऽ
ध्यारोपितदोषेणऽसत्कल्पतामापादितोभूमावाकुल्ययस्यसतादृक्कलुषीकृतभूमाभावःसद्भा
वोयस्याःसातथा।जगज्जडत्वात्स्वरूपेणैवकल्पितं॰जीवेश्वरौतु चैतन्यरूपत्वात्स्वरूपेणसत्यौ
केवलमेकस्मिन्नेवचैतन्येबिंबप्रतिबिंबादिभावेनजीवत्वमीश्वर त्वंचकल्पितमितिबोधितुंद्वयोः भ८
प्रयोगःचित्तेर्भावोनकलुषीकृतः॰सर्वभासकत्वेनसर्वदाप्रकाशमानत्वात्।किंतुतत्इदंकल्प
नयातदपरिछिन्नत्वरूपोभूमैवकलुषीकृतः॰पूर्णत्वेनाप्रकाशमानत्वात्॰ तदुक्तंवार्तिके॰
तस्यैकमपिचैतन्यंबहुधाप्रविभज्यते॰ अंगारकृतमुत्पातंवारिराशेरिवोदकम् इति॰ भूम्नोभा
वइतिव्याख्यानमनुपादेयं॰बहोर्भावस्यभूमशब्दवाच्यत्वेनभावशब्दवैयर्थ्यापत्तेः।कलुषी

नाधारत्वादितिप्रतिपादितंभवति।सर्वविशेषाणांचसमुच्चयमेकेनश्लोकेनवक्ष्यति।नित्यःशुद्धो
बुद्धमुक्तस्वभावइत्यादिना।अत्रप्रथमंनगणद्वयवतापुष्पिताग्राख्येनछंदसाईसमनकविरीत्या
पिमंगलमाचरितं॰अकारादिपदचतुष्टयोपन्यासश्चश्लोकग्रंथकरणकौशलप्रदर्शनाय॰अण
वप्रथमावयवोच्चारणेनमंगलातिशयायच॰अइतिब्रह्म॰अकारोवैसर्वावागितिचश्रुतेः॥१॥ ॥
एवंजिज्ञास्यब्रह्मप्रदर्शनेनप्रथमसूत्रार्थोदर्शितः॰ततःपरंद्वितीयसूत्रार्थःप्रदर्श्यते।पूर्वंचजग
द्धर्माणांजीवधर्माणांईश्वरधर्माणांचापवादोदर्शितःसचाध्यारोपमंतरेणनसंभवति।अस
क्तस्यैवतन्निषेधार्हत्वादित्यभिप्रेत्याध्यारोपमाह।स्वाज्ञानेति।स्वस्यस्वस्मिन्नयदज्ञानंस्वाश्रयवि
षयकमविद्यामायाशब्दितमनादिभावरूपमनिर्वाच्यमावरणविक्षेपशक्तिमदज्ञानं॰तेनावरण
शक्त्यात्मस्वरूपभानंनिरोधायविक्षेपशक्त्याकल्पितान्यध्यस्तानियानिजगज्जीवपरमेश्वर

प्रत्यक्चितिरिति · प्रतीची जीवेश्वरविभागरहिता चितिः स्वप्रकाशरूपापि: सा भुवनस्याऽज्ञा
नसहितस्याऽध्यस्तस्याकाशादिप्रपंचस्य विवर्त्तस्य योनिरज्ञानद्वारोपादानं॰ एकैव योनिर्न
द्वितीयस्यापेक्षा· सत्यत्वेनाज्ञातत्वेन च तस्या एवाधिष्ठानत्वोपपत्तेः। तथा च वक्ष्यति। आश्रय
त्वविषयत्वभागिनी निर्विभागचितिरेव केवलेति। वार्त्तिकं च। आंत्यात्कार्यात्तदेव स्याद्ग्रहाद्ध
प्रतिकारणमिति· सा च विजयते· परमार्थसत्यस्वप्रकाशपरमानंदरूपत्वे न सर्वोत्कृष्टा
भवत्यतस्तां प्रत्यभिप्रणत इति ध्वन्यते। तस्मादेवमध्यारोपसंभवादनृतजडविरोधीत्यादि
नात दूषवादो युक्त एव· भुवनैकयोनिरिति तटस्थलक्षणं· प्रत्यक्चितिः स्वरूपलक्षणमिति द्विति३
विवेकः एतेन मिथ्याप्रपंचोपादानत्वेन तत्पदवाच्यनिरूपणाज्जन्माद्यस्य यत इति व्याख्यात
॥२॥ एवं त्वंपदार्थं तत्पदार्थं च विषयमुक्त्वा प्रयोजनकथनाय वाक्यार्थमाह प्रत्यगिति ॥

करणेन किं भूमानाश्रितो नेत्याह स्वाभाविकेति । भूम्नः कलुषीकरणं हि परिछिन्नत्वारोपमात्रम्
न तु स्वरूपहानिः आरोपेण वस्तुस्वरूपानपायात् । यत्र यदध्यस्तं तत्कृतेन दोषेण गुणेन वा ऽणुमात्रेणा
पि स न संबध्यत इति न्यायात् स्वाभाविकी नित्यसिद्धाध्याससहस्रेणाप्यपनेतुमशक्या । स्वमहि
म्नि स्थितिः स्वरूपादप्रच्युतिर्यस्याः सा तथा । तथापि सर्वाध्यासकारणस्याज्ञानस्यानारोपित
त्वान्नैव द्वितीयेनाद्वितीयतत्त्वरूपो भूमा कलुषः कृत इत्यत आह । अस्तमोहेति । अस्तो ऽध्वस्तो ऽ
परमार्थसन्मोहो ऽज्ञानाख्यो यस्याः सा तथा । अज्ञानाध्यासस्याप्यज्ञानमूलत्वादनादित्वाच्च
नात्माश्रयादिदोषप्रसंगः । तदुक्तं वार्तिके । अविद्यास्त्यैतस्य विद्यायामेवा ऽसिद्धा प्रकल्प्यते ।
ब्रह्मदृष्ट्यात्वविद्येयं न कथंचन युज्यत इति । ननु अज्ञानाध्यासस्य किमधिष्ठानं । न जीव ईश्व
रो वा । तयोरध्यासपरिनिष्पन्नत्वेनान्योन्याश्रयात् । नापरस्तदनिरूपणादित्याशंक्याह ।

पिपरमार्थतो द्वैतरहितमित्यक्षरार्थः एवमसत्यः सर्वथाबाधितः पराग्रूपेणाहमितिव्यपदेश्यानंद
त्वेन प्रत्यग्रूपोऽभेदो यस्मिन् तं साक्षादपरोक्षमित्यर्थः प्रतीचोऽद्वितीयाच्युताभेदाबाधफलं प्रक्षी
णेति। अच्युतस्यापरोक्षप्रत्यगभेदबोधफलं प्रसत्येति विवेकः। ननु प्रक्षीणकार्यकारणविभागस्य
प्रमात्रादिशून्यस्य प्रमाणाभावादसिद्धिः प्रमाणाभ्युपगमे च कार्यकारणविभागापत्तिरित्याशंक्याह प्र
त्यक्प्रमाणकमिति· प्रत्यक्स्वरूपमेव प्रमाणं यस्मिन् तत् स्वप्रकाशचैतन्यरूपतया स्वभिन्नमाना
नपेक्षं स्वत एव सिद्धमित्यर्थः। एतेनाखंडवाक्यार्थकथनात् तत्तु समन्वयादिति व्याख्यातं० वसंतति
लकावृत्तं॥ ॥३॥ ॥ एवं त्वंपदार्थस्तत्पदार्थोऽखंडवाक्यार्थश्चेति शास्त्रस्य प्रमेयमुक्तं· अधुना
तत्प्रमाणं वेदांतवाक्यं दर्शयितुं निखिलवेदाभिमानिनीं वाग्देवतां प्रणमति० औत्पत्तिकीति० शास्त्र
योनित्वादितिसूत्रेण हि प्रथमवर्णकेन ब्रह्मणो वेदोपादानत्वं· द्वितीयेन तु वर्णकेन ब्रह्मणि तस्य प्रामाण्यं

प्रत्यंचमितित्वंपदार्थः अच्युतमितितत्पदार्थः। एकमितितयोरभेदेनैक्यंवाक्यार्थः। तमहंअ
वणादिपरिपाकवशात्स्थितभक्तः नित्यंसर्वदाप्रणतोस्मि· देहेंद्रियादिप्रतिभासावस्थायांप्रह्वी
भावेनपूजयामि॰ ननुकथमेकत्वंमुख्यं· सत्यज्ञानाद्यपुनरुक्तानेकगुणप्रतिपाद्यत्वादित्यत
आह चैतन्येति वाच्यार्थभेदप्रतिभासेपिचैतन्यमात्रस्यैवपरमार्थानौपाधिकस्वभावस्यल
क्ष्यत्वान्नैक्यविरोधइत्यर्थः· चैतन्यमात्रमेवपरमार्थोऽसंताऽबाध्यः परमानंदरूपत्वेनपर
मप्रयोजनरूपोवाऽनिजोऽनुपाधिकः स्वभावः स्वरूपंयस्यतमित्यक्षरार्थः। ननुजीवस्यकार्य
कारणादिविभागवत्वेनसाहित्वा। यत्वादीश्वरस्यचपरोक्षत्वेनपराक्त्वात्कथंतयोरैक्यमितितत्रा
ह प्रक्षीणेति। असत्येतिच। प्रक्षीणः अज्ञानेनबाधितः प्रमातृत्वकर्तृत्वभोक्तृत्वादिरूपः का
रणविभागोहेतुफलसंतानोमायाकार्यादिप्रपंचोवायस्मिन्तंनिर्विभागं· संसारदशायाम

दर्शितं तदुभयमप्यनेन प्रदर्श्यति· विश्व: सर्वोऽपि प्रपंचो विवर्त्तोऽतत्त्वतोऽन्यथाभाव: कारणसत्त
यासत्तावान् कारणप्रकाशेन च प्रकाशवान् यस्य स सर्वसत्तास्फूर्त्तिप्रद: परमात्मा विश्वविव
र्त्त: स एव हेतुरुपादानं यस्या: सर्वप्रकाशनशक्तिमत्परमेश्वरोपादानकत्वेन सर्वप्रकाशन
फलयोगि न्या: अखिलवस्तूनामिक्षुक्षीरादिमाधुर्यादीनामपि प्रकाशनेन नानाविधाभिर्वृत्ति
भिरौत्पत्तिकी अकृत्रिमा शक्ति: प्रतिपादकतारूपा· प्रतिपत्तिरूपकार्यवत्त्वेन दृष्टव्यवहारेषु विज्ञा
यते तर्ककुशलैर्यस्या वेदलक्षणाया वाचस्तां कथ मेतस्या ईदृशं सामर्थ्यमिति चिंतयितुमशक्या
शक्ति: ४ प्रभावो यस्यास्तामहं नमामि । सर्वप्रकाशनशक्तिमत्परमेश्वरोपादानत्वं वेदस्य सर्व
प्रकाशनसामर्थ्यहेतुरिति प्रथमवर्णकार्थ: । शेष: परार्थ: । नशेषोऽशेष: सर्वपुरुषार्थस्तादृशं सर्वशे
षिभूतं वस्तु परमार्थसद्ब्रह्म तत्प्रकाशनेन तदाकारवृत्त्युत्पादनेन तदज्ञानावरणापनये यस्या:

वेदलक्षणया वाचश्चौत्पत्तिकी शक्तिः कार्यवशेन ब्रह्मसाक्षात्काराख्यकार्यलिंगेन विज्ञायते॰ की
दृश्याः विश्वविवर्त्तस्य कृत्स्नप्रपंचस्य हेतोः कारणभूतायाः एत इति वै प्रजापतिर्देवानसृजत असृग्र
मिति मनुष्यानिंदव इति पितॄंस्तिरःपवित्रमिति ग्रहानाशव इति स्तोत्रं विश्वानीति शस्त्रमभिसौ
भगेत्यन्याः प्रजा इति छांदोग्यब्राह्मणश्रुतेः । अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ॥ आ
दौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः इति । नामरूपं च भूतानां कर्मणां च प्रवर्त्तनं । वेदशब्देभ्य एवा
दौ निर्ममे स महेश्वर इति च मनुस्मृतेश्च । शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्यामिति सू
त्रश्रुतिस्मृती एवैते प्रत्यक्षानुमानशब्दाभ्यामुक्ते । ननु यतो वाचो निवर्त्तंते अप्राप्य मनसा सह इ
ति सर्ववागगोचरत्वश्रुतेः कथं तादृशे ब्रह्मणि वाचः शक्तिरिति तत्राह अचिंत्यशक्तिमिति ।
तां नमामीति च पूर्ववत् । यथा च लक्षणया वा मुख्यवृत्त्या वोभयाभावेपि स्वत एव वा षड्विधतात्पर्य

दर्शितं तदुभयमप्यनेन प्रदर्शयति । विश्वः सर्वो विप्रपंचो विवर्तो ऽतत्त्वतो ऽन्यथाभावः कारणसत्त
यासत्तावान् कारणप्रकारेण च प्रकारवान् यस्य स सर्वसत्तास्फूर्तिप्रदः परमात्मा विश्वविव
र्तः स एव हेतुरुपादानं यस्याः सर्वप्रकारज्ञानशक्तिमत्परमेश्वरोपादानकत्वेन सर्वप्रकारज्ञान
फलयोगि न्याः अखिलवस्तूनामिक्षुक्षीरादिमाधुर्यादीनामपि प्रकारेण नानाविधाभिर्वृत्ति
भिरौत्पत्तिकी अकृत्रिमा शक्तिः प्रतिपादकतारूपा । प्रतिपत्तिरूपकार्यवशेन रूढव्यवहारेषु विज्ञा
यते तर्ककुशलैर्यस्या वेदलक्षणाया वाचस्तां कथमेतस्या ईदृशं सामर्थ्यमिति चिंतयितुमशक्या
शक्तिः प्रभावो यस्यास्तामहं नमामीति सर्वप्रकारज्ञानशक्तिमत्परमेश्वरोपादानत्वं वेदस्य सर्व
प्रकारज्ञानसामर्थ्ये हेतुरिति प्रथमवर्णकार्थः । शेषः परार्थः । न शेषो ऽशेषः सर्वपुरुषार्थस्तादृशं सर्वशे
षिभूतं वस्तु परमार्थसद्ब्रह्म तत्प्रकारेणैतदाकारवृत्त्युत्पादने न तदज्ञानावरणापनयेयस्याः

न्नैश्वर्यं निग्रहानुग्रहसामर्थ्यं विघ्नप्रभोः सर्वप्रकाशितुभ॰ षास्माद्भूतः प्रवत इत्यादिश्रुतिः सि
द्धस्यय स्यैव निरंकुशमप्रतिहतं प्रभुत्सोयं विश्वकृद्धि घ्नतदभावादिकृत्स्नप्रपंचकृद्भगवानेव
विघ्नेश्वरः श्रीगणेशरूपेणावतीर्णो विजयते· सर्वोत्कर्षेण वर्त्तमानोस्माननुगृह्णात्वित्यर्थः॰ तस्या
भक्तविघ्नकारिणो प्रभक्तविघ्ननिवारणायावतारे हेतुर्विघ्नविहितेरत इति रूपेव तस्यावतारकार
णमित्यर्थः। तस्य सर्वान्त्रित्यैकरूपत्वे पितृद्विजनाऽभजनयोरेव विषमफलस्वभावत्वान्नवैषम्यनैर्घृण्य
प्रसंग इति भावः॰ शार्दूलविक्रीडितं वृत्तं॥५॥ अतः परं सूत्रभाष्यवार्त्तिककारान्गुरूपर्वक्रमेण पू
जयति त्रिभिः। तत्र श्लोके रूपकेण भगवंतं व्यासं विघ्नवतारं सूत्रकारं प्रथमगुरुं स्तौति· वाग्विस्ता
राइति। व्यास एव पयोनिधिः महत्वगंभीरत्वपवित्रत्वस्वच्छत्वादिसाम्यात्· तस्य च पयः स्थानीया
वेदा एव द्रष्टव्याः॰। वाचांतरंगत्वोक्ते व्यासिद्धाब्देन वेदयसनगुणोपन्यासाच्च॰ दृष्टमात्राः पुनं त्येते राजा

लिंगोपेतोपनिषन्निर्विशेषमपि ब्रह्म बोधयति तथा विस्तरेण स्पष्टतरमुपरिष्टात्प्रदर्शयिष्यते
तदेवं निर्विशेषे ब्रह्मणि वेदांतवाक्यमेव प्रमाणमिति द्वितीयवर्णकार्थः। एवं प्रत्यग्ब्रह्मैक्याख्यवि
षयेण सम्प्रतिपाद्यप्रतिपादकलक्षणः संबंधो वेदांतानां दर्शितः· वेदांतवच्चतुर्लक्षणमीमांसा
ख्यशास्त्रस्य· शास्त्रवत्तत्प्रकरणस्यापीति द्रष्टव्यं। इंद्रवज्रोपेंद्रवज्रोपजातिर्वृत्तं ॥ ॥४॥ ।
चतुःसूत्र्यर्थकथनेन मंगलं ४ अथ विघ्नेश्वरप्रसादयति आरभ इति। यश्चेत्प्रसन्नहृदयोनु
ग्राहकस्तदातिरश्चामपि सुग्रीववत्तनुमत्प्रवृत्तीनामारंभाः अभिमतक्रियोद्यमाः फलिनः फला
व्यभिचारिणः सातिशयफलावाभवंति। नित्ययोगे निन्नाय नैवात इतः। नो चेत्प्रसन्नहृदयस्तदा
विश्वसृजो ब्रह्मणोपि किमुतान्येषां· अलमत्यर्थमपि प्रियफलोपायविषया उद्यमास्ते विफलतां य
थत्तां यांति। ब्रह्मणोप्यभिमतभंगो वत्साहरणादौ स्मर्यते· अतः एवमन्वयव्यतिरेकाभ्यां विघ्नस्मि

निरस्ता निर्मूलिता दुष्टतर्का एव मालिन्यहेतुत्वात्कलंकाश्च तन्मग्नानां पुनरुत्थानासंभवात्पंकाश्च
यस्याः सा सर्वदुस्तर्कदोषनिरासेन स्वतात्पर्यविषयीभूतार्थसमन्वितत्वेन प्रकटासीत्तं शंकरं सर्वक
ल्याणकरं भगवदवतारत्वेन सर्वपूजितपादपद्मं नमामीति संबंधः ४ । जैमिन्यादिभिर्हि कर्मकांडमेव स्वा
र्थसमन्वितं कृतं · उपनिषदस्तु स्वार्थात्प्रच्याविताः केश्चिच्च भेदविलयवादिभिरुपनिषदः स्वार्थस
मन्विताः कृताः कर्मकांडं तु स्वार्थात्प्रच्यावितं · भगवता व्यासेन च विविदिषावाक्यविचारयता
यद्यपि कर्मकांडब्रह्मकांडयोस्तुल्यमेव प्रामाण्यमंगीकृतं · तथापि तावन्मात्रेण न स्वार्थसमन्वि
तता · केश्चित्सूत्रं व्याचक्षाणैर्भर्तृप्रपंचादिभिर्भेदादेर्वेदार्थस्य वेदार्थत्ववर्णनात् · श्रीभगवत्पू
ज्यपादैस्तु व्यावहारिकत्वेन कर्मकांडप्रामाण्यप्रवृत्त्यादिव्यवस्थाप्य वेदांतानां तात्विकशुद्धाद्वै
तपरत्वं व्यवस्थापितमिति स्वार्थसमन्वितत्वं कृत्स्नवेदस्य संपन्नमिति महिमातिशयं दर्शयितुं ये

भिक्षुर्महोदधिरितिस्मृतेः। सनः पुनातु· पापमलरहितान्करोत्विस्यूक्तं· यस्य वेदपयसः श्रीया
सपयोधेर्वन्धिोवेदलक्षणायायेविस्तारास्तत्तच्छाखाभेदास्तएववहूतस्तरंगाः विस्तरवद्धूहृाभ्यांसंक्षि
प्तावाक्। वेलायास्तीरस्यतत्तटप्रांतदेशास्तस्यैवतरंगवेगावसानभूमित्वात् वक्त्रनिबद्धात्मैकेतत्त्ववो
धः शिष्याणामितिशेषः। सूत्रकारस्यवाक्प्रवृत्तेः शिष्यज्ञानार्थत्वेनतत्सिद्धावेवोपरतिसिद्धेर्यु
क्तंतस्यतटत्वं· त्वंपदार्थसिद्धौपदार्थद्वयशोधनेवाक्यार्थनिर्णयेतदुपयुक्तप्रमेयास्थापितेषुचयेनेका
णाप्रसरणप्रकारास्तएवोपादेयत्वेनतत्त्वभूकाशकत्वसाम्याद्रत्नानि· एतेनपद्मरागेंद्रनीलादि
विविधवेलक्षणपवर्त्तकीणामपिविविधवेलक्षण्यंसूचितं· यच्छब्दस्यतच्छब्दसापेक्षत्वात्सा
वितिसइत्यर्थः। इंद्रवज्रोपेंद्रवज्रोपजातिः॥ ॥६॥ ॥सत्संप्रदायेनभाष्यस्यकर्त्तारंशंकराव
तारंश्रीशंकराचार्यंप्रणमति। वक्तारमिति। यमेवव्याख्यातारमासाद्यनित्यासरस्वतीवेदलक्षणा

गुरुस्तुतिविशेषत्वेनयेप्रस्तावितेऽप्यात्मनःकृतार्थत्वनिरवद्यकीर्त्तिताभ्यांप्राप्तमात्मनश्चौद्धत्यमपा
करोति॰ गुरुचरणेति॰ अनेककल्याणगुणार्णवस्यगुरोश्चरणसरोजयोर्महासौभाग्यवशात् जिनोः
सन्निधानादनेकगुणार्पणयोग्यादपि वयंतच्छिष्याः सर्वेप्यस्यगुरोर्गुणैकलेशमेवभजामोनतुब
हुतरंस्वायोग्यत्वात् एतावतैकमपिप्रयोज्यमित्यस्येतिनविरुध्यते स्वायोग्यत्वेनबहुप्राप्त्यसंनिधा
नेऽप्यल्पग्रहणेदृष्टांतमाह अपिमहतीति। चतुःषष्टियोजनविस्तृततयाऽतिविपुलेऽप्युद्रोदाख्येसम
मिसमुद्रेनिमग्नाःकाकेस्येनतत्संवेदनास्य पिमीनाः सलिलंमितमल्पमेवाददतेगृह्णंति स्वायो ऊक्ष ५
ग्यत्वेनेतिलोकप्रसिद्धमित्यर्थांतरन्यासः॥८॥ एवमल्पज्ञत्वेनग्रंथकरणाशक्तौप्राप्तायामाह वा पा६
क्त्वद्युत्यादिना। गुरोश्चरणेनवृक्षस्येवान्यत्रस्वगमनसंचारणसमर्थस्यनिकटेनिवासाच्छक्तोहमितिका
रणपोष्कल्पंदर्शयित्वामहत्यारंभेविघ्नबाहुल्यसंभवात्तदभावमाह गुरोर्नारायणस्मरणतस्तु

मेवेत्येवकारः प्रयुक्तः। उपजातिः॥ ७॥ इदानीं स्वगुरुं वार्त्तिककारं पूजयति यदीयेति देवेश्वरस्य
सूरेश्वराचार्यस्य ते पादरेणवो जयंति· सर्वोत्कर्षेण वर्त्तंते तान्प्रत्यभिप्रणत इत्यर्थः। येषां पादरे
णवोपि सर्वोत्कृष्टास्तेषामुत्कर्षः केन वक्तुं शक्य इत्यभिप्रायः। सूरपदस्थाने देवपदप्रयोगः साक्षात्
गुरुनामाग्रहणाय· गुरोर्नाम न गृह्णीयादिति स्मृतेः। कीदृशास्ते· तारिताः संसारसमुद्रपारंगमिताः
शिष्यपंक्तयोऽस्मदादिशिष्यसमूहा यैः पांशुभिस्ते तथा। येषां पादरेणवोपि शिष्यांस्तारयंतीति
स्वयं तारयंतीति किमु वक्तव्यं। यदीयानां यत्संबंधिनां पवनादीनामपि संपर्कं संबंधं केवलमवाप्य
साधनांतरमन्माऽपि वयं सर्वे पितच्छिष्याः कृतार्थाः कृतप्रयोजना ब्रह्मसाक्षात्कारेण जीवन्मु
क्ताः जगत्सु लोकेषु च सद्ग्रंथकरणाध्यापनादिना निरवद्यकीर्त्तयो निर्मलयशसो वयामिति महाफला
वांतरफलकीर्त्तनं। अतः सर्वथा ते नमस्या एवेत्यभिप्रायः। वंशस्थं॥ ८॥ गणेशादिनमस्करणेन मंगलं·

द्रूपाशुश्रीवदाश्च निरंतरायो निर्विघ्नोहं · अतो गुरुचरणसमीपवासात्पादसंवाहनादिसमये तत्तत्र
श्चैरप्रतिपत्तिविप्रतिपत्तिनिराकरणेन शास्त्रार्थज्ञानरूपसामग्रीसंभवात् गुरुनारायणस्मरणात
श्चाखिलविघ्ननिवृत्तिसंभवात् ग्रंथकरणानुकूलसकलोपकरणसंपत्त्याहृष्यन् हर्षप्राप्नुवन् ।प्र
करणं शास्त्रैकदेशसंबद्धं शास्त्रप्रयोजनापेक्षयाप्रयोजनातिशययुक्तं ग्रंथविशेषं करवाणि कुर्यां
शास्त्रैकदेशसंबद्धं शास्त्रकार्यांतरे स्थितं · आहुः प्रकरणं नाम ग्रंथभेदं विपश्चित इति विद्बुध
मेत्तिरस्मरणात · शरीरमेव कुत्सितत्वाच्छरीरकं तत्रभवः शारीरको जीवस्तस्य तत्त्वमधिकृतो ग्रं
थश्चतुर्लक्षणशारीरकमीमांसालक्षणो विशारीरकः शारीरं जीवं ब्रह्मतया कायतीति वा तस्यार्थः प्रयोज
नं विषयश्चायस्य तत्तथा · अवगतिरज्ञाननिवर्तिका निर्गुणब्रह्मविद्या सैव प्रधानं विचार्यत्वेन तात्पर्य
विषयीभूतयस्य तच्च तच्चेति कर्मधारयः । अनेन शास्त्रैकदेशसंबंधो दर्शितः संक्षेपत इति सगुणवि

द्याविचारबाहुल्यपरित्यागरूपेण संक्षेपेणेति शास्त्रान्तरप्रयोजनांतरं दर्शितं प्रागेव विवृतमेतत् ॥१०॥
गुरुप्रणामा पूर्वकं ग्रंथारंभप्रतिज्ञा ॥३॥ ननु स्वस्यैवाऽन्यस्यापि मूलशास्त्रादेव तदवगतिसंभवात् कि
मननेनास्माकं स्वस्य विद्याशुद्धिरसाधारणं प्रयोजनमित्याह पदवाक्येति अथवा गुरुप्रणामस्यागुरु
यतिरिक्तेषु विद्वत्सु अनादरात् नैरपरिगृहीतोयं ग्रंथो न प्रचरेदित्यभिप्रेत्य तानपि संमानयति प
दवाक्येति पदनिपुणा वैयाकरणा वाक्यनिपुणा मीमांसका माननिपुणास्तार्किकाः · ते मां तद्विचा
रकुशलत्वात् इदं प्रकरणं पदतो वाक्यतो मानतश्च निपुणमवधानेन मनसा स्वबुद्ध्या विमृशन्तुः
विचारयतु · निपुणं मनसेति विशेषणाभ्यामनवधानपरप्रत्ययं च वारयति · प्रार्थितानां तेषां गुणदो
षनिर्णयाय प्रवृत्तौ कारुण्यमेव हेतुरित्याह गुणदोषेति। तथा चोक्तं कविना। आपरितोषाद्विदुषां न
साधु मन्ये प्रयोगविज्ञानं ॥ बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेत इति · ग्रंथनिर्माणमात्रं मद

र्भवेदित्याशंक्याह महामहिम्नामिति· प्रसिद्धयशसां दोषगुणपरीक्षणक्षमाणां विदुषां भव
द्विधानां निर्मत्सरत्वेन भानकुशलत्वेन च स्वभावतः संशुद्धतरमतिनिर्मलं परग्रंथनिर्दिष्टत्वापा
दनंतरूपयशःशारोपितदोषोद्भावनेन यस्तिरश्चिकीर्षति तिरोभावयितुमिच्छति स जगन्मंडलव्या
पिप्रकाशस्य विवस्वतो मंडलं लक्षयोजनविस्तृतं हस्ततलेनात्यल्पेन तदसंवद्धेनाच्छादयितुं प्रव
र्त्तते। नूनमिति सर्वथैवाऽसंभावितमिदं यथा तद्वदसंभावनीयं कर्त्तुमिच्छन्स वै लोकोपहास्यए
व भवति अतो भवतां विशुद्धज्ञानानां मम च भवदीहितग्रंथस्य न कापि क्षतिरित्यर्थः।।१३।।·
ऽविद्वन्माहात्म्यरूपलं तुष्यते २ ननु शारीरकार्थविषयमवगतिप्रधानं प्रकरणं कुर्वाणेन सूत्रकृ
ता नोपपद्यते· शारीरकमीमांसाया एव प्रयोजकाभावेनाऽसंगतत्वात् शिष्यजिज्ञासितसंदि
ग्धार्थनिर्णयाय भगवता निरस्तसमस्तदोषेणाऽथातो ब्रह्मजिज्ञासेत्याद्यारब्धं· शिष्यस्य

धीनं विशुद्धिस्तु निर्मत्सरविद्वदधीनेत्यर्थः ॥१३॥ नन्वस्माभिर्निपुणं विमृश्याद्विर्दोषकीर्तने क्रिय
माणे तव दुःखमेव स्यादित्याशंक्याह विद्वांस इति निर्मत्सरा विद्वांसो गुणदोषपरीक्षकाय दिममग्र
थे दोषं हानाय कथयेयुर्गुणगणं वोपादानाय कथयेयुः तद्दोषकथनं गुणकथनं च तुल्यं सममेव ब
हुमनुते आदरेणांगीकरोति मम मनो न तु वाऽन्यात्र दोषकीर्तने हि सति तन्निवारणेन निर्दोषो ग्रंथः शु
द्धः स्यात् इत्यभिप्रायेण दोषकीर्तनं ग्रंथशुद्धिरूपफलपर्यवसानाद्गुण एवेति महाननुग्रह इत्यभि
प्रायः। यस्तु मंदो मात्सर्यग्रस्तो दोषगुणविवेचनाऽसमर्थश्चासौ विचार्यैव यद्यंध इवाचित्रस्य
गुणं दोषं वाह तदपि तुल्यमेव कष्टं दुःखं मनुते बत इति खेदे बाढ्हेति पाठे बहु कष्टं मनुत इत्यन्वयः ४
मनो मम तिरोषः ४। तदुभयस्यापि ग्रंथविशुद्ध्यप्रयोजकत्वादित्यर्थः ॥१४॥ नन्व स्माभिर्निपुणं विचार्य नि
र्दोषत्वेन निश्चितेऽपि ग्रंथे कश्चिदतिमत्सरी दोषमुद्भावयति चेत्तदास्माकं महद्दयशो भवेत्तव च ग्रंथशुद्धि

कलंकितमित्यनभ्यासदशापन्नजलज्ञानवत्फलायनभवतीतितत्तोविचारप्रयोजिकाशिष्यस्य
जिज्ञासोपपद्यतइतिनोक्तासांगत्यमित्येभिप्रेत्यसदृष्टांतमाह चतुर्भिः पुरुषापराधेति पुरुषस्यप्र
मातुरसंभावनादिलक्षणेनापराधेनमलिना·अप्रामाण्यशंकयाकलंकिता· ननुप्रमाणस्याप
राधेनतस्यदृष्टांतेदार्ष्टांतिकेचनिर्दोषत्वात् ननुनिर्दुष्टप्रमाणजन्यंज्ञानंअप्रामाण्यशंकावशा
दभ्यासंननिवर्त्तयतीतिकथंदृष्टइत्याशंक्यदृष्टांतमाह।निरवद्येति।भर्त्तुर्नामकश्चिल्लकस्यचिद्राती
र्यंतवल्लभोब्राह्मणोराजोपजीविभिर्मात्सर्याद्दुष्यमाणआसीत्· सकदाचिद्दैवयोगान्नेत्रेपिधा
यारण्येक्षिप्तःकिंचित्तत्रास्थितोदैवयोगेनारण्येपिकेनसहपुरसमीपमागतोपिविहितविराजकीयाव
रुद्धपुरमार्गःपुरप्रवेशेनशशाक·राजाचभर्त्तुर्भृतःप्रेतोजातइतिनैःप्रबोधितःसंस्तथैवानिश्चय
मकरोत्·दैवात्कदाचित्तवहिर्गतोबाह्येपवनेतंदृष्ट्वापिब्रह्मराक्षसंभ्रमेनइतिपुरुषंसोम्यगधा

चब्रह्मण्यऽत्यंतानुपलब्धे जिज्ञासा वा संदेहो कथं भवेत् धर्मिज्ञानसाध्यत्वात्तयोः · तच्च निर्विशेषे
ब्रह्मणि न प्रत्यक्षादिना संभवति रूपादिहीनत्वात्तस्य · अद्वितीये तस्मिन् लिंगासंभवाच्च · अद्वयमेव
हि ब्रह्म मुमुक्षुं प्रति शारीरकेण विचार्यते · सगुणब्रह्मविचारस्य प्रासंगिकत्वात् · नापि वेदांतात्तत्
ज्ञानं · विचारात्पूर्वं तत्तस्तदयोगात् · अन्यथा विचारवैयर्थ्यात् · नचापाततज्ज्ञानं विचारं विनापि भव
तीति वाच्यं · तस्यैवाऽनिरूपणात् । निःसामान्यविशेषे ब्रह्मणि सामान्यविषयस्य तस्याऽसंभवात् अप
रोक्षे ब्रह्मणि परोक्षज्ञानरूपस्य तस्यायोगात् · अतः शिष्यस्य जिज्ञासाऽसंभवात् अजिज्ञासितार्थवि
षये प्रेक्षावतः प्रवृत्त्ययोगात् असंगतं वै शारीरकमीमांसेति तदर्थविषयमिदं प्रकरणंस्तत
रामसंगतमित्याशंक्य विचारात्प्रागपि वेदांतादेवाधिकारिणो विदितपदतदर्थस्य निर्विशेषब्रह्मसाक्षा
त्काररूपज्ञानं भवत्येव · तच्च श्रोतुरसंभावनाविपरीतभावनादिचित्तदोषैः प्रमाणमप्यप्रामाण्यशंका

रेभ्योपिनद्राक्षमानीयतंततोतिजनेविसृजेदित्यादिस्मृतिमूलाग्रंथकर्तृदेशाप्रसिद्धिः यथाभर्तुर्वि
षयानिर्देषचक्षुर्जनिताप्रमाणभूतापिमतिर्मत्तोभर्तुर्द्रष्टुमयोग्यएवकिंतुश्रोतएवायंहृद्रूपतइत्य
संभावनाविपरीतभावनारूपपुरुषदोषेणाभिभूताभर्तुरेवायमितिनिश्चयफलायपर्याप्तानभवति
तथानिर्देषवेदांतमहावाक्यजन्याप्रमाणभूताप्यहंब्रह्मास्मीतिधीः वेदांताब्रह्मपरानभवंत्येवाद्वि
तीयंब्रह्मनसंभवत्येवसंसार्यसंसारिणैरैक्यंनसंभवत्येवेत्यसंभावनाविपरीतभावनारूपपुरुषदोषा
भिभूताविचारात्प्रागज्ञानादिनिवृत्तिफलायनपर्याप्ताभवतीत्यर्थः ॥१४॥ मानमेययोरूपनिषद्ब्रह्म
णोर्निर्देषत्वात्परिशेषात्प्रमातृदोषएवफलप्रतिबंधकइतिशास्त्रीयेणविचारेणतस्यापगमेस
त्यप्रामाण्यशंकारूपप्रतिबंधाभावात्पुनस्तस्मादेवनिर्देषवेदवाक्यात्सफलाधीरुदेति· यथाभ
र्तुर्दुर्जनैरारण्येक्षिप्तोजीवन्नेवपुनरागतइत्युपपत्याभर्तुर्ज्ञानाऽप्रामाण्यशंकाकारणपुरुषापराध
प्र

विगमेसतितद्विषयाभर्तुरेवायुरितिसफलाधीरुदेतीत्याहपुरुषापराधेति ऽत्रानुरूपंदृष्टांतां
तरमाहमणीति तेनादोऽवधारणे मणिमंत्रयोर्धूमोत्पत्तिप्रतिबंधकयोरपगमेसत्येवलत्ताकारो
धूमउद्भवति पावकात्सदाधूमजननसमर्थोन्योन्यथायथातथेहापीत्यर्थः ॥ १५ ॥ भवतुपुरुषा
पराधविगमात्सफलाधीस्तावताविचारशास्त्रस्यकिमागतमित्यत्राहपुरुषेति सकलइति धर्मविषयोऽ
ऽविषयश्चेत्यर्थः वेदविदः शवरस्वामिप्रभृतयः आहुः धर्मजिज्ञासासूत्रव्याख्यायां अर्थादिति शेषः
तेषामेतदभिप्रायंप्रमाणमाह अनपेक्षतामिति प्रथमतंत्रे औत्पत्तिकसूत्रे लोके शब्दस्यप्रमाणांतर
मूलस्यैवप्रामाण्यात्तदभावेऽनाप्तवाक्यवद्वेदाप्रामाण्यमाशंक्यानाप्तवाक्यस्याप्रामाण्यंनमूलाभाव
कृतं किंतुदुष्टपुरुषमूलतयादुष्टत्वेनस्वभावप्रयुक्तप्रामाण्यप्रतिबंधात् वेदेतुपदपदार्थसंबंधस्यनित्यत
यातत एववाक्यार्थसंबंधेऽन्यानपेक्षणात् वेदस्वरूपस्यापौरुषेयत्वाच्चनपुरुषमूलत्वेत्यनपेक्षत्वेनस्व

तः प्रामाण्यमुक्तं॰ तद्यदि विचारादिकमपेक्ष्य वेदोर्थं प्रतिपादयेत्तर्हि सापेक्षतयातस्याऽनपेक्षत्वं
बाधितं स्यात् इति सर्वोऽपि विचारः प्रतिबंधनिवृत्तिमात्रहेतुरिति सर्ववेदवित्संमतमित्यर्थः। गिरो वेद
स्याऽनपेक्षतामर्थेनुपलब्धेन तत्प्रमाणं बादरायणस्यानपेक्षत्वादित्यत्र प्रतिपादितामनुपरुध्याऽबा
धिलासफलो विचारः पुरुषापराधविनिवृत्तिफल इति वेदविद आहुरिति संबंधः । विचारस्य प्रति
बंधनिवृत्तिसाधनत्वे फलितमाह। फलवदिति। अत इति॰ प्रतिबं धनिरासित्वाभ्युपगमादित्य
र्थः॰ प्रकृष्टं करणं निर्माणं यस्य विचारशास्त्रस्य तादित्यर्थः॰॰ अथवोक्तरीत्या शारीरारंभे निर्दुष्टेस
ति तदर्थाविष्करणाय प्रस्तुतप्रकरणं फलवदित्यर्थः॰ ॥१६॥ प्रतिबंधनिवृत्तेरहेतुत्वेस्यतोऽपुरुषार्थ
त्वेन कथं तन्निष्ठं प्रकरणं फलवदित्याशंक्य विवक्षितकार्यविरोधिनि तदनुत्पादस्याग्रिमसमयसंबंध
प्रयोजके प्रतिबंधके सति समर्थात्कारणसद्भावादपि कार्यानुदयात् वर्णिताग्रिमसमयसंबंधाभाव

संपादकतयाऽन्यथासिद्धोपिप्रतिबंधकाभावः कार्येणस्वोत्पत्तयेऽपेक्ष्यतइतिप्रकरणंतन्निष्ठमपिफल
वदित्याह पुरुषापराधत्रातेति · शास्त्रेणैवप्रतिबंधस्यनिरस्तत्वात् किंप्रकरणेनेत्याशंक्यपुरुषदोषाणाम
नंतत्वाद्दृष्टांतिरसकृदुपदेशादितिन्यायेनतत्साफल्यमुक्तं · गिरावेदलक्षणयाः शास्त्रलक्षणयाश्च · स्व
यमेव · इतराऽसहकृतत्वादेव · अथप्रतिबंधनिवृत्त्यनंतरंमुक्तिफलाविद्या वेदशिरसोवाक्याद्भवति · अ
भ्यासदशायांकेवलाच्चक्षुषइवजलज्ञानमतोनसापेक्षत्वमित्यर्थः पुरुषापराधाकुलत्वंचाऽप्रामाण्य
शंकैवेत्युक्तं ॥१७॥ जिज्ञासापूर्वकविचारहेत्वापातज्ञानोपपादनं ॥४॥ प्रमिताक्षरावृत्तं · नन्वन्वयव्यति
रेकाभ्यांतात्पर्यज्ञानंवाक्यार्थज्ञानहेतुः शक्तिज्ञानवत् तच्चविचाराधीनमितिचेत्तत्राह स्वाध्याय
वदिति · स्वशाखागतवेदवाक्यवदित्यर्थः । घटते · युज्यते · अस्यस्वाध्यायस्य किंविचारोवेदांतवाक्यवत्
दर्थज्ञानेकरणं · उताङ्गं · नाद्यः प्रत्यक्षादिवद्विचारो स्यप्रमाणस्याप्रसिद्धत्वात् · तर्कत्वरूपस्यतस्यप्र
माणानुग्राहकत्वेनस्वतोऽप्रमाणत्वात् · वाक्यकरणकज्ञानस्यकरणां तरानपेक्षत्वात् · ज्ञानांतरस्य
चासत्वात्

द्वितीये च न प्रोक्षणादिवदाग्नेयादेर्वेदस्य विचारः स्वरूपोपकार्यंगं · तद्धि तत्र श्रुत्यादिविनियोजकाभावात् स्वा
ध्यायस्वरूपस्य स्वतःसिद्धत्वेन तत्रानुपयोगाच्च · अस्तु तर्हि प्रयाजादिवत्परमात्मज्ञानोत्पत्तावारादुपका
र्यंगं · तदुक्तं · इतिकर्त्तव्यताभागं मीमांसा पूरयिष्यतीति · प्रमाणानामनुग्राहकस्तर्क इति च॰ तन्न॰ प्रया
जादिभिराग्नेयादिषु फलानुकूलशक्तिवद्वेदे तत्त्वसाक्षात्कारजननानुकूलशक्तेराधानाभावात् · नहि
वाक्यस्योत्पत्तिकार्थप्रकाशनशक्त्याद्यतिरेकेण विचाराधेयं किंचिदस्ति · तदंगत्वावेदकप्रमाणाभावस्य
उक्तत्वाच्च · करणोपकारस्य शक्त्यादिज्ञाने नैव सिद्धेश्च · उभयत्र साधारणं प्रागुक्तं दूषणं स्मारयति ·
सापेक्षतेति · आपतन्तीति छेदः · तथात्वे · विचारस्य करणत्वे · अंगत्वे वा तत्सापेक्षत्वापतनं न मुक्तं प्रागु
क्तन्यायेनेत्यर्थः ॥१८॥ यत्तु तात्पर्यज्ञानं नियतान्वयव्यतिरेकाभ्यां वाक्यार्थज्ञाने कारणं · शक्तिज्ञा
नादिवत् तच्च विचाराधीन मिति विचारस्यांगत्वमिति · तत्राह · व्युत्पन्नस्येति · सहसा झटिति · वि
नैव तात्पर्यज्ञानाभावनिमित्तविलंबं व्युत्पन्नस्य शक्त्यादिज्ञानवतो वाक्यस्य श्रुतौ श्रवणे · ततः नियता

न्वयव्यतिरेकाभावात् मीमांसनस्यतात्पर्यज्ञानस्यतदर्थविचारस्यचवाक्यार्थबुद्धिजननेनव्यापृति
नेपियोगादित्यर्थः एतदुक्तंभवति· नहितात्पर्यज्ञानंनियमेनवाक्यार्थज्ञानात्पूर्वंसंभवति· गवानयनादिवा
क्यश्राविणांतज्ज्ञाननैयत्याभावात्· नहितदातात्पर्यव्याप्तलिंगज्ञानंतेषामस्ति· समभिव्याहारमात्रस्य अ
होविमलंजलंनद्याः कच्छेमहिषश्चरतीत्यत्राऽनन्वितयोर्नदीकच्छयोरपिदर्शनेनतदलिंगत्वा[illegible]त्। नचय
त्रैकवाक्यत्वंतस्यवाक्यस्याविशिष्टा[illegible]र्थेतात्पर्यमितिवाच्यं· तस्यापिप्रतारकवाक्यादौव्यभिचारात्
एकवाक्यताज्ञानादेवनियतार्थज्ञानसंभवेनतात्पर्यज्ञानस्यतत्रोपयोगाभावाच्च· अर्थवादादेः प्रतीय
मानार्थेतात्पर्याभावनिश्चयेपितज्ज्ञातपदशक्त्यादिस्वारस्येनविशिष्टार्थप्रतीतेश्चनतात्पर्यज्ञानंतत्रकार
णं· नानार्थपदयोगादपितत्तत्पदार्थोपस्थितियोग्यताद्यनुरोधेनकदाचित्कस्यचिदर्थस्यप्रतीत्युपपत्ते
श्च· नहितत्रसर्वपदार्थस्मरणंनियमेनास्ति। यत्रास्तितत्रयोग्यतादिज्ञानमस्तिचेत् युगपत्तावदर्थ
ज्ञानमस्तु· किंतात्पर्यज्ञानेन· तन्नत्संसर्गघटिततात्पर्यज्ञानस्यतत्तत्संसर्गात्मकवाक्यार्थबोधात्प्रा

गनुपपत्तेश्च न तात्पर्यज्ञानस्य तत्र हेतुत्वं संभवति॰ नन्वात्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्य इत्यादिनात्म
नोद्देशेन श्रवणादिविधानात्कथं तस्य तदहेतुत्वं तत्राह॰ तेनेति॰ येन कारणेन विचारांगतया करणेन तया वे
नवाक्यार्थज्ञानोपयोगीति तेनेत्यर्थः॰ अर्थादनुपपत्त्याकरणादिभावभजने॰ उद्देश्यज्ञानविशेषांश इति शेषः
वेदार्थप्रमितौ जनयितव्यायां आयास्यतीति पदं॰ अतो द्रष्टव्यपदेन नात्मज्ञानमात्रमुद्दिश्यते॰ आपाता
त्मज्ञानस्य प्रागेवोत्पन्नत्वात् किंत्वप्रतिबद्धात्मदर्शनं॰ एवं च तदुद्देशेन विहितो विचारो विशेषण
एव पर्यवस्यति॰ ज्ञानमात्रस्य प्राक् सिद्धस्य तत्साध्यतानुपपत्तेरिति अतितोपि न विचारस्य [illegible] ज्ञा
नप्रतिहेतुत्वमिति प्रागुक्तेर्वगतिरिति भावः॥१८॥ एवं विचारात्पूर्वमापातप्रतिपन्नं ब्रह्म मुमुक्षोर्जिज्ञास्यं
विचारस्य प्रतिबंधकनिवृत्तिमात्रेणार्थवानित्युक्तं॰ नन्वेवमपि जिज्ञास्यं ब्रह्म हृदयं चेत्तर्हि घटवदनात्म
त्वान्न मुमुक्षोर्जिज्ञास्यं स्यात्॰ स्वप्रकाशं चेत्तस्य यथावत्प्रकाशमानतया न जिज्ञास्यत्वं॰ नहि
स्पष्टं प्रकाशमाने जिज्ञासा भवति॰ न च स्वप्रकाशमप्यज्ञानावृतं न यथावत्प्रकाशत इति वाच्यं अ

हमितिज्ञानस्यैवात्मयाथात्म्यविषयत्वात् ब्रह्मणस्तदविषयत्वेचाऽनात्मताप्रसंगः स्वप्रकाशेऽप्यात्म
निज्ञानसाध्यप्रयोजनस्याविनापिविचारंसंभवेन विचारानर्थक्यंच। किंच। आत्मज्ञानमात्रेनविचारप्र
योजनं। तस्यसकृद्दुःखनिवृत्त्यन्यतरत्वाऽभावात्। तत्साध्यंचान्यत्स्वर्गादिवन्नमुमुक्षोऽभिलषि
तं। संसारात्मकानर्थस्यसंभवेन्नज्ञाननिवर्त्यः। असंभवेन्नतराम्। अतोविषयप्रयोजनाभावान्नेदं
प्रकरणमारब्धव्यमित्यतआह। आच्छाद्येति। आवृत्येत्यर्थः। अज्ञानमनादिभावरूपंज्ञानापनोद्यं
वक्ष्यमाणंसंस्फुरत्स्वप्रकाशात्मतयानिरंतरतयाचयथावत्प्रकाशमानमप्यद्वयानंदब्रह्मस्वरूपमाच्छा
द्यविक्षिपति विविधतत्स्वरूपविपरीतंप्रपंचभावमापादयति। वैविध्यमेवाह जीवत्वादिना। तत्ती
यत्संभावे। तथाचस्वप्रकाशस्याप्यात्मस्वरूपब्रह्मणोऽविद्ययायथावदप्रकाशमानत्वाज्जिज्ञा
स्यत्वमुपपद्यते। प्रयोजनंचजीवेश्वरत्वादिभेदकल्पनानिवृत्तिरस्तीतिकाकदंतसमंनब्रह्मला
श्रयः प्रपंचस्यज्ञानापनोद्यत्वायाह मृषेति। एतेनाद्वयानंदब्रह्मस्वभावस्यकथंतद्विपरीतरूप

नाहूलं शक्तिद्वयाश्रयत्वप्रयोजकं वा · ननु स्वतन्त्र इति प्रधानादिलक्षणमित्यर्थः ॥२०॥ नन्वात्मनोऽज्ञा
नावृतत्वे प्रकाशायोगात्कथं ततोऽज्ञानात् कारणादि भानं · नह्यप्रकाशमानज्ञानाद्विषयप्रकाशो भ
वतीत्यत्राह प्रत्यकेति · विषयपदमत्राविवक्षितं चैतन्यमात्रं यो विषयस्तदाश्रयतो वज्ञेनेत्यर्थः · अथवा व
क्ष्यमाणरीत्या अधिष्ठानावरणस्य विक्षेपहेतुत्वं · एवं चोभयमपि हेतुरिति तदुपादानं प्रत्यक्स्वरूपं प्र
त्यगात्मनोऽज्ञानादिसाधकं चैतन्यांशमपिधायानाद्यध्यस्तं च परागिवर्तैः जीवत्वादिविवर्ते विक्षिप
तीति संबंधः · अज्ञानं हि स्वाश्रयावभास्यं · न जानामीति तदनुभवात् · अवभासकं च प्रकाशमेवेति तदाश्रय
चैतन्यमनावृतं · एवं चाज्ञानं तदाश्रयत्वादेव तदाच्छादकं न भवतीत्यभिप्रेत्यैवमुक्तं · तदा चाज्ञानादिभानमपि
रूढं चैतन्यं नास्तीति व्यवहारादज्ञेनेन तद्योग्यतारूपमावरणं नास्तीति भावः । तर्हि ज्ञातं ब्रह्म तत्तोऽन्यत
स्यादिति नेत्याह · अद्वयमिति तर्हि कथं प्रकाशमानस्याप्रकाशमानत्वं स्यात् आकांक्षायामुक्तं तावत् प्रकाशमा
नत्वेऽप्रमाणं · एवं जीवेश्वरत्वाद्यध्यासाधिष्ठानतया तत्राप्रकाशमानत्वं च वाच्यं · विशेषावरणं विनाऽ

तेतिनिरस्तं· शुक्तिकादेरिवाज्ञानाद्रजतादिभाववदात्मनः प्रपंचभावस्याप्यज्ञानकल्पिततयामृ
षात्वान्नकोपिदोषइतिभावः· मृषात्वंचसदसद्विलक्षणत्वमितिनसदादिपक्षोक्तदोषः सदसदात्म
त्वव्यावृत्तयेएवेस्फुटं· ननुअज्ञानस्यसत्यत्वेकथंतत्कृतविक्षेपस्यमृषात्वंमृषात्वेवाकथंतस्याछ्छा
दकत्वं· लोकेसत्यस्यैवतद्दृष्टेरित्याशंक्यमृषाप्यज्ञानमर्थक्रियाकारितयाछ्छादयतिविक्षिपति
चतत्कारित्वेचसत्यत्वंनप्रयोजकं· असंप्रतिपत्तेः किंत्वाछ्छादनाद्यनुकूलशक्तिमत्वंतच्चमृषात्मकेपि
स्प५ स्वप्नदृष्टेदृष्टं· आछ्छादकेलोकेपिसत्यत्वमसंमतमित्याशयेनाह आवरणविक्षेपशक्तियोगादिति
आवरणशक्तिविक्षेपशक्तिभ्यांयोगादित्यर्थः· आवरणशक्तिर्नास्ति अद्वयंब्रह्मनप्रकाशतइतिव्य
वहारयोग्यतावरणंतत्प्रयोजकशक्तिः· विक्षेपशक्तिस्त्वहंकर्ताभोक्तेत्यादिभ्रमजननशक्तिरित्यर्थः· नन्व
ज्ञानमपिशक्तिमच्चेत्परकीयप्रधानान्नविशेषइत्यतआह आत्मत्वेति। आत्मत्वंसद्रूपंइचैतन्यंतन्मात्रमे
वाश्रयोविषयश्चयस्यतस्यभावस्तत्त्वात्तद्बलेनेत्यर्थः· अज्ञानस्यह्यात्माश्रयविषयत्वमेवपरकीयप्रधा

ध्यासायोगादित्यभिप्रेत्य प्रपंचं जीवत्वादिभिर्विक्षिपतीत्युक्तं · यद्यपि चैतन्यमात्रमेव ब्रह्म तथापि त्व
दावृतमनुभूयते तच्च वक्ष्यमाणविधयाऽविरुद्धमिति भावः तर्हि जीवत्वादेस्तत्राध्यासस्तत्राह अशेषे
ति · तथा च निर्विशेषे जीवत्वाद्यवभासोऽध्यासं विना न संभवतीति तस्य तत्रारोपो वक्तव्य इत्यर्थः ॥२१॥
ननु यथा सांख्यमते प्रकृतिः पुरुषाश्रयत्वविषयत्वमंतरेण जगदुत्पादयति एवमज्ञानमप्यस्तु किं त
स्य प्रत्यगाश्रयत्वविषयत्वकल्पनया · न चाऽध्यस्तमज्ञानं तत्कार्यं चेति ततोऽस्य वैलक्षण्यमिति वाच्यम्
तदध्यासस्यैवाद्याप्यसिद्धेरित्याशंक्यात्मनि प्रपंचस्याध्यासं दर्शयिष्यन् तदर्थं तस्य तत्र वक्तृतोऽसंभ
वं तदर्थं च प्रमाणसिद्धमात्मस्वरूपं दर्शयिति · अलक्षेति · एतानि वक्ष्यमाणानि द्रष्टव्यानि · निर्दुःखे
ति सुखविग्रहतामिति भूम्नश्चैतन्यस्योपलक्षणं · अन्यथा अनुवादे तत्कीर्तनायोगात् ततः किं
तत्राह निर्दुःखेति निर्दुःखादिस्वरूपेऽस्मिन् चैतन्माद्वयात्मनि · अनृतजडदुःखादिनो रूपत्वं रूपं न संभा
व्यते वस्तुतः कथमपि न संभवतीत्यर्थः । अहंकारप्रमुखो जडप्रपंचो न तावदात्मनो न्यत्र सिध्यति आत्मन

एवंतदुपादानतयावक्ष्यमाणत्वात्कार्यस्योपादानादन्यत्रावस्थित्यनुपपत्तेः· तत्सत्तास्फूर्त्ययोगाच्च· नह्यात्मा
तिरिक्तमपिकिंचित्संभवति· नाप्यात्मनिसंबंधांतरेणतस्यवृत्तिः संभवति। निरवयवयोः संगेसंबंधांतरासंभवा
त् तादात्म्यंचवास्तवंविरुद्धयोर्नसंभवति· तद्विरुद्धरूपंचात्मनः प्रत्यक्षादिसिद्धमितिनकथमप्यात्मनिप्रपं
चस्यवस्तुतः संभवइतिभावः ॥२२॥ प्रतिज्ञातमर्थमुपपादयन्प्रथमंप्रत्यक्षेणात्मनोनिर्दुःखनित्यसुख
तांदर्शयति प्राज्ञइति यद्यपिसुखप्रत्यक्षमात्रमात्मस्वरूपसुखमेवाविषयीकरोति तथाप्यन्यसिद्धि
शंकाशून्यतयानिर्दुःखत्वादिसिध्यर्थंचसौषुप्तिकंप्रत्यक्षमुदाहृतं· यस्मिन्लोकेभूतस्यसुषुप्त्यवस्थायांजीव
उपाधिकालुष्याभावात्प्रकृष्टप्रज्ञोभवति· तस्मिन्प्राज्ञाभेदरूपायामित्यर्थः· समनुभूयः स्पष्टमनुभूय·
अन्यथासुषुप्त्यर्थंकस्यापिप्रवृत्तिर्नस्यात्· ननुतदपिसुखजन्यमेवकिंनस्यात्तत्राह सर्वप्रकारेति स्मृ
ति२ तिरूपाऽनुभवरूपावायाविषयप्रवृत्तिः तच्छून्येसुषुप्तेः सर्वविशेषज्ञानोपरमरूपत्वात्· विषयज्ञा
नविनासुखजन्मासंभवात् नतदात्मन्यत्सुखमस्तीत्यर्थः· अत्रदृष्टांतकालेवासुखमितिक्रियाविशेष

णं· अनुसंदधानः स्मरन् अर्थात्तदेव सुखमित्याम्नायः तस्यन्निसंधानात्स्वरूपचैतन्यस्य सौख्यं नि
र्दुःखनित्यसुखात्मत्वं· यद्यपि सुखमहमस्वाप्समिति स्मृतिर्न निर्दुःखत्वं नवा नित्यत्वं तस्य विषयीकरो
तीति तद्बलात्प्राक्तनसुखस्य निर्दुःखत्वादि न सिध्यति· तथापि सुषुप्त्यवस्थायामनुभूयमानसुख
बलान्निर्दुःखतात्मनः सिध्यति· अत एवोत्थितस्य निर्दुःखमस्वाप्समिति व्यवहारः सुषुप्तिकालीनसु
खसामर्थ्यादेव तस्य नित्यत्वमपि सिध्यतीति प्राक्तनसुखप्रत्यक्षसामर्थ्यादात्मा निर्दुःखनित्यसुखमिति १२२
एवमनुमानेनाप्यात्मनः सुखात्मत्वसिद्धौ तस्य निर्दुःखनित्यतापि सिध्यतीत्यभिप्रेत्य· आत्मा·
सुखाऽभिन्नः सुखलक्षणवत्वात् वैषयिकसुखवत्· यद्यल्लक्षणवत्· तत्तदात्मकं· यथा गवादी
त्यनुमानमाह सर्वमिति· प्राचुर्याभिप्रायमेतत्· यदर्थं· यत्संबंधितया प्रीतिविषयः· ननु यद्धेतुरित्यर्थः
आत्मसुखस्याजन्यत्वात्· इह जगति वस्तु यदस्ति किंचित्· एतदपि प्राचुर्याभिप्रायं· पारार्थ्यं· अन्यप्र
युक्तप्रीतिविषयत्वं यदिष्यमाणमिति शेषः निजसत्तया· स्वस्वरूपेण सुखं सुखमिति वर्णयंतीति संबंधः·

ल व्याप्तस्य हेतोः पक्षधर्मतामाह तत्र्यंगात्मनीति · समं वैषयिकसुखतुल्यं अस्तीति वार्थः । निगमयति
सुखेनेति · तस्मादुक्तहेतोः · अत्र यदिष्यमाणं पारार्थ्यमुद्दिश्यति निजसत्तयाय दिष्यमाणं तद्धि सुखमि
तिलक्षणं विवक्षितं एतदुपपादनाय सर्वमित्याधक्षक · दुःखादौ सुखसाधने चातिव्याप्तिवारणाय दलद्वयं
ननु पुत्रादिवत्सुखमपि ममसुखं भूयादित्यात्मार्थमेव काम्यत इति कथं पारार्थ्यमुद्दिश्यतीति । तन्न । न हि
पुत्रादिनेवात्मनः सुखेनापीष्टं किंचिज्जायते येन सुखं तदर्थं भवेत् · न च सुखमात्मसंबंधितयैवाभिलाषा
स्पदं · आत्मसंबंधित्वस्य दुःखादिसाधारणस्य सुखप्रीत्यप्रयोजकत्वात् · न चात्मसुखत्वं तत्रापीति निमि
त्तमिति वाच्यं · लाघवेन सुखत्वमात्रस्यैव तथात्वात् · सुखं चैकमेवेति नातिप्रसंगः । न च कथं तर्हि ममसु
खं भूयादित्यभिलाष इति वाच्यं · ममप्रत्यक्षसुखं भूयादिति हि तथा काम्यते सुखव्यक्तेरेकत्वेनव्या
वर्त्याभावात् · प्रत्यक्षं त्वज्ञातअस्मत्सुखादिव्यवच्छेदकमिति तदेव ममेति विशिष्यते इति नोक्तदोषः । अह
कारत्राबलो ममताधिकरणात्केवलं सुखमन्यादितिमदीयत्वमपि प्रतीयमानमस्त्येव · परं तु तत्कामनो

प्रयोजकं न भवतीति भावः ।२४। किंच आत्मा सुखं अनौपाधिकप्रेमगोचरत्वात् · यन्नैवं तन्नैवं · यथा दुःखा
दीत्यनुमानांतरमाह प्रेमेति अनुपाधीति अन्याप्रयुक्त इत्यर्थः। असुखात्मनि · सुखव्यतिरिक्ते प्र · स्वगा
त्मनि (निष्कृष्टाहंकारे तत्साक्षिणि चैतन्ये · कृमेरपीति वृद्धदुःखप्राणिनामप्यात्मनि प्रेमाद्युत्पत्तेः · किमु वक्तव्यं
विशिष्टात्मनामिति द्योतितं · कृमीणामपि स्वदुःखपरिहाराय धारणादिदर्शनेनात्मन्येव स्वदुःखद्वेषः सच तदा
त्मनि तेषां प्रेमाभावे नोपपद्यते · उदासीननरदुःखद्वेषादर्शनात् इति भावः · ननु कृमीणां अन्येषां वात्मनि कथं स
भवेत्सिद्धतद्योगात् इत्याशंक्य सर्वानुभवसिद्धः कथं स निराकार्य इत्याह नित्यसिद्ध इति · सदा अनुभवसि
द्ध इत्यर्थः।१। द्वप्ते हि धनपुत्रादौ सिद्धेऽपि पित्रादेस्तत्साध्योपकारं अप्रतिसंदधतो विप्रेमा · एवमात्मन्य
पि निरतिशयसुखरूपे स न विरुध्यत इत्यर्थः। किंच तदेतत्प्रेयः पुत्रात्प्रेयो वित्तादित्यादिश्रुतितोऽप्यात्मनि
नित्यसिद्धः स सिद्ध इत्याह · प्रेयः श्रुतेः इति · तत इति · व्याप्तस्य हेतोः पक्षधर्मत्वादित्यर्थः। नैयायिकोपीति ·

अपि त्वात्ममीमांसकादिरपि नैयायिकोऽप्यनुमानस्य द्वे अंगे व्याप्तिः पक्षधर्मता चेत्याहेति स्वाभिमतांग
युक्तं आत्मनः सुखतानुमानं नानिन्कुर्वीत न निराकुर्यात् किमुत वक्तव्यं श्रुतिप्रधानो मीमांसकादिरिति भावः
न चात्मनि दुःखित्वग्राहकप्रत्यक्षबाधः दुःखित्वादेरुपाधिधर्मतया दृगात्मनि सुखतानुमानस्य ततो भिन्न
विषयत्वात् इत्याह दृगात्मनीति ॥२५॥ प्रत्यक्षलिंगवचनानीति श्लोकोक्तं प्रत्यक्षमनुमानं च दर्शितं · इदानीं व
चनं तु प्रतिपादितं श्रुतिमपि तत्राह आनंदविग्रहमिति · आनंदस्वरूपमित्यर्थः अपास्तसमस्तदुःखमिति · तस्य प्रेक्षा
वन्मुमुक्षूपादेयत्वं द्योतितं · ननु सद्वितीये जीवे नाल्पे सुखमस्तीति निषेधात् कथं तस्यानंदरूपत्वादीति · तत्राह व
स्तुस्वभावेति · जीवस्वरूपं सप्रपंचं प्रतीयते तथापि · यत्र नान्यत्पश्यति नान्यच्छृणोतीत्यादिश्रुतिसिद्धमद्व
यं ब्रह्मैव तस्य वास्तवं स्वरूपमिति नासावल्पः · तथा च न सुखनिषेधश्रुतेरयं विषय इति भावः · ननु स्वर्गकौ
मादिवाक्यात् सुखत्वमवात्मनो न सुखरूपत्वमिति तत्राह · अध्ययनेति अध्ययनविधिर्हि स्वाध्यायत्वाद्वा
पस्थितकृत्स्नस्य शाखाध्ययनं विधत्ते न तु कर्मकांडमात्रस्य · एवं चाधीतोपनिषत्काः साधनचतुष्टय

समयभाविनस्तज्ज्ञानस्य तदा विषयासक्तमनोजन्यत्वमनुपपन्नं · न चाद्वितीयक्षण एव सुखादिज्ञान
मितिवाच्यम् प्रमाणाभावात् · प्रथमक्षणेऽज्ञातसुखवसत्वे प्रमाणप्रयोजनयोरभावाच्च · द्वितीयक्षणेऽपि
सुखाद्युत्पादके मनःसंयोगस्याऽन्यथासिद्धतया तत्तज्ज्ञानासंभवाच्च · न वा विषयासमवायिकारणस्य ज्ञा
नासमवायिकारणत्वं क्वचिद्दृष्टं। संयोगांतरकल्पने चासमवायिकारणनाशेन नष्टसुखादेरनुभवासंभवा
च्च · कथं तर्हि सुखज्ञानमुत्पन्नं विनष्टमित्यनुभव इति चेत् न तावत्सुखादिस्थितिसमये तज्ज्ञानस्योत्पत्ति
विनाशानुभवोऽस्ति · येन ज्ञाने पृथगुत्पत्यादि सिध्येत् · सुखाद्युत्पत्यादिदशायां तदनुभवस्य तदुत्पत्त्या
दिविषयतयाऽन्यथासिद्धत्वेन तदसाधकत्वात् · तस्मात्सुखाद्युपलक्षिततदनुभवस्य दुःखादिसम
येऽपि स्थितेतदुत्पादककरणानिरूपणात् सुखादिविशिष्टतदुत्पत्यादेरन्यथासिद्धत्वान्नास्त्येव सुखानुभ
वोत्पत्यादिरेवं तद्देशानुभवस्यापीत्येवाधितलाघवात् सुखदुःखादिविषयानुभव एक एव · स एव पुरु
षांतरस्यापि सुखादिसाधक इति जगन्मात्रसाधकं चैतन्यमेकं · तस्यैव घटादेरपि प्रकाशकत्वात्स चात्मे

संपन्नास्तऊत्तानि न लिप्यंते लोकदुःखेन यो ऽशनायापिपासे विज्ञानमानंदं ब्रह्म· एषोस्य परम आनंदः· यो
वै भूमा तत्सुखं इत्यादीनि प्रत्यक्ष वाक्यान्यानंदात्मप्रतिपादकान्याम्नंति पठंति· पठ्यमानवेदांतवाक्या
न्निर्दुःखनित्यसुखविग्रहं तद्रूपं भूमानमात्मानमवगच्छतीत्यर्थः· अथवा वेदो ऽशिरो वेदांता इति मतेन तेषा
मर्थशून्यत्वात्तत आनंदाद्यसिद्धिर्नो वाक्याध्ययनविधेर्दृष्टार्थत्वात् कर्मवाक्यवत्तेषामप्यर्थवत्त्वं दुरप
न्हवमित्याह· अध्ययनेति· यः प्रत्यक्षानुमानसिद्धस्तमानंदविग्रहमिति संबंधः। ॐ एतदुक्तं भवति· उक्तं
तावदनृतजडविरोधीत्यत्रात्मा जडाहंकारविलक्षणो ऽपि द्रूप इति· ननु सत्यमुक्तं· तदेवानुपपन्नं· ज्ञान
स्यानित्यत्वात् इति चेन्न· ज्ञानपदवाच्यवृत्तेरनित्यत्वेपि तत्तदाश्रयसाक्षिचैतन्यस्य तदभावात्· अस्ति
तावद्देवदत्तादेः सुखदुःखादिसाक्षात्कारः स च घटादिसाक्षात्कार इव चक्षुरादिनाऽकेन चित्करणेन न
साध्यते तत्र प्रमाणाभावात्· न च सुखाद्युपलब्धेः सकरणिका क्रियात्वादिति तत्करणं मनः। सिध्यतीति
वाच्यं· न क्रियात्वस्यासिद्धेः। न च साक्षात्कारत्वात्तत्सिद्धिः तस्य नित्यत्वेप्युपपत्तेः किंच सुखाद्युत्पत्ति

इत्याशंक्य निरधिष्ठानाध्यासायोगात्सच्चिद्रूपात्मन एव तदधिष्ठानत्वं वाच्यं· ततश्चसत्यानृतात्मत्वात्प्रपंचस्य
तत्र सद्बुद्धिरन्यथा सिद्ध्यतीत्याशंक्य येनाह तत्र प्रत्यक्पराग्द्वयमिति· तत्र प्रत्यग्वपुः प्रत्यक्पराग्द्वयसमुदायात्म
कमित्यर्थः। नचाप्रयोजकत्वं· प्रपंचविलक्षणे आत्मनि प्रपंचात्मतायाः असंभवस्योक्तत्वात्·· ननु अध्यस्त
मपि शुक्तिरजतादि सत्यमेवेत्यत्राह· नवास्तवमिति· उक्तरीत्या तस्याऽनिर्वचनीयत्वसाधनादित्यर्थः। अ
थवा· नन्वधिष्ठानाध्यस्यमानयोर्द्वयोरुल्लेखित्वं भ्रमस्य दृष्टम्· अहमिति प्रत्ययस्त्वेकरूपोऽल्पमात्रविष
यः कथमध्यास इत्याशंक्याह प्रत्यक्पराग्गिति· अहमनुभवेऽपि निपुणं निरूप्यमाणे दृग्दृश्यरूपात्मना प्रत्य
गंशः पराग्गंशश्चाभासते· तस्य चेदमा निर्देश्यरूपस्य तप्तायःपिंडवद्वह्निरूप्योभयरूपत्वादध्यासं विना एकत्वबोधासं
भवादेतदुभयपरस्परास्मिन्परस्परात्मत्वेनाध्यस्ततायाः प्रतियोग्येमित्यर्थः· ननु प्रत्यक्पराचोः सादृश्या
भावाद्विशुद्धे चात्मनि दोषस्याप्यसंभवादारोप्यस्य च पूर्वमननुभवेन संस्काराभावात्कथं परस्पराध्यास इत्य
त आह अबोधमात्रमिति· स्फुरतोऽपि तत्त्वानवबोधः सर्वत्राध्यासपुष्कलकारणं· सचात्मन्यनुभवसि
द्धस्त्वेकोऽत्र विसामग्रीत्यर्थः   अन्योन्येति· अन्योन्याध्यासे मिथुनीकरणं चेत्यर्थः। प्रत्यक्पराग्रूप

वक्ष्यतीति सिद्धं तदभेदस्य बाधकाभावादिति चिद्रूप एवात्मा॥ एवमुक्तानुमानेन तस्यानंदत्वसिद्धावानंदस्य दुःख
विरोधित्वेन निर्दुःखत्वं आत्मनोऽनित्यत्वायोगेन नित्यत्वं च सिद्धमिति निर्दुःखनित्यचित्सुखविग्रह आत्मा
एवं सर्वस्य प्रपंचस्य दृग्रूपतया वक्ष्यमाणन्यायाच्चाऽनिर्वचनीयत्वसिद्धौ सजातीयादिभेदशून्योपीत्युक्ता
त्मसिद्धिः। एतच्च वेदांतवेद्यसमस्तरूपोपलक्षणतयोक्तं तत्र कथं जडप्रपंचस्य वस्तुतः संभव इति॥२६॥
कथं तर्हि एतदनुभवः। अध्यासादसंभावितस्याऽनुभवसिद्धस्याऽध्यासनियमात्॥ ननु न प्रपंचोऽध्यस्तो
बाधकाभावात् न च शुक्तौ रजतादिवद्बाधोऽस्तीत्याशंक्य तदध्यस्तताग्राहकं प्रमाणमेव तद्बाधकमि
त्याह अध्यस्तमिति आरोपितमित्यर्थः। बाह्याध्यात्मिकप्रपंचोऽध्यस्तो न वास्तव इति वा॥ परिच्छिन्नत्वात् शु
क्तिरजतादिवदित्यभिप्रेत्याह॥ अल्पवपुरिति अस्यात्मनोऽल्पं वपुरिव वपुः यथाप्रसिद्धं वपुः स्वातिरि
क्तमात्मानं स्वस्वरूपेणानिरूपयदवच्छिनत्ति एवमहंकारादिरपि सच्चिद्रूपमात्मानं स्वेन रूपेण भा
सयतीति वपुः एतच्चाध्यस्तत्वोपोद्बलनायोक्तं॥ ननु सन् घट इत्यादिप्रतीतिविरोधान्नेदमनुमानं साधु

ह्यन्योन्यात्मकमन्योन्यधर्मवच्चाध्यस्तं। तस्य मिथुनीकरणं नामज्ञानाध्यासः तदुभयावच्छिन्नमेकं ज्ञानमि
तियावत् असंसर्गाऽग्रहनिबंधनत्वानभ्युपगमादित्युभयत्राज्ञानमेव निमित्तमिति भावः ततश्चात्र सगज्ञान
मेवबुध्यात्मनातदुभयोपरक्तज्ञानात्मनाचपरिणममानमहमितिसाक्षिविषयस्तदुक्तं आविद्यैवबाह्यदोषापे
क्षयारजताकारेणसाक्षिचैतन्यस्यरजतावच्छेदज्ञानाभासाकारेणचपरिणममानास्वकार्येणसहसाक्षि
विषयत्वमापद्यत इति अयमर्थः दुष्टेन्द्रियस्य शुक्तिसन्निकर्षादिदमिति प्रमाणवृत्तिर्भवति तत्र प्रतिफ
लितशुक्त्यवच्छिन्नचैतन्यनिष्ठशुक्तित्वाऽज्ञानं रागसंस्कारादिसचिवं शुक्त्या सह मिथ्यातादात्म्यापन्नर
जतात्मना परिणमते इदमाकारवृत्त्यवच्छिन्नचिन्निष्ठशुक्तिविषयत्वाज्ञानं तु ज्ञानसंस्कारसहकृतं साक्षि
रजतसंबंधापादकरजतज्ञानात्मना तच्च जडत्वान्न स्वविषयसाधकमिति सविलासाऽज्ञानं साक्षिविषय इति।
अत्र केचित् किं रजतज्ञानात्मिकाऽविद्यावृत्त्या। तया विनापीदमाकारवृत्त्यभिव्यक्तसाक्षिणैव रजतप्रति
भासोपपत्तेः अध्यस्तरजतादेः प्रमाणागम्यत्वेनावरणरहितत्वादावरणाभिभवार्थं चिदुपरागार्थं वा वृत्तेरन्यत्रस्वी

कारात् अतएवज्ञानसुखादौनवृत्त्यंतरमपेक्ष्यते॰ तेषामनावृतचैतन्याध्यस्तत्वादेवभानसंभवात् अन्यथावृ
त्तावपिवृत्त्यंतरापेक्षायामनवस्थापत्तेः॰ नापिसंस्कारार्थावृत्तिः॰ रजतविशिष्टचिन्नाशेनैवसुखादाविवतज्ज्ञानना
त् नचार्थज्ञानजसंस्कारस्यस्मृत्यहेतुत्वाद्वृत्तिसिद्धिः॰ सुखादाविवतत्कल्पनात् वृत्त्यंतरापेक्षयाधर्मिकल्पना
मात्रत्वेनलघुत्वाच्च॰ नचज्ञानसंस्कारस्याऽर्थाहेतुत्वं॰ अन्वयव्यतिरेकाभ्यामिद्धेवतत्कल्पनात्॰ अतएवप्राती
तिकंरजतं॰ दोषादेरप्यावश्यकरजतोत्पादनेवार्थवत्वमितिवदंति॰ अत्रोच्यते॰ अनावृतचैतन्याध्यस्ततामात्रस्य
जडभानप्रयोजकत्वे अनुमेयवन्ह्यादेरभानापत्तेः॰ तत्रविषयगतावरणभंगानंगीकारात्॰ कथंतर्हितत्रवन्हि
भानं॰ अनुमानूपपत्त्याऽन्तःकरणावच्छेदेन वन्हिविषयकाज्ञानापसरणात्॰ वन्हिमहंनजानामीत्यनुभवेनवन्हा
वात्मनिचाज्ञानसाधनात् तदन्यतरापसारणस्यचवन्हिव्यवहारहेतुत्वमितिवक्ष्यते॰ ततश्चतदाकारवृत्तिविषयत्व
मेवास्वच्छतामसेषुभानप्रयोजकमास्थेयं॰ स्वच्छांतःकरणेसुखादिभानेचवृत्तिंविनापितदाकारत्वसंभवात्रवि
न्नतिविंबाश्रयत्वमपीतिजडप्रतिभासेवृत्त्येवगतिः। चेतनंहियदाकारवृत्तौप्रतिबिंबेत्तद्भासयति॰ प्रतिबिंबाश्र

यंचरत्वादिकं· तथादर्शनात्· नचक्वचिद्वृत्तिः क्वचित्प्रतिबिंबाश्रयत्वंतंत्रमित्यननुगमः। सर्वजडप्रतिभासानुगतंतद्
चैतन्याकारत्वमेवप्रयोजकंब्रूमः· चैतन्यंयदाकारंभवतितत्प्रतिभासत इत्यर्थः· चैतन्यस्यचतदाकारत्वंनस्वतोऽसंग
त्वात्· किंतुक्वचित्प्रतिबिंबात्क्वचित्तदाकारवृत्तिसंबंधादित्यन्यदेतत् तत्रसात्विकांतःकरणतद्धर्मेषुप्रतिबिंबा
त्तामसेषुतदाकारवृत्तिसंबंधादेवेतिकुतोरजताकारवृत्तिंविनातज्ज्ञानं· नचाऽध्यस्तरजतस्याऽस्वच्छतामसस्य
चित्प्रतिबिंबाश्रयत्वमभ्युपगंतुंयुक्तं· अस्वच्छरजतसंस्कारसंस्कृताविद्यारब्धत्वेनास्वच्छत्वादितिसिद्धाऽवि
द्यावृत्तिः। ननुपरोक्षेतदाकारवृत्तिः अपरोक्षेत्वनावृतचिदध्यस्तत्वंतंत्रमस्त्वेवं· सामान्यसामग्रींविना विशे
षसामग्र्या अहेतुत्वेनतत्राप्यस्वच्छतामसभानहेतुवृत्तिविषयत्वस्याऽपरिहार्यत्वात्· किंचरजतस्य
विषयावच्छिन्नसाक्षिभास्यत्वे अहंरजतवानितिप्रतीतिःस्यान्नत्वहंरजतज्ञानवानिति· किंच· त्वन्मतेऽर्थसंस्का
रस्यस्मृतिहेतुत्वं· ज्ञानसामग्र्या अर्थहेतुत्वंचाक्लृप्तंकल्प्यमितिगौरवंप्रातीतिकत्वंचप्रतीतिकालान्यकालासत्वं·
नतुप्रतीतिजन्यत्वं· संस्कारादेरपिप्रातीतिकत्वापत्तेः· नचसाक्षिकालान्यकालःसंभवतीत्यविद्यावृत्तिरेवतत्प्रतीतिः

नतु तत्राप्यविद्यावृत्ते रजतविषयत्वात् धीवृत्तेश्चेदंमात्रविषयत्वाद्दिष्टपुरोवर्तिविशिष्टविषयत्वं स्यात्तरं प्रवर्तकं क
ल्प्यमिति चेन्न· एकावच्छिन्नजलदर्पणयोरेकमुखप्रतिबिंबवदेकतापन्नसत्याभिध्यावृत्त्योर्द्वयोरप्येकप्रतिभा
साभ्युपगमेन भुक्त्यभेदापन्नरजतस्फुरणस्य फलस्यैकत्वात्प्रवृत्त्युपपत्तेरिति संक्षेपः· सादृश्यज्ञानादेर
त्वं ४ ध्यासहेतुं व्यभिचारेण निरस्यति· सादृश्यधीति· सर्वाध्यासाननुगतत्वान्न हेतुत्वाभिमतमेतत्त्रितयं सादृश्य
धीदोषसंस्कारात्मकमध्यासनिमित्तमित्यर्थः। सादृश्यधियो व्यभिचारस्थानमाह ब्राह्मणेति· ब्राह्मणोऽहमि
ति जात्यध्यास आत्मनि सर्वैरिष्यते· अन्यथा ब्राह्मणो यजेत ब्राह्मणो न हंतव्य इति विधिनिषेधव्यवस्थानुपप
त्तेः तत्र च न सादृश्यमस्तीत्यर्थः· ननु सोऽपि त्रितयनिमित्तोऽध्यासत्वादिति· नेत्याह· जात्येति· आत्मनि
हि जात्या सादृश्यमनुपलब्धिबाधितं· द्वयोरपि गुणक्रियावयवशून्यत्वात्· न तस्य प्रतिमेति श्रुतेश्चे
त्यर्थः। ततश्च रजताद्यध्यासेष्वार्थिकं तत्त्रयं न त्वध्यासमात्रांगमिति भावः॥ ॥ नन्वत्रापि प्रमेयत्वादिना सा
दृश्यमस्तीत्याशंक्य· न तादृक्सादृश्यमध्यासप्रयोजकं· अतिप्रसंगात्· किंतु भूयोऽवयवगुणादिसाम्यं· न चैतयो

स्तदस्तीत्याह भूयस्त्ववदिति · एतच्च सामान्यपूगवपुषो विशेषणं · गुणावयवादीनां बहूनामनेकसामा
न्यात्मकमित्यर्थः · अथवा इह गोगवयादौ अभियुक्तै जैमिन्यादिभिः सामान्यपूगात्मकं सादृश्यं वस्तूक्त
मित्यन्वयः कासां व्यक्तीनामित्यत्राह भूयस्त्ववतीनां गवादितनुगतगुणावयवक्रियाणामिति · गुणा
नां शुक्लत्वदीर्घत्वादीनि सामान्यानि · अवयवानां पादपृष्ठत्वादीनि · क्रियाणां गमनभक्षणचर्वणत्वादी
नि · तेषां पूगः समूह एव वपुर्यस्य · नन्विति पाठे गुणादीनां भूयस्त्वं सादृश्यं वस्तूक्तमिति स्वार्थे वति
र्व्याख्येयः · नन्वाकाशवत्सर्वगतस्य नित्य इति वैदिकप्रयोगाद् ध्यासानुपपत्याच्चात्मन्यपि किंचि
त्सादृश्यं कल्प्यमित्याशंक्याह नेति · अत्र चिन्मात्रात्मनि न तादृगपि किंचित्सादृश्यमस्तीत्यर्थः । न
च नित्यत्वसर्वगतत्वाद्यपि जातिसादृश्यमनुवृत्तकारणात्मिकाया जातेरनित्यत्वाज्ज्ञातावर्त्तेरस
र्वगतत्वाच्चेति भावः · दोषस्य व्यभिचारस्थलमाह विषयेति · विषयदोषः सादृश्यादिः करणदोषः
काचादिः तत्र संविदिघमाणफले घयादिज्ञाने यः परेषां वेद्यत्वादिभ्रमः स तावद्विषयदोषात्करणदो

षाद्यानसंभवति। संविदः स्वप्रकाशत्वेना ऽविषयत्वात् करणागोचरत्वाच्च। अस्तु प्रमात्तदोषादेवेति चे
न्न हि दोषांतरासंभवात्। प्रमात्र्यभिव्यक्तान्मोहादेवेति वक्तव्यं न चास्मादिष्टमेवेत्याह अपिचेति। तत्र
मोहमात्रजत्वसिद्धौ तद्वत्प्रकृतेपि मोहैकनिमित्तता साधनीयेत्याह एवमिति। संविद्विवेद्यत्वादिधीभ्र
मस्तथापरमात्मनि हेतुबुद्धिरपि यतो भ्रांतिरतोज्ञानहेतुरस्त्वित्यन्वयः। अज्ञानजत्वं संभावयति विचि यथा३
त्रेति। भिन्नाभिन्नत्वसदसत्वादिविचारासहत्वेना ऽनिर्वचनीयेत्यर्थः। भ्रांतित्वसाधकमाह। ऽद्वित
यद्वयमतिरतस्मिंस्तद्बुद्धिरित्यर्थः। द्वयमिति साक्षिसिद्धत्वमाह भगवतीत्यनेन। महामाहिमत्वो
त्प्रपंचरचनासामर्थ्यं सूचितं। अस्त्वितिसमर्थने लोट्। अज्ञानजत्वशक्यसमर्थनमित्यर्थः। एवं
सादृश्यधीदोषयोर्व्यभिचार उक्तः संस्कारोपि व्यभिचारी। शुक्तिरजतादिवैशिष्ट्यस्य प्रागननुभूत
स्यापि भ्रमविषयत्वादिति स्पष्टत्वान्नोक्तं। इदानीं परस्पराध्यासे सत्यात्मनोप्यनात्मन्यध्यस्तत्वेन वा
ध्यत्वान्निरधिष्ठानसच्छून्यं जगत्स्यादित्याशंक्या ऽज्ञातस्य वाधावधेरनध्यस्तस्य च शिष्यमाणत्वान्नोक्त

दोष इत्यभिप्रेत्याह संसिद्धेति · विलसति व्यक्तीभवति मोहोऽनेनेति विलासो मिथ्यारजतादिः ततश्चायतः स
विलासाज्ज्ञानादृते वस्तु निश्शुक्त्यादावधिष्ठानसंज्ञाप्रसिद्धा · अधितिष्ठति घतं सकार्यो मोह इति स च नाध्यस्तोऽतो
यमस्थानेऽविषये शून्यत्वापादनभ्रम इत्यर्थः। ननु यदाधारमारोप्यं भासते तदधिष्ठानं तच्चारोप्येऽध्यस्तमेवाऽ
न्यथा परस्पराध्यासो न स्यादित्याह नाधार इति · अध्यस्तस्याधारत्वेन भासमाने शुक्तीदमंशोऽनाधिष्ठानमित्य
र्थः किंचन्यावले संसृष्टतयाध्यस्तोऽधिष्ठानांशाख्याधारः तदुक्तं · अतद्रूपोऽपि ताद्रूप्येणारोप्यबुद्धौ स्फुरन्न्ना
धार इति नचासावधिष्ठानं भवितुमर्हतीति परस्पराश्रयात् · अधिष्ठाने सत्यध्यासोऽध्यासे सत्यधिष्ठानमित्ति
तिभावः। यद्वा · अन्योन्याध्यासे निरास्पदं सच्छून्यं जगत्स्यादिति तर्केणकेषांचिद्वादिनां जेतुं महानयं संभ्र
म उत्साहोऽस्थानेऽनयुक्तमित्यर्थः संभ्रमे हेतुमाह · महतामिति · अनूनं तमः अज्ञानं येषां तेषां मध्ये महतां
शून्यवादिनां निर्बंधः परमतखंडने श्रद्धातिशयः यद्वा · निरास्पदमिदं चोद्यं निर्विषयमित्यर्थः। नन्वधिष्ठा
नमेवाधारस्तदाश्रयविषयाज्ञानकार्यस्याऽध्यस्तस्यान्याधारत्वायोगादतः कथमुक्तरीत्या शून्यतोद्धार इत्यात्रं

क्वाहा ऽधिष्ठानमिति । यन्निष्ठतया मिथ्यारजतादि भासते सोऽधिष्ठानसामान्यांश आधार इत्युक्तं तन्मात्रमे
व चेदधिष्ठानं स्यात्तस्य शून्यताप्रसज्येत न तु तथेत्यर्थः यतः सकार्य मोह विषये विशेषांश एवाधिष्ठानमिति लौ
कसिद्धान्त द्वोधादेव हि भ्रमो निवर्तते तेन अत एव लौकिकादिति न्यायेन तथैव शास्त्रे पीति नोक्त दोष इत्यर्थः
अत्रैके चिदध्यस्तमेव बाधीति न्यायाद्भ्रमविषय इदमंशः सत्यमिदमंशाद्भिन्नः सचाऽविद्यावृत्तिगोचरो बाध्यः
शुक्तीदमंशस्तु प्रमाणवृत्तिगोचरो न बाध्यः । न चेदंताद्वयविवेकापत्तिः विवेचकस्य शुक्तित्वादेरावृतत्वा
त् तद्विवेकाग्रहस्याध्यासहेतुत्वात् न चाऽविद्यावृत्त्या शुक्तीदंताभेदेनैव रजतं बोध्यतां किं मिथ्येदंतयेति वाच्यं
प्रमाणवृत्त्यविद्यावृत्त्योर्विरुद्धयोरेकत्रैकार्येऽप्रवृत्तेः । न चाविद्यावृत्तेर्नेदं तं विषयः । रजतप्रतीतिरिदमि
प्रथत इत्यादि विरोधादिति वदंति । तन्न । उक्तरीत्या शुक्तीदंतासंसर्गाध्यासेनैवेदं रजतमिति व्यध्यासोपप
त्तौ मिथ्येदंत्वकल्पने मानाभावात् गौरवात् । किंचैतत्तरश्लोके विरोधाच्च । अध्यस्तमेव हीति स्वरूपेणासंस
ष्टतया वाऽध्यस्तमेव भ्रमविषय इत्यर्थः । प्रमाणवृत्त्यविद्यावृत्त्योरेकस्फुरणेनैककार्यत्वस्योपपादितत्वात्

चित्सुखाचार्यैरपीदंतासंसर्गोप्यनिर्वचनीयइत्युक्तं नेदंत्वमितिदिक् इदानीमाधारावष्टंभेनापिसत्यानृत
मिथुनीकरणतयासंसर्गविधेप्याधारस्वरूपावा धातृशून्यतापत्तिमपहस्तयति· किंचेति· इदमन्योन्याध्या
सेयद्यनृतद्वयमेवपरस्परात्मतयाऽध्यसितयमिदं स्यात्तदाशून्यताप्रसज्येत द्वयोरपिबाध्यत्वात्· नचैवं·
किंतुसत्यंप्रत्यगनृतंपरागर्थः स्वरूपतोप्यध्यस्तत्वात् तयोर्मिथोऽध्यासश्चेत्प्रतीचः पराक्संसृष्टाकारेण त्वा ४
बाध्यत्वेपिस्वरूपेणसत्यत्वान्नशून्यप्रसंगइत्यर्थः· नन्वन्योन्याध्यास एवकिंक्रियमाणेमिथ्यानृतंकयाहंकारा
ध्यासस्यास्फुटत्वात्प्रसिद्ध एवरजताध्यासेप्रथमंसाधयति· इदमर्थेति· रजतंतावदिदमिशुक्त्यादा
वध्यस्तमि तिसंप्रतिपन्नमेवमिदमंशोपिरजतेध्यस्तइतिसाध्यंहेतुमाह रजतभ्रमइति· भ्रांतौ
भासमानत्वाद्रजतवदित्यर्थः।व्यतिरेकेशुक्तिविशेषांशवदित्यर्थः।यद्वा।यदीदंत्वमनध्यस्तंस्यात्तभ्र
मेस्फुरेच्छुक्तित्ववदितितर्कः।रजतेपुरोवर्तित्वलक्षणेदंत्वाऽस्फुरणेतदर्थप्रवृत्तिरपिनस्यादितिनिगर्वः
एवम र्थाध्यासेनुमानमुक्त्वातेनाध्यासेऽध्यस्तंप्रमा णयति।रजतेति· एकेवेदंरजतमिति

धीस्तत्रयथारजतस्येदमातादात्म्यंभासतेएवमिदमोपिरजततादात्म्यमित्यनुभवएवाचेतरेतराध्यासेमा
नमित्यर्थः॰ उक्तानुमानमूलभूतांव्याप्तिंप्रकटयति॰ अध्यस्तमेवहीति॰ अध्यस्तस्यैवभ्रमेस्फुरणादि
दृष्टंरूप्यध्यस्तमितिसाधितमित्यर्थः॰ ननुसर्वज्ञानंधर्मिण्यभ्रांतंइतिन्यायादनध्यस्तोपीदमंशःप्रथता
मितिनेत्याहनान्यदिति॰ अन्यत्त्वद्रूपेणसंसृष्टतयावाऽनध्यस्तमित्यर्थः॰ धर्मिण्यभ्रांतमितिचधर्मिस्व
रूपेऽभ्रांतंननुसंसर्गेपीत्यर्थः कथंनस्फुरतीतिचेदनुभवबाधादेवेत्याहभ्रमेष्विति॰ सर्परजतमरीचिद्वि
चंद्रादिभ्रमेष्वनध्यस्तानांरज्जुत्वादीनांस्फुरणानुपलंभनादित्यर्थः॰ ननुरजतादिभ्रमेद्वैरूप्यावभासादस्त
परस्पराध्यासानत्वहमध्यासे॰ तत्रद्वैरूप्यानवभासादित्याशंक्यतद्दृष्टांतेनात्रापिसाधनीयमित्याहइ
तरेति। चितिचेत्सयोर्योयमहमित्यध्यासः सोपितत्तोध्यासत्वादेवहेतोरितरेतराध्यासःस्याद्रजताध्यास
वदन्यथाध्यासद्वैरूप्यकल्पनानुचितास्यादित्यर्थः॰ अतएवाहमुपलभेइत्यहमिचेतन्यानुभवः॰ व्या
प्तिंस्मारयति॰ रजतेति॰ प्रकारांतरेणकल्पनागौरवमाह॰ नहीति॰ द्वैरूप्यावभासश्चात्रापिविवेकिनाम

मस्त्येवेतिभावः। चित्वादित्यादिवच्छाहंशब्दस्य शबलवाचित्वान्नशब्दद्वयप्रयोगः। उपपादितं इतरेतरा
ध्यासं सोपपत्तिकमुपसंहरति अनुमहतीति। अस्मात्पूर्वोक्तानुभवयुक्त्यनुमानरूपात्रितयाच्चिति
चेत्ययुगले इतरेतराध्याससिद्धिरन्यथा त्रितयस्यापि बाधापत्तेरित्यर्थः। नन्वज्ञातत्वेऽपि सादृश्यादिराहि
तस्य निरंशस्य प्रतीचोऽविषयिणः कथमध्यासाधिष्ठानत्वं। उक्ते सदृशसावयवपराग्विषयाणा
मेव शुक्त्यादीनामधिष्ठानत्वदर्शनादिति शंकते। सदृशेति। कथं चित्सादृश्यादिसंपादनेनांशाव्याप
रिहरति भवत्विति व्यवहारतत्सामर्थ्यात् चिद्रूपेप्यात्मनि तत्सर्वं स्फुटमित्यर्थः। तथा हि। अंतः
करणस्य देहेंद्रियापेक्षया प्रत्यक्त्वं स्वच्छत्वं चास्ति चैतन्यसादृश्यं सांशत्वमपि चैतन्यस्याऽ
विद्यावशादखंडस्यापि जीवत्वब्रह्मत्वाद्यात्मकमस्ति पराक्त्वमपि साभासांतःकरणे तदविविक्त
त्वेन स्पष्टीभावाद्विषयतामिवापन्नस्य शक्यमुत्प्रेक्षितुं। अनादित्वाच्च पूर्वपूर्वापेक्षया सर्वमिद
मुत्तराध्यासे शक्यं समर्थनमितिभावः। उक्तपरिहारस्योपसिद्धांतत्वशंकामपनयति। अपि चेति।

न तावदस्मत्कल्पितोयं परिहारः किंतु भाष्यकृद्देवोपचारमाश्रित्य सर्वमिदं विषयत्वादिकमात्मनि विभ्र
मसिध्यर्थमभ्युपेयादित्यर्थः । नच भाष्यकृदुक्तिरनुपलब्धिबाधितेत्याह स्ववचसेति । कण्ठरवेणैव नत्वभि
प्रायगत्येत्यर्थः । भाष्योक्तिमाह । न तावदिति । अध्यासभाष्ये कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विष
यधर्माणामित्याक्षिप्य । न तावदयमेकान्तेनाऽविषयोऽस्मत्प्रत्ययविषयत्वादिति ब्रुवन्नित्यर्थः । अस्म
त्प्रत्ययोऽन्तःकरणं तत्राभिव्यक्तः सन्विषय इव भवति । स हि अविद्यायामाभासाविवेकेन सूक्ष्मप्रति
बिंबात्मनाऽप्रविष्टोऽस्पष्टोऽपि प्रत्यक्पाधौ साभासान्तःकरणे स्थूलप्रतिबिंबात्मना प्रविष्टः सन्नुद्भा
तभानाविवस्वभानुवदभिव्यक्तः स्वप्रकाशोऽपि स्पष्टीभावमात्रेणोपचारादस्मत्प्रत्ययविषय इ
त्युच्यते । एतच्चाभ्युपेत्योक्तं । वस्तुतस्तु । अपरोक्षाध्यासेऽधिष्ठानापरोक्ष्यं तंत्रं न तु सादृश्यादीत्या
ह । अपरोक्षेति । अपरोक्षत्वापरोक्षविषयाच्च भ्रमधीरपरोक्षाधिष्ठानमात्रमपेक्ष्यते न त्वारोप्या
धिष्ठानयोरैकेन्द्रियग्राह्यत्वसादृश्यादिकमपि । व्यभिचारादित्यर्थः । ननु इन्द्रियागोचरस्यात्मनो

ऽपरोक्षमपि दुर्घटमित्याशंक्याह मनस इति · यद्वेति व्यवस्थार्थः क्वचिन्मनसः क्वचित्स्वतः क्वचिच्चक्षुरादि
त इत्यर्थः। क्वेदमवधारितमित्यत्राह स्वपनेति · नन्वात्मभिन्नस्य स्वतोऽपरोक्षत्वाभावात्तादृशोऽध्यासः क्व
संप्रतिपन्न इत्याशंक्यात्मनि चैवं विचित्राश्च हीति न्यायसिद्धत्वात्स्वप्नभ्रम इत्याह स्वत इति · चितिस्ता
वद्ग्राहकांतराभावात्स्वसत्तायां संशयाद्यविरहित्यात्स्वयंज्योतिष्ट्वश्रुतेश्च स्वतोऽपरोक्षा रूपादिहान
तया सादृश्यादिशून्या स्वप्नभ्रमाधिष्ठानं · तथाप्यत्र चितौ स्वप्ने निद्रादोषात् रूपाद्याकार एव भ्रमश्चक्षु
र्विषयं मनोनिमित्तं वा रूपवदधिष्ठानं विनापि पुनः पुनर्जायते स हि स्वप्नो भूलेतिश्रुतेः · यद्वा चक्षुरादिव्यापा
रोपरमात्कथं रूपाकृतिरित्यत्राह मनोनिमित्तमिति · मनोगतरूपादिवासनानिमित्तमित्यर्थः · स्वप्ने तैजसजी
वभोग्यफलेन वासनापुंजदोषस्य मनसोऽवस्थानात् · अत्रेदं विचारणीयं · किं ब्रह्मचैतन्यं स्वप्नभ्रमाधिष्ठा
नं · उत · जीवचैतन्यमिति · आद्ये व्यावहारिकः सन्न ज्ञातसत्ताकः स्वप्नप्रपंचः स्यात् · अंत्येऽपि किं जागरतस्य वा
धः किं वालय इति · अत्र वदंति · अवस्थात्रयाविष्टं हि आत्मचैतन्यं भवति · स्थूलांतःकरणोपहितं जागरे वास्

नाविशिष्टांतःकरणोपहितं स्वप्ने सुषुप्तौ च सूक्ष्मतदुपहितमिति नात्र जाग्रदवस्थोचितं चैतन्यं स्वप्नभ्रमाधि
ष्ठानं· जागरादौ चाहं चैत्र इति तादृगधिष्ठानबोधात्तद्बाधः· एवं च स्वप्नस्य जाग्रत्प्रपंचवैलक्षण्ये सति प्रमातरिवा
ध्यत्वं वक्ष्यमाणमुपपत्स्यते· स्वप्नांते सुषुप्तिश्चेत्स्वप्नसृष्टेर्लय एव तदभिप्रायेणैव वक्ष्यति· क्षीणे तु तत्र लय
मेतीत्यादि· इति न पूर्वोत्तरविरोधः· तुच्छाद्युपहितजीववदुपहितं तत्सृष्ट्वा तदेवानुप्राविशदित्यादिश्रुतेरीशक
ल्पितत्वेन व्यावहारिकत्वात् शुक्त्यादिवदधिष्ठानत्वयोग्यं· तन्निष्ठाश्च जीवकल्पिताऽज्ञानावस्थाः स्वप्न
भ्रमोपादानभूता अहं चैत्र इत्यादिजाग्रद्बोधेन बाध्यंते· शुक्तिज्ञानेनेव रजतोपादानाऽज्ञानावस्था इति॰
न चैवं सत्यहं गजोऽहं नीलमिति स्वप्नाकारापत्तिरिति वाच्यं· न हि स्वप्नः सर्वोऽपि तादात्म्याध्यासः किंतु जाग्र
त्संस्कारानुसारात्क्वचित्तथा· क्वचित्तु संसर्गाध्यासोऽयं राजाऽयं गजो मम क्षेत्रमिति तदाकारदर्शनात् इति
तदिदमापातरमणीयं· तथाहि· न तावदीशकल्पितस्थूलांतःकरणोपहितं चैतन्यं स्वप्नकालेऽस्ति यत्तदधि
ष्ठानं स्यात्· नापि तज्ज्ञानं जागरादिजन्यं स्वप्नभ्रमबाधकं भवितुमर्हतीति· तर्हि किं साक्षिज्ञानमविद्याद

त्तिरंतःकरणवृत्तिर्वा । नाद्यो तयोरज्ञानानिवर्तकत्वेनाबाधकत्वात् । नांत्यः अंतःकरणवृत्तेरज्ञानयो
धत्वादंतःकरणस्य चाज्ञातसत्तानभ्युपगमेन प्रमाणावेद्यत्वात् । स्वस्मिंश्च स्ववृत्तेरसंभवादित्यलमसद्ग्रहे
ण । केचिदवच्छिन्नानवच्छिन्नसाधारणं चिन्मात्रं स्वप्नाधिष्ठानमाहुः । तच्च साधारणचिन्मात्रस्य पर
स्परविरोधे हीत्यादिन्यायेन दुर्निरूपत्वादेव नोपपद्यत इति किं प्रपंचेन । शरीरावच्छिन्नं चैतन्यं तदधि
ष्ठानमित्यपरे । तदतीवस्थवीयः । नहि जागरादौ शरीरबोधं विना स्वप्नाऽनिवृत्तिः । घटज्ञानादपि
तन्निवृत्तेः । अन्ये त्वाहुः । अंतःकरणोपलक्षितं चैतन्यमधिष्ठानमिति तन्मते शुद्धचित एवाधिष्ठानत्वाज्जाग
रे स्वप्नस्य न बाधः स्यात् तथा च सति मातरि बाध्यत्वं नोपपद्यते । तस्मादनुपहितचैतन्यं जाग्रत्प्रपंचा
धिष्ठानं तदुपहितं तु स्वप्नप्रपंचाधिष्ठानमिति वृद्धाः । एवं च जागरादावावरस्य जाग्रद्वस्तूपहितचिद्गोच
रप्रमाणे सत्यां सति प्रमातरि स्वप्नबाध उपपद्यते । तत्र चाधिष्ठानतावच्छेदकं घटत्वाद्येव जाग्रदुपहितत्वमुप
लक्षणं सर्वनामशक्तौ बुद्धिस्थत्ववत् । तथा च जाग्रदनुभूतवस्तूपहितमेव ब्रह्मचैतन्यमिंद्रियोपरमात् तथा

त्वेनाऽप्रथमानं उपाधेस्तटस्थत्वात्स्वरूपमात्रेण प्रथमान निद्रादोषजाग्रत्संस्कारादृष्टसहकृताज्ञा
नेन सूक्ष्मप्रपंचात्मना विवर्तमानं स्वेनैव भासते। स्वप्नलोकस्य सर्वावतो मात्रामपादायेति श्रुतेः॥ अत्र
तिरोहितजाग्रदुपाधिविशेषस्य चेतनमात्रस्य स्वतोऽपरोक्षस्फुरणमेवाधिष्ठानज्ञानं। अज्ञातोपाधे
श्चोपहितानवभासादधिष्ठानतावच्छेदकजाग्रद्घटाद्याकारधियाबाधः। मूलाज्ञानाकार्यत्वाद् विद्यातिरि
क्तदोषजन्यत्वाच्च स्वप्नस्य न तद्व्यावहारिकत्वेति दिक्। आरोप्याधिष्ठानयोरेकेंद्रियग्राह्यत्वस्य व्यभि
चारं वक्तुं मनःप्रमाणत्वाभ्युपेत्यवादेन मानसेन भासि चाक्षुषाध्यासं दर्शयति। मनोवगम्येपीति। मान
सापरोक्षेप्यवरेऽधिष्ठानेऽपरोक्षतामात्रसामर्थ्याच्छुक्लं नभो नीलं नभ इति नानारूपोल्लेखी भ्रमो
दृश्यते। तेनोक्तनियम इत्यर्थः। एवं स्वतोऽपरोक्षेच स्वे न भ्रमनभोनेत्यभ्रमानुदाहृत्य नयनत इत्य
स्योदाहरणमाह। यथाक्षिगम्य इति व्याख्यातं।। ननु नाकाशे मानसो बाध्यत्वात्। मनसो बहिरस्वा
तंत्र्यात् अपितु साक्षिवेद्य एवेति चेन्न बाह्यस्य प्रमाणेनैव ज्ञाततया साक्षिवेद्यत्वान्नभसश्च व

हिरिंद्रियागोचरस्य मानसत्वमंतरेणाज्ञाततयैव भानप्रसंगात् तदुक्तं । ज्ञाततया विषयः प्रमा
णव्यवधानमपेक्ष्यत इति । कथं तर्हि स्फुरवादे कल्पितरजतादेरज्ञातत्वेनानुभव इति चेत् तेषामां
तरत्वेनाऽनावृतत्वाद्ग्राह्यस्य तु नभसो घटादिवदावृतत्वेनावरणभंगाय प्रमाणापेक्षणान्न मनोवेद्य
त्वमगत्याभ्युपेयं । न च तस्य बहिरस्वातंत्र्यं मनसा ह्येव पश्यतीत्यादिश्रुत्या बाह्यानामपि मनोवेद्य
तायाः दर्शितत्वात् बहिरस्वातंत्र्येण किंतु केवलमनोविषया । न चाऽनर्पिताकारं मनः साक्षात्कारस
मर्थमिति चक्षुरेव तत्राकारार्पकमभ्युपेयं । ननु कथं नीरूपे नभसि चक्षुषः प्रवृत्तिः तस्य रूपपुरस्कारे
णैव द्रव्येषु प्रवृत्तेरिति चेत् सत्यमेतत् न स्वीयरूपपुरस्कारेणेत्यत्र किंचिन्नियामकमस्ति । पीतः शं
खो रक्तः स्फटिक इत्यन्यरूपद्वारापि चक्षुः प्रवृत्तिदर्शनात् न च तत्र रूपवत्तः शौक्ल्यस्यैवाभिभवो
न तु रूपस्येति वाच्यं । तथापि उद्भूताभिभूतरूपस्पर्शस्य स्फटिकस्य चाक्षुषत्वप्रसंगात् । ततश्चा

लोकादिरूपोपाहितेन भासितद्वारापि चक्षुः प्रवृत्त्याविरोधः । अप्रत्यक्षेपि ह्याकाशे इति भाष्यं तु रू-
पानुपधानकालाभिप्रायं । परमतेन वा । न चान्यरूपद्वारापि रूपवत्येव चक्षुः प्रवृत्तिर्गौरवादुद्भूतरूप-
गृहादेव चक्षुः प्रवर्तते न तु उद्भूतरूपवत्येवेति । अस्तु तर्हि चाक्षुषमेव नभ इति चेन्न अरूपि द्रव्यत्वात्
महत्त्वे सत्युद्भूतरूपवत्त्वस्य द्रव्यचाक्षुषे तंत्रत्वात् । एवं च तमोपि मानसमालोकं विना रूपिग्रहे चक्षुषो
ऽसामर्थ्यात् इति संक्षेपः । ततश्चात्र रूपद्वारकचक्षुरर्पिताकाशाकारमनोवृत्तिविषयत्वेन नीलत्वा-
द्यारोप इति भावः ॥ तथापि ज्ञातसामान्यांशमज्ञातविशेषांशमधिष्ठानं । न चात्मनो निरंशस्य त-
त्संभव इत्याशंक्याऽभेदेपि ज्ञाताऽज्ञातत्वसंभवमुपपादयति ॥ ज्ञातेपीति । तावतितन्मात्रे तदभि-
न्न इत्यर्थः । इहैवं वस्तुनि ज्ञातेप्यज्ञानवशात्तस्यैव स्फुरणमस्फुरणं च दृष्टमित्यर्थः । कु-
त्र दृष्टमित्यत्राह दूरस्थयोरिति । दूरस्थवनस्पतिद्वये एकोयं वनस्पतिरिति भ्रमो भवति । तत्र चा-
नवस्थाभयादन्योन्याभावप्रतियो गिनोरानिरूपणांश्च भेदस्य च वनस्पतिरूपानतिरेकात्तत्स्फु-

३४

रणेपिभेदास्फुरणंदृष्टमित्यर्थः· तेनवनस्पतिवस्तुनीनोस्माकमवगते· तयोर्भेदस्तुतदभिन्नोपिनोद
ष्टिविषयइत्यर्थः· ननुतत्रापिवनस्पतित्वेनस्फुरणंभेदत्वेनाऽस्फुरणंतच्चभिन्नमेवेत्याशंक्याहततइ
ति· शब्दांतराभिलप्यत्वेनभेदेपिस्वरूपेणाभिन्नमेवभेदरूपंवनस्पतिरूपादित्यर्थः· इतश्चाज्ञातस्याऽ
ज्ञातत्वेनविरुद्धं त्वदुक्तमर्थंनजानामीत्यर्थेभासमानएवतदज्ञानानुभवात्तज्ज्ञानवदज्ञानस्यापिविषय
निरूप्यत्वात्सविषयकेचविषयस्यैवविशेषणत्वात्ज्ञातस्यचविशेषणत्वात्· नचतत्रज्ञातसामान्या
श्रयएवाज्ञाननिरूपकस्तस्यप्रमाणावगतस्याज्ञानाविषयत्वात्· परंतुद्धिस्थविशेषस्याऽशक्यज्ञानत्वा
त्कथंविशेषकत्वमितिचेद्ज्ञाततयासाक्षिवेद्यत्वाविरोधादावृत्तचितेरज्ञानाविरोधस्यानुभवसिद्धत्वा
च्च· परैरप्यनभ्यासदशायांज्ञातेपिजलादौसंशयाभ्युपगमादितिदिक्· ननुशुक्त्यादौज्ञाताऽज्ञातां
शयोरियंशुक्तिरितिशब्दद्वयवाच्यत्वेनभेददर्शनान्नैकस्यज्ञाताऽज्ञातत्वमित्याशंक्यतत्रसन्नपिअंशभे
दस्त्वप्रयोजकइत्याह यत्रापीति· यत्रापिशुक्त्यादौप्रतीतादिदंरूपादितरत्राऽप्रतीतेविशेषांशेदेवांशेदो

विद्यते तत्रापि तस्य भेदस्यापुनरुक्तशब्दवाच्यादिदंरूपादतिरिक्तवपुषः शुक्त्यादेरज्ञाततांप्रतिनागत्व
मित्यर्थः · इदंत्वशुक्तित्वधर्मभेद एव ज्ञाताऽज्ञातत्वावछेदक इति चेन्नेत्याह शुक्तीदमंशाद्धिति · अप्रती
तात्रिकोणता · शुक्तित्वं यद्यपि प्रतीताच्छुक्तीदंत्वाद्वस्तुतः पृथक् · तथापि तत्स्वं पृथक्त्वं तस्याः शुक्ति
तायाअप्रबुद्धत्वनिमित्तं नेष्टमिति संबंधः · कथं नेष्टमिति चेदुक्तव्यभिचारादेवेत्याह यन्न इति यस्माद्रु
दवतो वनस्पतेः स्वरूपं प्रपश्यन्नप्यस्माद्वनस्पतेः सकाशाद्भिन्नं पार्श्वस्थाद्वनस्पतेः सकाशादस्य भेद
मक्षणेन प्रतिपद्यते · स्वतो धर्मधर्म्यभेदेपि ज्ञाताऽज्ञातत्वदर्शनात्तद्दृष्टोऽप्रबुद्धत्वानंगमित्यर्थः · स्व
भिन्नभेदवादिमतेपि ज्ञातस्याऽज्ञातत्वमविरुद्धमित्याह · सप्रत्यभिज्ञेति · भित्तेपि प्रमाणान्निश्चिते
पि घटाद्यर्थे तस्यैव घटादेः स्वाभाविकात्स्ववपुषः स्वरूपादनतिरिक्तः स्थेमा स्थिरत्वमभेदः पूर्वमप्रबु
द्धोपि सप्रत्यभिज्ञस्य पुंसो नयनोत्थयाधिया धीः सोयं घट इति प्रत्यभिज्ञात्मिकातस्याः पश्चाद्बुद्धो भ
वतीति सर्वैरप्यंगीकृतमित्यर्थः । अथवा प्रत्यभिज्ञासंस्कारः तत्साहितनयनोत्थिताधिय इत्यर्थ ४०

नहि स्थैर्यं नामकश्चिद्गुणः क्रियाधर्मांतरं वा · अपितु वस्तुस्वरूपमेव पूर्वापरकालसंबंधं निमित्तीकृ
त्य स्थैर्यमुच्यते · एवं च क्षणिकवादिनां प्रत्यक्षे विघटादौ तद्भिन्नस्थैर्यज्ञाने चेत् ज्ञानसाम्राज्यसीमनि प्र
तीचि ज्ञाते ऽज्ञानविरोध इति किमु वक्तव्यमिति भावः। एवं च निरंशस्यापि सिद्धमात्मनो ऽधिष्ठानत्वमि
त्याक्षेपं संहरति · एवमिति · प्रत्यगानंदरूपेण स्फुरत्यपि चिदात्मनि मुक्ताद्वया नंदरूपेणास्फूर्तिभाज्य
धिष्ठाने स्वाज्ञानमात्रदोषादल्पकस्याहंकारादेरध्यस्तता प्रागुक्तयुक्तिभिरुपपन्नेत्यर्थः · अल्पकं रूप
विशिनष्टि जगदिति इदमिति साक्षिसिद्धत्वादसंवित्ति परोक्षत्वाद्विभागो नानात्वं तद्वदित्यर्थः · यद्यपि
स्फुरति चिदात्मनि नास्ति न भातीति व्यवहारलक्षणमावरणं नास्ति · विरोधात् · तथापि तदस्तिताभिन्नेप्यद्वयान
दरूपे ऽनुभूयमानत्वादेव तदंगीक्रियते · न ह्यज्ञानावृतत्वं तद्देहस्थितत्वं · येन विरोधः स्यात् किं तूक्तव्यवहारयो
ग्यत्वमेवेति भावः॥ एवमल्परूपस्याध्यस्तत्वे साधिते बंधस्तदनर्थत्वं तत्कारणमुक्तिस्तदर्थत्वं तत्कारणात्म
कं च सिद्धमित्याह अल्पं रूपमिति · अल्पं परिछिन्नं कर्तृत्वादि रूप्यत इति रूपं यन्नाम रूपकर्मात्मकं तद

स्यभ्रान्तो बंधनमिव बंधनमित्यर्थः नन्वकुतोस्याल्पत्वरूपस्यानर्थत्वमित्याह बद्ध इति · अनेन ह्यल्पत्वरूपेण धर्म
धर्म्यध्यासात्मकेनात्मा बद्धो निगडितः स्वच्छोप्यस्वच्छ इव विज्ञोप्यज्ञ इवानंदोप्यशनायादि विविध दुःखदा
वदहनप्रदीप्तशिखा इवानिशं बंभ्रमीति · · ननु कूटस्थाऽसंगचिदेकरसः सन्कथमयमीदृशीं दशामाप
न्न इत्यत्राह स्वात्माज्ञानमिति · स्वाश्रयविषयमज्ञानमेवास्यात्मनो बंधकारणं नान्यदित्यर्थः · नन्वीदृ
शस्य सहजमोहांधकूपमग्नस्य विवशस्य कुतो बंधविच्छित्तिः स्यादित्यत्राह स्वात्मेति स्वात्मनो द्वयानंदब्र
ह्माभेदेन यत्ज्ञानं तत एवास्य समूलबंधनिवृत्तिरित्यर्थः। तस्या उपादेयत्वमाह मुक्तिरिति सा हि मुक्तिरखि
लानर्थनिर्मुक्तिपूर्णानंदावाप्तिरूपत्वात्परमपुरुषार्थ इत्यर्थः। नन्वनादिभावरूपाज्ञानस्य ब्रह्मव
देव निवृत्त्यऽसंभवात्कुतस्तन्निवृत्तिरूपा मुक्तिः फलमित्याशंक्य तस्य मिथ्यात्वेन ज्ञाननिवर्त्यत्वं
साधयति अज्ञानमपीति । तथाहि अज्ञस्य स्वात्मन्यज्ञानान्वयः स्वाभाविकः कल्पितो वा · नाद्य इत्याह
नत्विति · कुत इत्यत्राह चैतन्येति · स्वभावत आत्मन्यज्ञानमस्ति चेद्वस्तुभूतं स्यात् · न च स्वप्रकाशे

दात्मकेवस्तुतोऽज्ञानंवर्त्तितुमर्हति प्रकाशात्तमसो विरोधात् तथाऽज्ञानमात्मधर्मश्चेत्स्वयं विनश्यदा
त्मानं विकुर्यदुपयन्नपयन्धर्मो विकरोति हि धर्मिणमिति न्यायात्तथाऽज्ञानस्य वस्तुत्वे द्वैतापत्ति
रिति चित्त्वाति विकारत्वाद्धूयत्वश्रुतिविरोध इत्यर्थः· द्वितीयमंगीकरोति· अज्ञाततापीति· अपित्व
र्थः· तथात्वेहि मध्यंदिना लोकमंडले कौशिकादिकल्पितांधकारवदविरोधः स्यादिति भाव ४० नन्वे
वमज्ञाने नैवाज्ञानकल्पनायामात्माश्रयत्वमिति नेत्याह नात्मेति· अनादित्वादज्ञानमज्ञानतंत्रमज्ञातत्वम
प्यनादीति कात्माश्रय इति भावः· यद्वा· अत्रानिर्वचनीयवादे नानुपपत्तिर्दूषणमिति भावः। केचित्तु।
सत्कार्यात् सत्कार्यवादिनोरभिव्यक्त्युत्पत्त्योश्चनात्माश्रयश्चेत्किमु मायावादिन इत्यर्थमाहुः। अज्ञा
नादेवाज्ञानकल्पने प्रमाणमाह द्वारमिति· आत्मन्यज्ञानसंबंधोऽज्ञानकृतो दृग्दृश्यसंबंध द्वाराज्ञा
नसंबंधवत्· प्रसाध्यांगीकृत्य श्लोकस्य सूचनार्थो हि शब्दः· अयमर्थः· यस्मादसंगस्याद्रूपस कल
मेवदृग्रूपं घटादि संबध्यमानमज्ञानसंबंधं द्वारीकृत्येत्यादि· आत्मनोऽनात्मनो योगो वास्तवो नोपपद्यते

इति च वार्तिकं तस्मान्नात्र व्याप्तौ विवदितव्यमित्यर्थः॥ हेत्वासिद्धिकृदिति मोहोपीति॥ अहमज्ञ इत्यनुभ
वादित्यर्थः॥ अत्र चेति॥ व्याप्तौ विवादो न हेतोः पक्षधर्मत्व इत्य र्थः॥ ततश्चाज्ञापि मोहनिमित्तत्वमिति
निगमयति तस्मादिति॥ ननु कथं प्रपंचकल्पनोपपत्तिरस्याज्ञानस्य स्वकल्पकत्वमपीत्याशंक्य स्व
परनिर्वाहकस्वभावत्वादित्याह संविदिति॥ यथा हि प्रमाणफलभूता संवित्स्वविषयघटादिसिद्धौ चो
पयुक्ताधरं तद्विषयाज्ञानसंशयादिनिवृत्तिभावं वहति उभयमपि साधयतीत्यर्थः॥ एवमज्ञाना
देव प्रपंचकल्पनमज्ञानकल्पनं चोपपन्नमित्यर्थः॥ ननु संवित्संविदंतरवेद्यैव स्वस्य स्वविषयत्वा
संभवादित्याशंक्याह स्वरसत इति॥ संविदंतरवेद्यत्वे ऽनवस्थानात्स्वसंशयादिराहित्यात्स्वव्यवहारेप
रानपेक्षयैव संविदित्याद्युक्तक्रमायं॥ संवित्स्वप्रकाशत्वे विप्रतिपन्नं प्रति निदर्शनांतरमाह आत्मेति॥
यथा वेद्यं घटादिकं स्वं चावगति समर्थज्ञानाख्यगुणयोगात्साधयति॥ आत्मकार्यव्यवहारसहत्वात्तज्ज्ञा
नं शक्तिरित्युक्तं॥ एवमज्ञानमपि शक्तिवशात्स्वपरकल्पकं स्यादित्यर्थः॥ नन्वात्मनो ऽज्ञानाख्यश

क्तिमत्वादस्तु स्वपरसाधकत्वमज्ञानस्य तु परशक्तिभूतस्य शक्त्यंतराभावादज्ञानांतरमेवाज्ञानसा
धकमप्येयमेवं चानवस्थेत्याशंक्य परदृष्टेपवदृष्टांतांतरमाह भेदं चेति यथैव हि भेदोऽन्योन्याभा
वो वेद्यं घटपटद्वयं मिथो भिन्नं बोधयति । आत्मानमपि भेदं घटादेर्भेद्यात्सकाशात्तु भिनत्ति न तु स्वप्र
तियोगिकं भेदांतरमपेक्षते ऽनवस्थानात् तथा मोहोऽपि मोहांतरं विना मोहं तत्कार्यं कल्पयतीत्यर्थः
एवं भाष्योक्ते बंधमिथ्यात्वे साधिते यदि शास्त्रारंभोपपत्तिः आदावध्यासः किमिति सूत्रकृतोऽपे
क्षित इत्याशंक्य सूत्रेष्वेव हि तत्सर्वमिति न्यायादसौत्र स्याविषयत्वायोगादर्थगत्या सूचित एव
स्याद् ब्रह्मज्ञानमिति अथातो ब्रह्मजिज्ञासेति मुमुक्षोर्ब्रह्मजिज्ञासोपदेशादधिकारिविशेषणस्य
मोक्षस्य बंधहेत्वज्ञानध्वंसात्मकस्य ब्रह्मज्ञानसाधकमिति सूचयन् बंधस्य सत्यत्वे ज्ञानान्निवर्त्यत्वा
नुपपत्तेः एतत्सर्वं पूर्वोक्ताध्याससाधनप्रबंधं कृतिः सूत्रयामास इत्यर्थः तेन नासूत्रितार्थवर्णनं भा
ष्यकृत इत्याह तस्मादिति । ननु ज्ञानमध्यस्तस्यैव निवर्तकमिति नायं नियमः पूर्वज्ञानस्योत्तरज्ञा

नेनेच्छायाः स्वविषयज्ञानेनशोकस्यसुहृद्दर्शनेनपापस्यसेतुदर्शनेनविषस्यगरुडध्यानेन
प्रवृत्तिप्रागभावस्यप्रवर्त्तकज्ञानेननिवर्त्तनदर्शनादितिचेन्न तत्वज्ञानत्वेननिवर्त्तकत्वस्यावि
वक्षितत्वात् · उत्तरज्ञानादेस्तुविरोधिगुणत्वेनसिद्धत्वेनसुहृद्ज्ञानत्वेनविहितक्रियात्वेनप्र
वृत्तिसामग्रीत्वेनयथायथंनिवर्त्तकत्वात् · प्रकृतेप्यात्मज्ञानत्वेनैवनिवर्त्तकत्वमितिचेन्नाऽहमि
तिज्ञानादपिबंधनिवृत्त्यापत्तेः · अहंब्रह्मास्मीतिज्ञानमेवनिवर्त्तकमितिचेत्तदेवहितत्वज्ञान
मात्मानंचेद्विजानीयादयमस्मीत्यादिश्रुतेः॥ तत्वज्ञानत्वेननिवर्त्तकत्वंचननिवर्त्यस्यामिथ्यात्वंवि
नानिर्वहति · तथाहि · नतावद्घटादिप्रपंचोपाहितब्रह्मज्ञानंतत्वज्ञानंभवति · ब्रह्मणएववस्तुतस्तथा
त्वाभावात् किंतुविशुद्धब्रह्मज्ञानं · विशुद्धिश्चप्रपंचराहित्यं · नचसत्यप्रपंचाश्रयेतदानीमेवतद्रा
हित्यंवर्त्तते · नचावर्त्तमानस्यसाक्षात्कारविषयत्वसंभवः॥ येनासौभाविनीतिःप्रपंचताभवगाहे
त · अस्तुप्रपंचोपादानत्वेनज्ञानमेवतत्वज्ञानमितिचेन्न · मृदादेस्तथात्वेनज्ञानेपिघटाद्यनिवृत्तेः॥

दृष्टविपरीतस्यचाकल्पनात् तस्मात्प्रपंचसत्वकालेपिब्रह्मणिनिष्प्रपंचत्वप्रमाबाध्या· साचनप्रपं
चमिथ्यात्वंविनेति· तथापिकथंसप्रपंचेप्रपंचराहित्यं तद्धितितदत्यंताभावासत्वादिति चेन्न तत्समस
त्ताकस्यैवतदत्यंताभावस्यतद्विरोधित्वेव्यावहारिकस्यचप्रपंचस्यब्रह्मणिपारमार्थिकाऽत्यंताभावावि
रोधात्· अतएवत्रैकालिकनिषेधस्यपरमार्थदृष्टरजताभावविषयत्वमुक्तंविवरणे· शुक्तौपरमा
र्थत्वेनदृष्टं यन्मिथ्यारजतंतत्प्रतियोगिकाऽभावात्मकाऽधिष्ठानविषयत्वंहितदर्थोनतुलौकिकापण
स्थरजताभावविषयत्वं· लौकिकस्यात्रनिषेध्यत्वेमिथ्यात्वापत्तेः नेहनानेतिश्रुत्यादृश्यमानप्रपंच
स्यब्रह्मणीवशुक्तौप्रतीयमानरजतस्यैवतत्रत्रैकालिकाभावप्रतीतेश्च· घटस्यतदभावाभावत्ववच्च
अधिष्ठानस्याभावस्याप्यध्यस्तनिरूपिताभावत्वेनविरुध्यते। केचित्तु। रजतस्यपरमार्थत्वाकारेणप्र
तियोगिमतियः त्रैकालिकाभावस्तत्परोयंग्रंथः· परमार्थत्वस्यव्य धिकरणत्वेचप्रतियोगिनोमि
थ्यात्वमपिसिध्यतीतिव्याचक्षते· सर्वथाप्युपपन्नः॥ प्रपंचकालेपिब्रह्मणिप्रपंचाभावइतिसंक्षेपः॥

अध्यासवर्णकमुपसंहरन् संभावितविषयप्रयोजनत्वाच्छास्त्रारंभं निगमयति तस्मादिति । एतत्प्रत्य
क्षं सकलमपि कर्तृत्वभोक्तृत्वादि स्वाज्ञानमात्रादेव दोषात् दृष्टौ चिदात्मनि अध्यस्तं कुत इत्याह भ्रमेति
भ्रमरूपे हि ब्रह्मणि अन्यरूपं परत्र परावभासत्वादध्यस्तमेव संभवतीत्यर्थः । ततः किमित्यत आह इतीति
अध्यस्तत्वासिद्धौ च ब्रह्मधीबाध्यत्वं सूत्रितं सिद्धं भवतीत्यर्थः । तेन विषयादिसंभवात् श्रीमच्छारीरका
र्थब्रह्मात्मैक्यस्य यत्तत्रागटनमपराधापनयनेन स्फुटीकरणं तत्र यत्सूत्रमुपपत्तिबाहुल्यं तदुक्तं
शास्त्रं समासव्यासाभ्यां चतुर्लक्षणीनयसंग्रहात् शास्त्रकल्पं प्रकरणं कुर्म इत्यर्थः । तन्निर्माणफल
माह इतिवादीति । जीवेशादिभेदाध्यासप्रतिहतिफलकवाक्योत्थज्ञानस्य यद्दार्ढ्यं प्रतिबंधात्
फलपर्यंतत्वाशक्त्यं तन्निराकर्तुमित्यर्थः । अगतार्थवर्णकमवतारयिष्यन् । ननु यदि ब्रह्मान्यतः सिद्धं
किं तद्विचारेण । अथासिद्धं [illegible] नतरां कथं विचारयितुं । वेदांतापातप्रतिपन्नं विचार्यमिति चे
त् । केयमापातप्रतिपत्तिः । सेति चेन्न । तस्याबुभुत्सामात्रहेतुत्वेन विचारहेतुत्वात् । अतो न ब्र

अ विचार्यं न वा बंधनिवृत्तिस्तत्फलमित्याद्यावाक्षिप्य समाधत्ते मीमांसितव्यमिति · न तावदन्यतः सि
द्धमेव ब्रह्मेह विचार्यं तस्योपनिषदन्यमानागोचरत्वादतो ऽद्वितीयं सद् विचारितान्महावाक्यात्संमुग्धोप
स्थितमनयैव मीमांसया मीमांसितव्यं अखंडानंदात्मना ज्ञातव्यं · ब्रह्मण औपनिषदत्वेन विचारस्यैव त
न्निश्चायकत्वौचित्यात् · ब्रह्मपदस्य बृहत्त्वार्थानुगमेन सर्वानुवृत्तसत्तास्फुरणात्म निर्व्युत्पन्नत्वा
दात्मशब्दस्य च यच्चाप्नोति यदादत्ते इति प्रत्यगर्थ एव प्रसिद्धेस्तयोरैक्यस्य विचार्यत्वसंभवात् · तद्बु
यतिमीमांस्यमेवेति · स तत्रात्मत्वेनाज्ञानादनया मीमांसया तदेवात्माऽभेदेन मीमांस्यं नान्यन्नियोगादी
त्यर्थः · नन्वस्तु ब्रह्मात्मैक्यं विचार्यत्वाद्विषयः फलासिद्धिस्तु तदवस्थैवेत्याशंक्याह ज्ञानमिति · अ
नेन प्रागुक्तेन यथास्यामीमांसाया इदमेव प्रत्यगभिन्नं अद्वयानंदं ब्रह्म ज्ञातं सत्प्रयोजनं भवतीत्य
र्थः । नन्वेवं बंधनिवृत्तिर्न फलं स्यात्ततः प्रागुक्तविरोध इत्यत आह · तन्नांतरीयेति · ब्रह्मात्मबोधे
सति तमोनिवृत्तेरर्थसिद्धत्वेन पृथग्व्यापारानपेक्षत्वात् तज्ज्ञानमनवत्ता सापि पृथगुद्देश्यतया फ

लमित्यर्थः· ननु तमोनिवृत्तेरधिष्ठानमात्रत्वेनात्माभिन्नायाः प्रागपि सत्वात्कथं ज्ञानसाध्यत्वमि
तिचेत्· यस्मिन्सत्यग्रिमक्षणे यत्सत्वं यदभावे च यदभावस्तस्यैव तत्साध्यत्वात्· अस्ति च ज्ञाने स
त्यग्रिमक्षणेऽज्ञाननिवृत्तिरूपात्मसत्वं· तदभावे चाऽज्ञाननिवृत्त्यभावोऽज्ञाने· आत्मनोऽज्ञाना
भावत्वेऽज्ञानस्यापि तदभावरूपत्वादिति· अस्त्वेतत्तमोऽत्यंताभावस्तमोनिवृत्तिः तस्या नादित्वेन
ब्रह्माभेदयोग्यत्वात्· न तमोध्वंसस्तस्य प्रतियोगिसमानकालत्वादिति चेत्॰ न॰ प्रतियोगिस
मसत्ताकस्यैव तस्य तदसमानकालत्वमित्युक्तत्वादिति दिक्· अथवा· ननु कथं निरतिशयं सुख
मेव पुरुषार्थः· अविद्यानिवृत्तेरपि तथात्वादित्याशंक्याऽद्वैतानंदब्रह्मावाप्त्यर्थं ब्रह्मणोऽपि प्रतिपाद्य
मानेतदविद्यानिवृत्तिस्ततोऽनुद्देश्यापि ज्ञानसामर्थ्यात्तु भवतीति न परमप्रयोजनमिति भावेनाह
तत्वांतरीयकतयेति· ननु जैमिन्यादेरित्थमाम्नायवर्णनमयुक्तं· तैः सर्ववेदार्थविचारस्यकृतत्वा
त्· अन्यथा धर्मजिज्ञासासूत्रस्याऽथातः शब्दविरोधात्· अथशब्देन हि कृत्स्नस्वाध्यायाध्ययना

नंतर्यस्य विचारस्य दर्शयति · वेदांतानाम विचार्यत्वे च तदध्ययनानंतर्यस्य स्वाविचारे किं प्रयोजनम्
एवमतः शब्देन कृत्स्नवेदस्य स्वार्थे प्रामाण्यं दर्शयति तदप्येवं सत्यनुपपन्नं स्यात्ततो वेदांतानां जैमि
न्यादिभिरेव विचारितत्वाद्बादरायणादिभिस्तन्न विचारणीयमिति तत्राह नच गतार्थमिति · गतो विचा
रपूर्वकं ज्ञातोऽर्थो यस्य वेदांतविचारशास्त्रस्य तत्तथा किं वेदांतगम्यमद्वयं ब्रह्म तच्च जैमिन्यादिभिर्नि
रूपितमित्युच्यते · किं वा कार्यमेव वेदांतानामप्यर्थः तच्च जैमिनिना निरवशेषं निरूपितमिति इदं शा
स्त्रं गतार्थमिति · न तावदाद्यः · तत्र तदप्रतीतेः · साध्यरूपधर्मन्यायेन सिद्धब्रह्मणो निर्णयाऽसं
भवाच्च · धर्मजिज्ञासासूत्रे धर्मस्यैव विचार्यत्वेन प्रतिज्ञातत्वाच्च · न चाथातः शब्दानुरोधेन धर्मत्वे
न वेदार्थमात्रं लक्ष्यतामिति वाच्यं · अन्यथा सिद्धार्थातः शब्दानुरोधेन विचार्यमाणतयाऽनन्यथा
सिद्धप्रधानाभिधायि धर्मशब्दस्य लक्षणायोगात् · अध्ययनविधिरिति कृत्स्नशाखाध्ययनं विधत्ते
न त्वेकदेशाध्ययनमात्रं अतोऽध्ययनविधिप्रयुक्त्या न कर्मकांडमात्राध्ययनं संभवति · एवं च वेदांताऽ

ध्ययनंयद्यपिनकर्मविचारोपयोगीतथाप्येकविधिप्रयुक्ततयातत्स्यावश्यकत्वेनतदध्ययनवतएवक
र्मविचारइतितदन्यथासिद्धं॰ एवमतःशब्दस्त्वचित्ताध्ययनदृष्टार्थत्वस्यापिवेदांताध्ययनेसमत्वा
दवतदर्थवत्त्वसिद्धेर्नतद्बलादपिधर्मशब्देलक्षणेनेतिनाह्ययब्रह्मविचारोगतार्थइतिभावः॥ नापिद्विती
यः॰ अग्निहोत्रादिकार्यस्योपासनाकार्यस्यवाभिन्नप्रकरणस्थत्वेब्रह्मनिष्ठवेदांतेभ्यस्तदप्रती त्वा०
तेश्च। नन्वात्मावाअरेद्रष्टव्यइत्यादिनाज्ञानंविधीयतइतिकार्यमेववेदांतार्थइतिचेन्नत्राहनहीति
विधेःपदंविषयःविधेयमितियावत्॰ यद्धिवाक्यार्थप्रमितिजन्यचिकीर्षाप्रयत्नाभ्यांनिष्पाद्यतेतद्वि
धेयंयथाग्निहोत्रादिःउपासनावा॰ नचात्मज्ञानंलौकिकंवातत्तथा।तिष्ठतोऽप्रयतमानस्यापिश्रोत्रादि
नप्रत्यक्षादिनावातदुत्पत्तेः॰ एतदेवकर्तंतंत्रंविधेयंज्ञानंचनतथेत्युच्यतइतिज्ञानंनविधेयमभि
प्रायेणाहनखल्विति॰ देवतोद्देशेनद्रव्यत्यागोयागस्तस्यपरस्वत्वापादनव्यापारोदानंयागएव
आसेचनाधिकोहोमइतिविभागः। किंचविधेयपदार्थज्ञानंविधिवाक्यार्थप्रतीतेःप्रागवक्तव्यं॰ नचपरमा

त्मज्ञानेनतत्संभवतीत्याह अपिचेति नूपितोज्ञातोगोचरोविषयोयस्यतस्यभावस्तत्ताज्ञातधात्वर्थगोचरता
वकृत्येतिशेषः ततः किंतत्राह नपरमात्मेति नूपणंज्ञानंप्रागितिशेषः तथाचपरमात्मज्ञानंकर्तव्यमिति
वाक्यार्थधीर्नसंभवतीतिभावः कुतस्तन्निरूपणमिति चेत् किमज्ञातेपरमात्मनि तज्ज्ञानंज्ञायतेतविदि
तेवानाद्यइत्याह अविदितइति घटनाविताफेक्ता नहि विशेषणीभूतंपरमात्मानमज्ञात्वापरमात्म
ज्ञानमितिज्ञातुंशक्यमित्यर्थः द्वितीयमाह विदितेति· ज्ञानविधिवाक्यार्थज्ञानात्प्रागितिशेषः
तर्हिज्ञानविधिर्व्यर्थः पुरुषार्थसाधनात्मज्ञानस्यप्रागेवसिद्धत्वादित्याह वृथेति· किंचात्मज्ञानेसत्य
विद्यातत्कार्यसकलनियोज्यविषयादिभेदनिवृत्तेस्तत्सापेक्षो नज्ञानविधिः नवातदनुष्ठानंसंभवती
त्याह निखिलेति· निदानस्यकारणस्याज्ञानस्यनिवृत्तिरित्यर्थः। नन्वात्मनिपरोक्षज्ञानेप्रथमं
जातेपितद्विशिष्टज्ञानंविधेयमितिचेत्· किंविशिष्टज्ञानंपरोक्षमपरोक्षंवा नाद्यः प्रथमज्ञानेनैवत
त्कृत्यसिद्धेस्तद्वैयर्थ्यात् विदितस्वार्थसंवेधत्वाद्यादिभ्यएवप्रथमज्ञानवत् द्वितीयज्ञानस्यापिपुंव्यापा

रंविनाप्युत्पत्तिसंभवेनविधिवैयर्थ्याच्च· नापिद्वितीयः किंकर्तव्यतयावगतंशाब्दज्ञानमेवविधिबलादप
रोक्षंभवति· किंवाततस्तदुत्पद्यतेनाद्यः तस्यशब्दादुत्पन्नत्वेनतवमतेतदयोगात्· अन्यथाप्रथममेवा
परोक्षज्ञानंकिंनस्यात्· नद्वितीयः तत्करणस्याऽसंभवात्· नह्यपरोक्षज्ञानकरणमिंद्रियमात्मन्य
स्तीति॥ नज्ञानविधिसंभवइत्युपसंहरतिइतीति· धर्मविशेषसमर्पणं· विधेयज्ञानमेवावांतरध
र्मः· तस्यचनिर्विषयस्यानुपपत्तेस्तदाकांक्षयात्मानंव्युत्पादयद्भिर्वेदांतवचनैर्विध्येकवाक्यतयाधर्म
विशेषसमर्पणंक्रियतइतियन्मतंतन्न· ततोपिपरमात्मविचारेधर्मविचारगतार्थतयाऽनवस
रोभवतीत्यर्थः॥ तथाचजैमिन्यादेःप्रागस्मदुक्तएवाशयइतिभावः॥ कथंतर्ह्यात्मावाऽरेद्रष्टव्यआ
त्मन्येवात्मानंपश्येदित्यादिविधिविभक्तीनांगतिरिति· तत्राह· अर्हेति· अर्हेकृत्यतृचश्चेविधि
निमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषुलिङ्· लोट्चेत्यादिपाणिनिस्मरणात्· विध्युत्पाद्यस्यद्रष्टव्यइ
त्यादौजैमिनीयन्यायाच्चतव्यप्रत्ययस्या देविध्यातिरिक्तार्थत्वंसिद्धंयस्मात्तस्मादुक्तवेदांतवाक्येप

श्रुतमपि लिङादि · अन्यथा · विधिमंतरेण · अर्हर्थितया योजनीयं · कुतः स्फुटं उदितनयात् · विध्यर्थासंभवेन
अत एतत् वेदांतविचारशास्त्रं धर्मविचारशास्त्रेणागतार्थं · अतस्तत्र भगवता ऽथातो ब्रह्मजिज्ञासेत्यारभ्य विचा
रितं भाष्यकारादिभिरपि तदाशयानुरोधेन तदर्थो वर्णित इति मयापि तदर्थाविष्करणाय यत्नः क्रियत इति० ननु
एवमप्यधिकार्यभावादिदं शास्त्रं नारंभणीयं · न तावत्स्वर्गादिकाममुद्दिश्यैतदारंभः अग्निहोत्रादिभिरेवत
न५ त्सिद्धेः। नापि निरतिशयविषयभोगार्थिनमुद्दिश्य · तस्याप्युपासनातः सिद्धेः। न च मुमुक्षुरत्राधिकारी · सकल
वैषयिकानंदभोगविलक्षणे मोक्षे कस्यापि कामना ऽदर्शनात् · अत एव ब्रह्मजिज्ञासुरत्राधिकारीति निरस्तं
ब्रह्मज्ञानस्यापुरुषार्थस्य कामनायोगान्निरतिशयाभिलषितस्वर्गादिविरोधित्वाच्च। न चा ऽविरक्तस्य स्व
र्गाद्यभिलाषेपि विरक्तस्य तदभावात् मुमुक्षा संभवतीति तदर्थं ब्रह्मजिज्ञासमानो ऽत्राधिकारीति वाच्यम् ·
स्वर्गादौ निरतिशयप्रीत्यास्पदे कस्यापि वैराग्या ऽसंभवात् · दुःखमिश्रितत्वात्ततोपि वैराग्यं युक्तमिति चेन्न
तादृशेपि तदधिकस्येष्टप्रवृत्तिदर्शनात् · दुःखपरिहारे चेयान्ति तत्त्वं न तु सुखमपि परित्याज्यं · न चान्यः क

श्चेदधिकारी संभवतीत्यधिकार्यभावान्नेदमारंभणीयमिति तत्राह॰ एकाहाहीनेति॰ अयमिह चिद्दिहसाप्र
तिलंभप्रकारः अनादिप्राग्भवेषु संसरज्जीवः कदाचित्तत्रतत्र विशिष्टवर्णाश्रमी भूत्वा यावज्जीवश्रुतिचो
दितानि नित्याग्निहोत्रादीनि सम्यगनुतिष्ठति॰ ततः कदाचिदीषदासादितपरमेश्वरप्रसादादग्निहोत्रादि
षु दृढश्रद्धो भवति॰ तत ईश्वरप्रसादादेवं चिंतयति॰ मदीयं मनः स्वर्गादिसुखतत्साधनान्येवाभिलषति न
तु मोक्षं तत्साधनं च ज्ञानं तेन चादृष्टमेव केवलं निमित्तमिति तदर्थं यतितव्यमिति विविदिषोद्देशेन तान्येव क
र्माण्यनुतिष्ठति॰ ततोऽतिविमलमानसस्तद्यथेहेत्यादिश्रुतिं यत्कृतकं तदनित्यमित्यादिन्यायं चानुसंधा
य ब्रह्मलोकपर्यंतं कर्मसाध्यफलमनित्यमिति निश्चिनोति॰ आत्मा च श्रुतिन्यायाभ्यां नित्यानंद इति च सोऽयं नि
त्यानित्यवस्तुविवेकस्ततस्तदर्थं सकलवैषयिकसुखभोगजिहासा पुनःपुनरस्योपावर्त्तते॰ नित्यसंभव
त्येनित्येकस्तुष्वीद्विति॰ तादृक्कर्मफलवैराग्यं पश्चाच्छांतिदांत्यादिसंपन्नो दृढतरमोक्षेच्छां करोति सेयं
साधनचतुष्टयसंपत्तिः॰ तत इष्यमाणमोक्षसाधनं चिदानंदस्वरूपात्मज्ञानमिच्छतीति नात्राधिकारी

दुर्लभस्तदिदमनेनश्लोकेनसूचितं· एकाहः एकसुत्याकः क्रतुः अहीनः द्व्यहप्रभृतिद्वादशसुत्यांतः
सत्रंद्विविधं एकमहः समुदायसाध्यं यथाद्वादशाहः द्वादशाहस्यचाहीनसत्रात्मत्वं· यजेतेत्युपयंती
त्युभयश्रुतिबलादवगतं किंचित्संवत्सरगणसाध्यं उपलक्षणमेतदग्निहोत्रादेः एतेषांयेविधयस्त
द्विहितानियान्यन्यानिकान्यग्निहोत्रप्रभृतीनिसहस्रसंवत्सरपर्यंतानिकर्माणितेषामनुभावोदुरितनि
वर्हणसामर्थ्यं तेनध्वस्तः स्वांतस्यांतःकरणस्योपरोधोविविदिषाप्रतिबंधोयेषां· तथाकथं मप्यनेक
जन्मव्यवधानेपिपुरुषाः साधनचतुष्टयसंपन्नाधिकारिणः। चिदिदृक्षा· अखंडचैतन्यात्मकप्रत्यग्
ब्रह्मसाक्षात्कारेच्छामित्यर्थः। नन्वग्निहोत्रादेः पुंदिदृक्षाप्रतिबंधकदुरितनिवर्तकत्वंकुतोवगतं येनत
त्स्वर्थमनुतिष्ठेयुः· नतावत्प्रत्यक्षादिनातदवगंतुंशक्यं· नाप्यग्निहोत्रादिवाक्येन। तत्रतद्वाचकप
दाभावात्· तत्राह· यज्ञेनेति· तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनेत्यादिवाक्यं· शतपथवि
हितमिति· शतपथग्रहणंविनियोजकवाक्येनविनियोज्यकर्मणः प्रत्यासत्तिज्ञापनार्थं· नन्वग्निहो

त्रादेः स्वर्गकामयावज्जीवादिवाक्येनतत्रतत्रविनियुक्तस्यकथंचिद्विविदिषायांविनियोगः।विनियुक्तवि
नियोगाविरोधात् तत्राह स्वोत्पत्तीति· स्वस्याग्निहोत्रादेर्यदुत्पत्त्याम्नानंकर्मस्वरूपमात्रबोधकंवाक्यं
तस्मिन्नित्यर्थः· अग्निहोत्रादिकंहि प्रथममग्निहोत्रंजुहोतीत्यादिवाक्येः फलविशेषशून्यमेवविधी
यते· पश्चाद्वाक्यांतरेणतदपेक्षितफलविशेषेणतस्यसंबंधः प्रतिपद्यते· एवंचतद्वद्विविदिषायामपि
तत्संबंधोनविरुध्यते· विनियोजकवाक्यानांतुल्यकल्पत्वात्· एवंचविषयसौदर्यज्ञानलभ्यायामि
च्छायांकर्मणः साक्षात्साधनत्वाऽसंभवेन सामर्थ्यात्प्रतिबंधकनिवृत्त्यावेदसाधनत्वंकल्प्यतइति
पुरुषः परमात्मा· मात्रशब्देनतस्यज्ञानादिपर्यंतव्यापारंवारयति· एवंचनाधिकार्यभावइतिभावः
एवंविषयप्रयोजनसंभवादगतार्थत्वाद्विशिष्टाधिकारिलाभाच्चशास्त्रमारंभणीयमित्युक्तं· इदा
नींगुरुशिष्यसंवादमुखेनशास्त्रंप्रवर्तयितुंजिज्ञासासूत्रोपात्ताऽथशब्दोपात्तविशिष्टाधिकारिण
स्तद्विज्ञानार्थंसद्गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियंब्रह्मनिष्ठमितिश्रुतिदृष्टइतिगुरूपसदनमाह

उपससादेति प्राप्तवानित्यर्थः विवेकादिचतुष्टयं ब्रह्मज्ञानसाधनं यस्य स चतुष्टयसाधनः निशिताऽतिसू
क्ष्मा ब्रह्मैकाकारता योग्या बुद्धिरंतःकरणं यस्य स तथा विहितैः सम्यगनुष्ठितैर्विविधाध्वरैः शुद्धिपरिक्ष
यान्निशितबुद्धिश्चतुष्टयसाधनो विविदिषुरिति संबंधः श्रोत्रियं ब्रह्मनिष्ठमिति श्रुतिदर्शितं गुरुविशेष
णमाह विदितवेद्यतममिति अवगतब्रह्मतत्त्वमित्यर्थः समित्पाणिरिति श्रुतिदर्शितमुपसदनप्रकारमा
ह विधिवदिति नतु मुमुक्षुर्गुरुमुपससादेत्युक्तमयुक्तं अननुभूतसुखविजातीये मोक्षकामनाऽयोगा
दत एव निखिलानर्थनिवृत्तिकामो मुमुक्षुरित्यपि न संभवति अनर्थनिवृत्तेः स्वतः पुरुषार्थशेषतयैव
काम्यमानतया तदभावेऽयोगादित्याशंक्य कैमुतिकन्यायेन प्रसक्ताधिकारिणो मुमुक्षां दर्शयितुं लोके
तदतिशयसुलभतामाह इहेति सर्व एव जंतुरिति जंतुमात्रे निरतिशयसुखादिकामनायां मानाभावे
न योग्यनराभिप्रायं उपरमंतु माभवंतु उपघातरूपं पुरुषार्थविरोधिरूपं नन्वेवमपि मुमुक्षायां किमा
गतमिति तत्राह निरतिशये ति लौकिकैरभिलप्यमाणनिरतिशयसुखवादे मोक्षत्वे फलितमाह उभय

मपीति॥ अस्य जनस्य एवं प्राणिमात्रस्य मुमुक्षासद्भावे॥ किमु वक्तव्यं निरस्तनिखिलचित्तमलस्य तीव्रवै
राग्यादिसंपन्नस्य तत्सद्भावे मोक्षरूपस्यैव तत्ताद्विषयसंबंधेन लौकिकैरिष्यमाणत्वान्न तल्लौकिकसु
खविलक्षणमिति भावः॥ ननु निरतिशयसुखादावज्ञाते कथं सर्वप्राणिनामभिलाषः ज्ञातगोचरत्वा
त्तस्येति चेत्तत्राह उभयमिति॥ निरतिशयसुखं निःशेषदुःखहानं चेत्यर्थः परात्मनः अहंकारविलक्ष
णस्य तत्साक्षिण इत्यर्थः॥ तादृशस्य सुखज्ञानार्थं साक्षिस्वरूपं विशिनष्टि स्वयंप्रकाशमिति॥ तत्र हेतु
त्वेनाह विमलेति॥ साक्षिस्वरूपस्याऽनावृततावैमल्यमुक्तं॥ तथा च स्वप्रकाशात्मस्वरूपत्वान्निरति
शयसुखस्यादेः सर्वेषां भानमविरुद्धमित्याह इति भवतीति॥ उदितनयात्॥ इह जगतीत्यादिनेति शेषः
नन्वनावृतसाक्षिस्वरूपसुखादेः कथं निरतिशयत्वं॥ लोके तथाऽननुभवात्॥ वस्तुतस्तथाविधमि
ति चेत्सत्यं तथाप्यज्ञानावृतप्रकाशे तज्ज्ञानं विना न कामना स्यादित्याशंक्याह कर्मकांडेति॥ कांडशब्दः
समूहवाची॥ नार्पिते॥ परमप्रेमास्पदत्वेनाहिते॥ मोक्षवस्तुनि॥ आनंदात्मनि॥ अस्य विशिष्टाधिकारिणः

प्रयोजकज्ञानमानंदाद्वयात्मप्रतिपादकवाक्यजन्यमापातज्ञानं तेन नुन्नं प्रेरितं तदभिमुखीकृतं मनो
यस्यात एव महात्मनः नित्याद्यनुष्ठानादतिविमलमानसस्य परमप्रेमास्पदत्वादिलिंगेन वेदांतवाक्येन
चापाततोवगतानंदाद्यात्मनि प्रेप्साकथं न भवेदित्याशयः ननु यदि प्रथममेवाधिकारिणः श्रुतिन्यायाभ्या
मानंदाद्यात्मकं वस्तु परिज्ञातं कृतं तस्य गुरूपसदनादिनेत्याशंक्य स्वयमुत्पादितज्ञानस्याप्यन्यथाल
क्षणकाकलंकसंभवादाचार्यवान्पुरुषो वेदेत्यादिशास्त्राच्चाचार्यमुखेनैव ब्रह्मनिर्णेतव्यमिति सदृष्टांतमाह
धर्मनिर्णये यथेति · मानवे · मनुस्मृतौ शास्त्रे · चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा · सा ब्रूते यं स धर्मः स्यादे
को वाध्यात्मवित्तम इति मनुना धर्मनिर्णयो वेदवित्परिषत्साध्य इत्युच्यते तद्वदात्मज्ञानस्यापि गुरूपदेश
साध्यत्वात्तदर्थमस्य गुरूपसदनं युक्तमित्याशयेनाह तद्वदत्रेति · संगतिः ब्रह्मनिर्णयसाधनमिति शेषः
फलितमाह तेनेति · ननु मीमांसायां षष्ठाध्याये वेदार्थाधिकारी निरूपित इति किमत्राथशब्देनाधिकारिनिरू
पकेन । न च शास्त्रांतरत्वान्न पुनरुक्तिदोष इति वाच्यं · तथापि कृतकरणानर्थक्यात् · अन्यथा वेदार्थवत्त्वादेर

प्यत्र निरूपणं स्यादिति तत्राह यः कर्मकांडेति मीमांसाशास्त्र इति शेषः कर्मसमूहमुद्दिरूपेतिवार्थः ॥ अभिहि
तः षष्ठाध्याये निरूपित इत्यर्थः ॥ प्रवृत्तिषु निवृत्तिषु तुल्यत्वपइति · अग्निहोत्रादौ प्रवर्तमानस्यापि कलंजभक्ष
णादि निवृत्तिलंघने तन्निवृत्तिशास्त्रस्याप्यग्निहोत्राद्यनुष्ठानलंघने प्रवृत्तितोल्यात् · अयं प्रवृत्त्यादितुल्यइ
त्यर्थः प्रस्तुताधिकारिणस्ततो विशेषमाह अत्रैवेति · अस्मिन्शास्त्रे अथशब्देन सूचितमप्यधिकारिविशेष
णं तात्तशयन्यायेनैव स्थिरं भवतीत्यभिधोक्षितेत्यन्तं · वेदांतशास्त्रे हि सकलसाधनचतुष्टयसंपन्नेन स
कलकर्मत्यागिना ब्रह्मविचार्यमिति निरूपितइति · ततोस्य विशेषः न चायं षाष्ठन्यायेन सिध्यतीति नवै
यर्थ्यं · आर्थवत्वादिकं तु वेदस्य न ततो न्यायांतरमपेक्षत इति नात्र तन्निरूपणमिति भावः ॥ नन्वस्या
पि श्रवणादि प्रवृत्तेर्निवृत्तेश्चाग्निहोत्रादेः सत्वादयमपि प्रवृत्तिनिवृत्तिसाधारण एवेत्याशंक्याह शा
स्त्रमिति · प्रवृत्तिषु निवृत्तिषु साधारणस्य पुरुषस्य तुल्यं समबलं शास्त्रं विधिनिषेधशास्त्रमिति · पूर्व
पूर्वतंत्रे अभिधायि जैमिनिनेति शेषः · अस्य ज्ञानाधिकारिणः सन्यासिनः सर्वश्रवणादिशास्त्रं निवृत्ति ४६

विषयमित्युच्यते बादरायणादिभिरिति संबंधः ४ अग्निहोत्रादिशास्त्रं हि तदधिकारिणस्तदर्थकर्त्तव्यता
मेव प्रतिपादयति न तु तदितरव्यापारं परिसंचष्टे स्वार्थबाधकाभावादिति स उभयसाधारणः अतस्तच्छा
स्त्रद्वयमपि तं प्रति समबलमेव जैमिनिनाविचारितं · बादरायणस्तु शांतो दांत उपरतास्तितिक्षुः श्रद्धा
न्वितो भूत्वात्मन्येवात्मानं पश्येदिति शास्त्रानुसारेण शांतोदांतेन सकलकर्मत्यागं निष्प्पसंन्यासिनैव ब्र
ह्मविचार्यमित्याह तत्र यदि श्रवणादिशास्त्रमस्य प्रवृत्तिकाममप्युपादिशेत तर्हि सकलकर्मसंन्यासशा
स्त्रं बाध्येतेति श्रवणादिशास्त्रमपि निवृत्तिविषयमेवेत्यधिकारिद्वयं परस्परविलक्षणमित्यर्थः · एवं धर्म
मीमांसाशास्त्रस्य प्रवृत्तिनिवृत्तिसाधारणाधिकारिविषयत्वं · ब्रह्ममीमांसायास्तु निवृत्तिमात्रनिष्ठपु
रुषविषयत्व[illegible]मित्युक्तं · एतच्च मीमांसकानामपि संमतमित्याह शास्त्रेति असन्निकृष्टार्थप्रतिपा
दकं वचनं शास्त्रं तद्द्वैविध्यस्य दृष्टेहेतोरधिकारस्य द्विविधं भेदमप्याश्रयंते · तस्याधिकारस्य द्वैविध्योप
लब्धेः पुरुषं तद्विशिष्टमधिकृतमधिकारिणं शास्त्रयोः शास्त्रार्थयोः उक्तमर्थं विपक्षबाधकमुखेन द्व

ढयति शास्त्रार्थे इति मीमांसका एवमाहुः असन्निकृष्टार्थवचनं शास्त्रं तद्भेदे च तदर्थे विभिद्यते भिन्नासन्नि
कृष्टार्थं विना तद्योगात् तदर्थभेदे च तदनुष्ठाननिमित्तमधिकारोऽपि भिद्यते अन्यथा चित्राकारीर्यादेर
पि स्वर्गकामाद्यधिकारसंबंधप्रसंगात् ततश्च तादृशविशिष्टोऽधिकार्यपि शास्त्रभेदे भिद्यते ऽन्यथा शास्त्र
भेदो न स्यादिति तद्वदिहापि प्रवृत्तिनिवृत्तिविषयतया केवलनिवृत्तिविषयतया च भिन्नयोः ब्रह्मधर्म
मीमांसयोस्तदर्थाधिकारिभेदेन भवितव्यमिति भावः नु सर्वनिवृत्तिविषयं श्रवणादीत्युक्तमयुक्त
ज्ञानाधिकारिणोऽप्यहिंसादिनियमवत् शौचादेर्नियमस्यापि संन्यासिन उपदेशात् तत्राह यमनियमेति
यमनियमयोर्विधानैर्विधायकवाक्यैरित्यर्थः अत्र त्रयग्रहणं दृष्टान्तार्थमुक्तं शौचे यमनियमविधानैरि ता॰
तिसंबंधः प्रवृत्तिः शौचादिरूपा यमशास्त्रवन्नियमशास्त्रस्यापि निवृत्तिपरत्वमेव न प्रवृत्तिपरत्वमि
त्यर्थः। तत्र हेतुमाह यदीति अस्य ज्ञानाधिकारिणः कर्मणोऽङ्कनिविहितनिवृत्तेरिति संबंधः। कदर्थनं
कदर्थनापीडेति यावत् यदहरेव विरजेत्तदहरेव प्रव्रजेदिति श्रुतिर्जिज्ञासार्थिनः सकलकर्मत्यागं विधत्ते

नचयावज्जीवादिवाक्यानुसारेणकाम्यकर्मन्यासमात्रंप्रव्रज्याश्रुत्यर्थइतिवाच्यं· यज्ञोपवीतादेर
पितत्त्यागविधानात् सन्यासिनोकर्मविधायकवाक्येमुंडोऽपरिग्रह इतिशिखादिनियमेशोहित्यद
र्शनात्प्रतिप्रसवन्यायेनापियज्ञोपवीतादेरनंगीकारात्· तस्माद्यदहरेवविरजेदितिवैराग्यस्यतदधि
कारस्यश्रवणाद्विरक्तमुमुक्षुविषयंसन्यासशास्त्रं· यावज्जीवादिशास्त्रंतुनतत्समानविषयमपि
त्वविरक्तविषयमेव· अतःसंकोचकाभावात्सन्यासशास्त्रंसकलकर्मनिवृत्तिंविधत्ते· तदस्यहोमादिश
स्त्रस्याभ्युपगमेबाधितंस्यात्· नचहोमाद्यनेकविधिवल्लानादृष्टमितिवाच्यं· होमादिशास्त्रस्यसंन्यास
शास्त्रवद्विरक्तमुमुक्षुमात्रविषयत्वाभावेनसामान्यविषयस्यततोदुर्बलत्वादितिनकापिज्ञानाधिका
रिणोविधितःप्रवृत्तिरितिभावः नन्वेवंश्रवणादौकथंमुमुक्षोर्ब्रह्म जिज्ञासोःप्रवृत्तिःतत्प्रापकाभावा
त्· नचान्वयव्यतिरेकाभ्यांश्रवणादेर्ज्ञानसाधनत्वावगमात्स्वतएवमुमुक्षोस्तत्रप्रवृत्तिरितिवाच्यं
नियमेनतत्रप्रवृत्त्ययोगात्· अन्यतोप्यभिलषितज्ञानसाधनसंभवात् कथंवातच्छास्त्रस्यनिवृत्ति

निष्ठत्वमिति तत्राह औदासीन्येति औदासीन्यं प्रवृत्त्यभावः तस्य विशेषणं अनात्मश्रवणादिरूपप्रवृत्ति
विशेषाभाववमित्यर्थः। शास्ति उपदिशति अमुना ज्ञानार्थमुपदिष्टौदासीन्यविशेषणव्याप्तिः आ
त्मश्रवणादिप्रवृत्तिः अर्थादाक्षिप्यत इति संबंधः अनुपपत्तिमेवाह तांतामिति श्रवणमननादिरूपामि
त्यर्थः। सा सा शास्त्रार्थधीः अनात्मश्रवणमननादिनिवृत्तिरूपौदासीन्यात्मकं श्रोतव्यादिशास्त्रार्थ
धीर्न घटत इति यत इत्यर्थः आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्य इत्यादिशास्त्रेणात्मज्ञानान्वयव्य
तिरेकसिद्धतयोक्तबाधकबलेन च श्रवणादिव्यापारविधानासंभवेनात्मज्ञानविरोध्यनात्मश्रवणाद्य
भावरूपमौदासीन्यं विधीयते सेयं परिसंख्या अनात्मव्यापारवर्जनमंतरेणानंतशोऽनुष्ठितश्रवणा
दिनाप्यद्वयात्मज्ञानासंभवात् तस्मिंश्च विहिते चेतसो निर्व्यापारत्वासंभवेन तावताप्यभिमतज्ञा
नासिद्धेश्चान्वयव्यतिरेकाद्यवधृतज्ञानसाधनभावश्रवणादिप्रवृत्तिराक्षिप्यत इति भावः अर्थांत
रनिषेधसामर्थ्यात् अर्थांतरसिद्धौ दृष्टांतमाह लशुनादीति लशुनं न भक्षयेत् कलंजं भक्षयेदित्या

४८

स्यादिनिषेधेनतत्तद्भक्षणगतेष्टसाधनत्वाभावरूपोदासीन्यबोधाद्यथातद्भक्षणादिज्ञापकरागादि
निवर्त्यतेतेतद्वदित्यर्थः दृष्टांतंविशदयति औदासीन्यइति॰ भक्षणादिगतधात्वर्थगतेष्टसाधनत्वा
भावइत्यर्थः। शास्त्रैरिति: लशुनादिभक्षणनिषेधशास्त्रैः अस्मान्निषेधशास्त्रार्थादौदासीन्यात्तुप्रच्यु
तस्याभक्ष्यस्यभक्षणादौप्रवृत्तस्येतियावत्॰ अनर्थेनिरकपातोऽस्तीत्यर्थादालोच्येतिसंबंधः लशुनंन
भक्षयेदित्यादिनिषेधवाक्येनतद्भक्षणस्यबलवदनिष्टाननुबंधीष्टसाधनसाधनत्वंनिषिध्यते॰ तस्ये
वलिङादिप्रतिपाद्यत्वात् तत्रलशुनादिभक्षणस्यप्रत्यक्षप्रमितेष्टसाधनतयातद्विरहप्रयुक्तवर्णि
तविशेषणाभावानुपपत्तेर्बलवदनिष्टाननुबंधित्वरूपविशेषणाभावादेवसवाच्यइतिनरकसाधनत्वं
तस्यनिश्चीयतेतदिदमुक्तमर्थादालोच्येति॰ एवंतस्यानर्थहेतुत्वनिश्चयवान्भक्षणादिप्रवृत्तेःप्रा
पकस्यवक्ष्यमाणरागादेःप्राबल्यरूपेर्थप्रातिलोम्यंविधत्तेयथापुनस्तद्भक्षणादावुत्कटरागोनभवति
तथास्वयंयत्नंकुरुतइत्यर्थः। एवंचयेथालशुनादिभक्षणेप्रवर्तकरागोत्कटत्वनिवृत्तयेश्रुतिमंतरेण

स्वयमेवप्रवर्त्तते· एवमत्रापीति दृष्टांतं दार्ष्टांतिकं विशदयति औदासीन्यमिति· अनात्मविचारादेर्मो
क्षसाधनत्वाभावमित्यर्थः एतच्छास्त्रं श्रोतव्यो मंतव्य इत्यादि नित्यं आत्यंतिकं· पथ्यं इष्टं· ज्ञानद्वारा
मोक्षसाधनमितियावत्· तथा च श्रुतिः अन्यावाचोविमुंचथेति अस्य मुमुक्षोस्ततः किं तत्राह पथ्यादि
ति· अस्य पथ्यं· संसाररूपोनर्थ इति बुध्वेति संबंधः· अपथ्यप्रातिलोम्येन तत· यथा पथ्ये न भवति
तथा पूर्वोक्तविधयात्मश्रवणादौ यतेत तेत्यर्थः· पाठांतरे त्वपथ्यं बुध्वेति संबंधः एवं कांडद्वयस्याधिका
रिभेदमुपपाद्योपसंहरति कृत्नेति कृतेत्यर्थः· प्रवर्तकशास्त्रसिध्ये· विधिनिषेधशास्त्रार्थानुष्ठान
सिद्ध्ये· षष्ठ पूर्वमीमांसायामिति शेषः· प्रवृत्तिनिवृत्त्यधिकारिचिंता· स्वर्गकामाधिकरणादौ कलं
जभक्षणादौ च प्रवृत्तिनिवृत्त्यधिकारिचिंतावृत्तेति संबंधः एवं चात्रास्मिन् शास्त्रे त्वेकमेवेति संबंधः
एवं चात्राधिकारिचिंतायां न पुनरुक्तिरिति भावः· इदानीं सिंहावलोकनन्यायेन प्रच्युतेः प्रापकस्य
स्फुटं प्रापकमेव विशदयति· औदासीन्यप्रच्युतेरिति· रागद्वेषौ धात्वर्थस्य इष्ट साधनताज्ञा

नाद्भुलवर्थगोचरेच्छारागः ऽअनिष्टसाधनताज्ञानात्तत्र द्वेषः लौकिकभोजनादौ वैदिकाग्निहोत्रादौ चा
विशेषेणरागएवप्रवर्तकः नतुवेदप्रवर्त्तनातो लिङादिव्यापारात्प्रवृत्तिः प्रमाणस्येष्टसाधनत्वादिप्रमे
यबोधनव्यापारं विना व्यापारांतराभावादित्याशयेनाह नापर इति· एवं प्रवर्तकनिवर्तकौ रागद्वेषाविस्तु
कालञ्जनभक्षणादौ रागिणस्तन्निवृत्त्यर्थं प्रवृत्तिप्रकारामित्यालोच्य पृच्छते ऽप्रापकस्येति प्रागुक्तं
स्मारयति रागद्वेषेति प्रातिलोम्ये प्रातिलोमे शास्त्रादनिष्टसाधनतानुसंधाने प्रवृत्तिः स्यादिति दोषः· एवं
मुमुक्षोर्निवृत्तिमात्रेधिकार इति बादरायणस्य तच्छ्रुत्पादनमर्थवदित्युक्तं· नन्वेवं सति मुमुक्षोः कथं
शौचादिसिद्धिरित्यत आह अशुचौ इति· प्रतिषेधशास्त्रात् इति द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः।
स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचिं द्विजः इति स्मृत्या वेदानुशीलिनो ऽशुचित्वप्रतिषेधादशुचौ चे
वेदचिंतनं न संभवत्येव· तेन विना च प्रागुक्तन्यायेन वेदांतश्रवणादिर्न स्यात् नहि वेदवाक्यमननुसंद
धतो वेदांतवाक्यविचारार्थितं वाक्यमितीतरा निवृत्तिपरश्रवणादिशास्त्रसामर्थ्यादेवशौचादिविधिमं

तरेणापि तदस्य सिध्यतीति ॰ नन्वेवमपि यतीनां तु चतुर्गुणं ॰ चातुर्वर्ण्यं चरेद्भैक्षमित्यादिशास्त्रसिद्धशौ
चाद्याश्रितचातुर्वर्ण्यादिनियमः कथं सिद्ध्येत् तत्राह ॰ अचतुर्गुणेति तेनापि हि शास्त्रेण सकलनिवृत्तिवि
धायिशास्त्रानुसारेण चातुर्गुण्यादिनिवारणादर्थाच्छौच चातुर्गुण्याशन चातुर्वर्ण्यादि सिध्यतीति न का
प्यनुपपत्तिरिति भावः ४ एवं सकलसंन्यासविधायकशास्त्रबलान्मुमुक्षोरात्मश्रवणादिशास्त्रमपि तदि
तरपरिवर्जनपरमेव नास्य प्रवृत्तिविधायकं किंचिदपि शास्त्रमस्तीत्यपपादितमुपसंहरति इतीति
अनेन प्रकारेणेत्यर्थः ॰ ईदृशमापाततः प्रवृत्तिविधायितया प्रतीयमानं श्रवणस्नानादिशास्त्रं ॰
अस्य पक्षस्य महद्भिरादृतत्वाच्चनलपाचादरशैथिल्यं कार्यमित्याशयेनाह सादरमिति ॰ अस्मि
न्नधिकारवर्त्मनि कथितन्यायवशेन विधिहीन निवृत्तिशास्त्रमस्तच्छास्त्रबलादीदृशं सर्वसा
दरमिति अनेन प्रकारेणयोजयेदिति संबंधः ॰ उक्तमन्नूद्य तत्र प्रतिपक्षं पक्षान्तरमस्तीति ॰ इति केचनेति
ज्ञानाधिकारिणः केवलं निवृत्तावेवाधिकारं केचन वर्णयन्तीति ॰ अन्ये केचन तद्विपरीतं ॰ ततो निष्ठान्तिमा

त्रे निष्ठायाः विपरीतप्रवृत्तिमपि वदंतीत्यर्थः ननु सकलकर्मनिवृत्तिविधायिनि शास्त्रे सति कथं तद्वि
परीतपक्षोत्थानमित्याशंक्याह प्रविभज्येति तद्विपरीतं प्रविभज्योदीर्यते मयेति शेषः· ननु श्रुतिविरु
द्धत्वात्तदपेक्षैव न्याय्येति तत्राह निपुणाचार्येति· तथा च तदुपेक्षा न भवतीत्यर्थः निपुणेति पूर्वस्मा
दस्यापि शेषं द्योतयति· तदग्रे व्यक्तीभविष्यति· नन्वेवं सति सकलत्यागश्रुतेः का गतिरित्याशंक्य ततः सामा
न्यतः सकलनिवृत्तिसिद्धावपि ज्ञानाधिकारिणो विशिष्य श्रवणादिरूपा प्रवृत्तिरपि प्रतिप्रसववत्पातश्र
वणादिशास्त्रात्सिध्यतीति भवति तस्योभयनिष्ठत्वमित्यभिप्रेत्याह उत्सर्गतस्त्विति· सामान्यत इत्यर्थः निवृ
त्तिनिष्ठा निवृत्त्यधिकारः· अस्य मुमुक्षोर्ज्ञानाधिकारिणो यद्यपि तथाप्यस्तीत्यथवा हृत्यसंबंधः· तथाप्प्र
त्तिप्रवृत्तिरिति यदुक्तं तदाह प्रतिप्रसववद्धि शास्त्रमुखात्सामान्यतः परित्यक्तस्यापि विशेषरूपेण विधा
यिशास्त्रबलात्· ये श्रवणादिरूपा शौचादिरूपा च· प्रवृत्तिरात्मबुद्धिपरिपाकफला· आत्मसाक्षा
त्कारस्य साक्षाद्वा परंपरया वा निष्प्रयत्नप्रयोजिका· ननु संन्यासशास्त्रानुरोधेन श्रवणादिशास्त्रस्या

स्यापि पूर्वोक्ति निवृत्तिमात्रपरत्वेनास्यैकनिष्ठायां संभवत्वां किमुभयनिष्ठाभ्युपगमेनेत्याशंक्याश्रव
णादिशास्त्रस्येतरनिवृत्तिपरत्वे स्वार्थस्यागोऽन्यथाकल्पना आप्तवाधश्चे तिदोषत्रयापत्तेर्निय
मपक्षएवाश्रयणीय इतिज्ञानाधिकारिणोप्युभयनिष्ठत्वं· अन्यथा यमनियमादिविभागप्रसिद्धिरपिन
स्यादित्याह यमस्वरूपेति· स्मृतिसिद्धयमसंज्ञितेत्यर्थः निवृत्तिः सर्वप्रकारप्राणिपीडाऽनृतवचना
दिनिवृत्तिः प्रवृत्तिः शौचादिरूपेत्यर्थः। यमनियमयोः संक्षिप्यस्वरूपमाह निवर्तकादीति· अत्रतयो
र्मध्ये हिंसादिनिवर्तकशास्त्रप्रतिपाद्यो यमः· शौचादिप्रतिपादकशास्त्रप्रतिपाद्यो नियम इत्यर्थः
अधिकारिनिरूपणप्रस्तावे मुक्तियोग्यतत्स्वरूपेषागदंकाराद्यध्यस्तत्वनिरूपणेप्यार्थसिद्धं ब्रह्मवा
दमित्यादिशास्त्रसंमतं साक्षाद्दर्शयितुं· अथवा· यमस्वरूपासकलानिवृत्तिरितिकथं· असंमत
योब्रह्मस्वरूपस्येतरासंसृष्टत्वेन अपं चोपशम इत्यादिश्रुत्या प्रपंचनिवृत्तात्मतया च अभिमतस्य
निवृत्तिरूपत्वात्· नचसा ध्यरूपासाधनात्मकयमात्मिके त्यागाक्या निवृत्तिविधायकशास्त्र

सिद्धेवसायमात्मिकां निवृत्तिमात्रमिति वक्तुं तां विभजते निवृत्तिरस्तीति · द्वैविध्यमेवाह · वहिःस्थिते
त्यादिना · आत्मबाह्यशरीराद्याश्रितेत्यर्थः । तत्र हेतुमाह · शारीरेति · अभ्यंतरवस्तुसंश्रया · वहिःस्थिते
त्यादिना · सर्वांतरवस्त्वात्मिका · तत्सिद्धय आह · सदात्मेति · अस्त्वेव · प्रसक्ते किं मायातामिति · अभिधित्सि
तसिद्ध्येतयोरवांतरविशेषमाह · तयोस्त्विति · विधिशास्त्रलभ्या हिंसादिनिषेधविधिलभ्येत्यर्थः ।
तत्र हेतुः · प्रयत्ननिर्वर्त्यतयेति · नहिंस्यादित्यादिनिषेधविधेरहिंसां कुर्यादित्यर्थप्रतीतेः सा तथेत्य
र्थः · एतच्च परसिद्धांतमाश्रित्योक्तं · स्वमते हिंसादिगतश्रेयः साधनत्वाभावस्यैव तदर्थत्वादिति ·
उत्तरा तु नैवमित्याह · विधानेति · तस्या यत्नसाध्यत्वे चेति स्वरूपेति हेतुगर्भं विशेषणं · बाह्यांतरनि
वृत्त्योः साध्यासाध्यत्वे हेत्वंतरमेवाह मायामयीति तथा चानिर्वचनीयायास्तस्याः साध्यत्वं संभवती
त्यर्थः · परमार्थसत्येति · तथा च तस्या न प्रागसत्त्वमिति न साध्यत्वमित्यर्थः · ततोपि किं तत्राह तयो
रिति · बाह्याभ्यंतरयोरित्यर्थः · बाह्याया एव कृतिसाध्यत्वसंभवात् · हिंसादिनिषेधशास्त्रं · हिंसा

दौरासीन्यानुकूलांतरक्रियात्मिकांतामेवविधत्ते· एवंचविधेयात्मकयमोपिसेवेतिभावः· ननुयदिनिषेध
शास्त्रमपिनिवृत्तिक्रियांविधत्तेतर्हिसर्वमेवविधिशास्त्रमितिविधिनिषेधवि भागोनसिद्ध्येदित्याशंक्या
ह प्रवृत्तीति· प्रवृत्तिनिवृत्तिरूपविधेयवैलक्षण्यात्तद्विभागसिद्धिरित्याशयेनाह निवृत्तीति· निवृत्यनुष्ठा
नेनिर्बंध नकारणंतस्यभावस्तत्त्वंतनइत्यर्थः· इदंयमविषये· एतदुक्तंभवति· नज्ञानाधिकारीमुमु
क्षुर्निवृत्तिमात्रनिष्ठस्तथासतिश्रवणादिशास्त्रेविशेषपरिसंख्याप्रसंगात्· किंतुश्रवणादिरूपप्र
वृत्तिनिष्ठोपिश्रवणादेरात्मज्ञानेसाधनत्वंयद्यप्यन्यतःसिद्धं· तथापिनिषधनिवृत्तिसाधनतयासिद्धावेहन
नइवात्रापिनियमविधिसंभवात्· नियमापूर्वस्यज्ञानप्रतिबंधकनिवृत्त्याऽर्थवत्त्वोपपत्तेरिति।२३। ननुय
दिज्ञानाधिकारिणोप्युभयत्राधिकारस्तर्हि षष्ठाध्यायनिरूपिताधिकारिणोनास्यविशेषइतिकिंभगव
तःपृथक्तत्कृत्याद नेनेत्याशंक्याऽस्यस्येतनोमहान्विशेषः इत्याहशास्त्रद्वयेनेति· पूर्वकांडप्रदर्शिति
नविविदिषार्थमनुष्ठितेनयज्ञादिनाहिंसादिनाचशुद्धांतःकरणेवेदांतोक्तविवेकवैराग्यशमदमलक्षण

साधनेन हेतुना मुमुक्षुः पुरुषः साध्यस्यतत्वसाक्षात्कारस्यस्पृहयापरवशः प्रवृत्तिपर्यंतज्ञानेच्छयाप्रे
र्यमाणोयोगुरुं शुश्रूषते · चोवधारणे · सर्ववेदांतवाक्यविषयश्रवणाधिकार्यत्र जिज्ञासासूत्रेथेत्युदि
तइतिसंबंधः · एवंच साधनचतुष्टयसंपन्नस्यात्र ब्रह्मजिज्ञासोर्गुरुं शुश्रूषमाणस्यवेदांतश्रवणाधि
कारिणोऽविवेकविरक्ताशांतोमुमुक्षुनिष्ठोनिगुरुकुलवासात्कर्माधिकारिणोऽतिस्फुटमेववैलक्ष
ण्यं न्यायांतरसाध्यमस्तीतिनात्रतद्धेतुत्वादनन्यथमितिभावः । एवमुपससादचतुष्टयसाधनइत्यादिना
प्रसक्ताधिकारिनिरूपणंसमाप्यइदानींसुगुरुकृपयाज्ञप्तिकमकरोदितिजिज्ञासायामाह सपरिपृच्छ
तीति · उक्तोधिकारीइतिसंशयसंकुलमानसोगुरुकृपेसम्पृच्छतीतिसंबंधः · संशयप्रकारंदर्शयन्न
र्थात्प्रश्नप्रकारमप्याह कोहमित्यादिना · अहमनुभवेप्रकाशमानआत्मा मम स्वरूपं · अहमनुभवस्य
देहेंद्रियादिसंघेजायमानः किमालंबनइतिनज्ञायतइति कोहमिति त्वंपदार्थप्रश्नः । स्वस्वरूपस्याभ्य
र्हितत्वात्प्रथमंजिज्ञासेतिद्रष्टव्यं · तत्पदार्थप्रश्नमाह · असौचकइति · तत्वमसिवाक्येयस्तत्पदार्थस्

सोचकः तत्तेजोसृजतेत्यादिना जगत्कर्तृत्वादिप्रपंचवत्तया निर्दिष्ट एव सः किं वा सदेव सोम्येदमग्रआसी
देकमेवाद्वितीयमिति श्रुतिप्रसिद्धं समस्तभेदशून्यं सदेवेति वाक्यार्थं प्रश्नमाह सहजमित्यादिना· स्वाभा
विकमित्यर्थः अस्य जीवस्य तस्य तत्पदार्थस्य· ब्रह्मणः पृथक्· पृथक्त्वं· तयोरीश्वरजीवयोरिति संबंधः द्वा
सुपर्णेत्यादौ जीवेश्वरयोर्भेदश्रवणात्तत्त्वमसीत्यादौ चाभेदश्रवणाद्वाक्यद्वयस्य विशेषानवगमात्संश
यः इदानीमेतादृशमेव शिष्यमुपलभ्य गुरुणा ब्रह्मद्वयमुपदेष्टव्यमिति शिक्षयन् गुरुरुपदिशतीत्या
ह तीर्थेनेति· पावनेन विविदिषार्थमनुष्ठितयज्ञादिना गंगास्नानादिना वात्मानं विविदिषंतमिति संबंधः
तीर्थेन गुरुणा वा वेदितुमिच्छंतं तमि[illegible]त्यर्थः· आत्मविविदिषुरपि कश्चिद्धन्यां देवतामुपास्ते स न गु
रुणोपदेष्टव्य इत्यभिप्रेत्याह ऽनन्यभक्तमिति· प्रत्यगेकप्रवणचित्तमित्यर्थः। एवंभूतोपि कश्चित्सांसा
रिकभोगपरित्यागातुरचित्तो भवतीति तं व्यावर्तयति· संसारेति· नन्वेवंविधोऽधिकारी जगति दुर्ल
भः। सत्यं· तथापि कश्चित्संभवति· उक्तं हि भगवता· मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धय इत्या

श्रयेनाह एकमिति एकजीवाभिप्रायं वा गुरोः शिष्योपदेशव्यापारे निमित्तमाह दयाविधेय इति · त
थाच न शिष्याननुबध्नीयादिति निषेधोऽत्र न प्रवर्तत इति भावः। इदानीं गुरोः शिष्योपदेशप्रकारं शि
क्षयंस्तदुपदेशमाह वक्ष्यामीति अनुद्विग्नमनाः सन्नुपदेशार्थमवगच्छ त्विति · वत्सेति पुत्रवत्संबोधनं
सदेव सोम्येति लिंगात् शरणागतस्य शिष्यस्य वांछितमप्यनर्थकरं चेद्गुरुणा कथं तदुपदेष्टव्यमि
त्याशंक्य वांछितं विशिनष्टि अत्यवस्थमिति · अवस्थात्रयातीतं [illegible] तुरीयमिति यावत् · तथा च
प्रपंचोपशमः शिव इति श्रुत्या निष्प्रपंचस्य स्वरूपलप्रतिपादनान्नोक्तदूषणमित्याशयेना
ह अत्यंतमिति वक्ष्यमाणार्थस्यातिसूक्ष्मतया शिष्यस्य तत्र चेतःप्रणिधानार्थमाह शृणुत
न्मनस्का इति · न किंतु श्रोतव्यमित्यपेक्षायां प्रश्नक्रमेणोत्तरमाह त्वमित्यादिना · त्वं न देहो न चे
न्द्रियमनःप्राणाहंकाराः तेषां सावयवतया कार्यत्वादिना शित्या स्वघटादिवदनात्मत्वादात्मन
स्वरूतनाशादिपरिहाराय नादित्वात्तेषां जडतया तदतिरिक्तसाक्षिभास्यत्वाच्चानात्मत्वं ·

साक्षी च स्वप्रकाशचैतन्यात्मा नान्यमपेक्षते॰ स च निर्द्धर्मक एव॰ साक्ष्यस्य रूपादिवदतद्धर्मत्वादि-
त्याशयेनाह प्रत्यग्व्यवहितमिति॰ जडानृतादिस्वभाव देहादिप्रतीपमंचति प्रकाशत इति स्वप्रका-
शचैतन्यमत एवाव्यवहितं नित्यापरोक्षमित्यर्थः॰ तत्र सर्वानुभव एव प्रमाणमित्याह॰ स्वप्रसिद्धमि-
ति॰ अन्यथा जगदांध्यप्रसंग इति भावः॰ द्वितीयस्योत्तरमाह ब्रह्मेति वृहदित्यर्थः। तत्किमाकारं से-
हत्वं नेत्याह अद्वितीयमिति॰ सजातीयादित्रिविधभेदशून्यं सन्मात्रमित्यर्थः॰ तत्र प्रमाणमाह उ-
दितं चेति॰ सदेवेत्युपक्रम्यैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मेत्यंतेन ग्रंथेन दर्शितमित्यर्थः॰ तृती-
यस्योत्तरमाह तदस्यस्वजमिति॰ अद्वैतब्रह्मोपासनया जीवस्य ब्रह्मभावो भवतीति केचित्तान्प्रत्या-
ह तदसीति॰ तद्विवरणमजस्त्वमिति साध्यत्वे तस्यानित्यत्वापत्तिः चकारदर्शितस्तत्त्वमसीति श्रु-
तिविरोधः॰ तत्रासीति ब्रह्मभावस्य वर्तमानताश्रवणात्॰ अतस्त्वं साक्षिचैतन्यात्मा सदाद्वयं सदा-
त्मकं ब्रह्मैव न तु ततो भिन्नोसीति॰ एवं संक्षेपेण शिष्यप्रश्नानामुत्तरमभिहितं इदानीं तत्र शिष्यस्यो

घ

गीकारांभावैर्वलिंगेनवाक्यात् दृढतरानुभवो नोत्पन्न इतिस्वयमेवद्वितीयवाक्यात्तदनुभवप्रतिवंधा
पनयनार्थंप्रयतते · अन्यथावक्ष्यामीत्यादिस्वप्रतिज्ञासिद्धेस्तत्रापिवाक्यार्थस्यपुरुषार्थत्वाद्व्यव
धानेनोपस्थितत्वाच्चतद्विरोधमेवप्रथमंपरिहर्तुमाह यद्यत्रेतिवाक्यार्थइत्यर्थः · ततस्तदुदीरणा
नंतरंपरिहारेभवतोकेनचित्स्यादितिजिज्ञासमतिमालक्ष्याह अप्रयत्नादिति · विरोधपरिहारप्रयो
जनमाह वाक्यइमिति · करार्पितबिल्वतुल्यंकरतलामलकादिकल्पंयथा। परोक्षंस्यात्तथेत्यर्थः। ए
वंगुरुणानुज्ञातःशिष्योनिःशंकोवाक्यार्थसंभवंचोदयति अत्राहेति · सद्वयंप्रतिशरीरंभिन्नक
र्तृत्वादिमच्चईक्षइत्यनेनापरोक्षत्वमपिविरोधद्भूनायस्वस्मिन्दर्शयति ततः किंतत्राह तच्चेति ·
तत्पदार्थरूपमित्यर्थः। चोऽवधारणे · अद्वयमेवेतिसंवंधः। विगणमामि · कार्यलिंगेनतदुपादानत
यातर्कयामि · तर्कयोग्यंतत्स्वरूपमाहपरोक्षमेवेति · अपरोक्षेतर्कानुदयान्नतर्क्यते चेत्परोक्षमेवेत्यर्थः
ततः किंतत्राह पारोक्ष्येति · एतच्चोद्वयत्वस्योपलक्षणं · पारोक्ष्यसद्वयत्वयोः परस्परमविरोधेनविरो

पारोक्ष्या १ द्वयत्व १

ध्युपलक्षस्यकर्तव्यत्वात् तथाचपारोक्ष्यापरोक्ष्यसद्वयत्वाऽद्वयत्वरूपविभाजकधर्मयुजोरित्यर्थः
एवंवाक्यार्थभेदासंभवेवाक्यात्तद्बोधोपिनसंभवतीत्याहवाक्यार्थेत्यादिना एतदुक्तंभवति तत्वमसी
त्यादिवाक्यंजीवब्रह्माभेदनिष्ठमितिवाच्यं· अन्यथातदर्थायोगात्· तच्चनसंभवति· सद्वयाऽद्वययोः
परोक्षापरोक्षयोश्चजीवब्रह्मणोरभेदासंभवात्· एवंचतज्ज्ञोचरमःपनिषज्जन्यंज्ञानंकुतस्त्यमिति
ननुजीवेश्वरयोस्तत्वमादिशब्दैरभेदविरोधिसद्वयत्वादिनप्रत्येतुंशक्यंतयोस्तदसामर्थ्यादितिक
थंनतयोरभेदधीरित्याशंक्यप्रसिद्धार्थाभिधायित्वात्तत्वमा दिशब्दानांजीवस्यचप्रमातृत्वा
दिसद्वयत्वरूपेणैवप्रसिद्धेस्तदर्थस्या पिप्रकरणेनाद्वयतयैवावगमादभेदविरोधिरूपाप्रतीतिरसि
द्धेत्याशयेनाह यद्वस्त्विति· सद्वयतयेत्यापरोक्ष्यस्याप्युपलक्षणं· अद्वयत्वंनिखिलभेदशून्यत्वं
व्यवहितंप्रतिपादितमिति नच्छब्देनाद्वयंपरोक्षमेव प्रतीयतइतितथोक्तं· प्रत्यक्तया· अपरो
क्षचैतन्यात्मना· ईशः· शक्तः· ननुशुक्तिरजतयोरभेदायोग्ययोरपिभ्रमादभेदधीदर्शनाद्योग्य

तात्पर्याद् ज्ञानेनापेक्ष्यते · किंत्वाकांक्षादिकमेवेत्याशंक्य तात्पर्याद्प्रमायां योग्यतास्वरूपसत्त्वापेक्षितैव
न त्वाकांक्षादिमात्रमित्याह ऽऽकांक्षमिति · येन विनायस्य पदस्य स्वार्थानुभवजनकत्वं सा तस्य श
ब्दस्य तस्मिन्नाकांक्षा तदर्थयोरपि साकांक्षशब्द प्रतिपाद्यतया सैवाकांक्षेति तद्धक्तत्वमित्यर्थः । पूरण
शक्तियुक्तं अन्वययोग्यं · यत्संनिधोपस्थितं · समीपस्थपदेनयत्र ज्ञापितं · ।६ · यस्मात्तु पदार्थ
त्वेति · योग्यतां · यद्यपि तात्पर्यज्ञानमात्रे योग्यतास्वरूपसत्ता नापेक्ष्यते · शब्दाभासप्रतिपाद्येतदभा
वात् · नापितज्ज्ञानं · तत्र मानाभावाद् योग्यताज्ञानविरहसहकृतात्तदितरकारणचक्रादेव तात्पर्यभ्रमो
पपत्तेः · तथापि शाब्दप्रमायां स्वरूपेण सापेक्षितैव यस्मादाकांक्षादौ सत्यपि तया विनातदभावस्त
स्मादन्वयव्यतिरेकाभ्यामाकांक्षादित्रितयमपि शाब्दप्रमायां कारणमितिभावः । ननु ब्रह्मविका
रत्वाज्जीवानां तद्रूपत्वाद्वा मृद्घटादिवदस्त्येवाऽभेदयोग्यतेति भेदाऽभेदवादिनस्तत्राह योग्यत्वमि
ति · चोऽवधारणे · पदार्थयुगस्य तत्त्वपदार्थयोः संबंधितामभेदप्रतियोग्यत्वं नैव भातीति संबंधः ।

जीवस्य ब्रह्माविकारित्वे ऽनित्यत्वाद्यापत्तेर्निरवयवस्य ब्रह्मणः सांशत्वायोगाच्च न मद्दृष्टवत्तदभेदो वा
क्यार्थः किंत्वात्यंतिक एव स वाक्यार्थः स्यात्स च प्रागुक्तयुक्त्या न संभवतीत्याशयेन सदृष्टांतमाह पारोक्ष्ये
ति · पारोक्ष्यादिकृतो विभागो भेदस्तेन सह विरोधाद्धेतोरित्यर्थः नतु तत्त्वंपदवाच्ययोः परस्पराभेदयोग्य
त्वेपि विरुद्धांशापरित्यागेन पदद्वयलक्ष्ययोरभेदेन विरुध्यत इति तमेव वाक्यं बोधयतु यथा सोयमिति
प्रत्यभिज्ञावाक्यं · तदेतत्पदवाच्ययोस्तदेतद्देशकालविशिष्टयोरभेदासंभवेन तदेतद्देशकालांशसंबंधं विहाय ल
क्षितवस्तुस्वरूपाभेदं प्रतिपादयतीत्याशंक्याह सोयमिति · तत्त्वंगिरोरिति शेषः । यथा सोयमिति गि
रोर्लक्षणया देवदत्तादिस्वरूपे प्रवृत्तिः एवं तत्त्वंगिरोरात्मनि लक्षणया प्रवृत्तिर्न स्यात् कुतस्तत्राह मानां
तरेति · आत्मनि मानांतरेणावगमासंभवान्न लक्षणेत्यर्थः । ननु मानांतराभावेपि तत्र सा किं न स्यादित्याशं
क्याह मानांतराधिगतेति · मानांतरेण वाच्यसंबंधितयावगते लक्षणा भवति · अन्यथा लक्ष्यस्वरूपानि
द्धारणायोगात् · शब्दादेव तन्निर्णये तस्यापि शब्दस्य लाक्षणिकत्वे अनवस्थापातात् · ततश्च लक्ष्यस्य

मानांतरगम्यत्वं लक्षणाव्यापकमात्मनो व्यावर्तमानं लक्षणामपि व्यावर्तयतीति भावः आत्मनि लक्षणा
संभवसमर्थनफलमाह तस्मादिति यस्माल्लक्षणयापि सामानाधिकरण्यं न घटते· तस्मादखंडविष-
यातत्त्वमादिवचः प्रवृत्तिरिति योजना· संसर्गयोग्यनंतप्रकृतवाक्ये योग्यभावादपास्तमित्यर्थः स
मानाधिकरणवाक्यं हि लोके द्विविधं दृष्टं· एकं विरुद्धांशपरित्यागेन लक्षणया स्वरूपमात्रपरं· य
था सोयमिति वाक्यं· किंचित्तु वाच्ययोरेव तादात्म्यलक्षणसंसर्गपरं यथाम्रद्रुटः नीलोत्पलमि
त्यादि· एतच्च लक्षणद्वैविध्यं लक्षणासंभवात् पूर्वोक्तन्यायेन विरोधाद्ब्रह्मणि न संभवतीत्यर्थः ननु
वेदांतविरोधाद्विरोधग्राहकप्रमाणानामेवाप्रामाण्यमस्त्वित्याह· एवमिति· वेदांतवाक्यगतो वेदांत-
वाक्ये प्रयुक्तो यः शब्दस्तस्य सामानाधिकरण्येनान्वयोपि न संभवति यदा तदा पदार्थयोर्विशेषण
विशेष्यभावेन प्रमितिरेव न सिद्ध्येत् दूरे विरोधग्राहकप्रामाण्यनिरासः सिद्धः प्रत्यक्षादिवाधि
तमर्थमग्निरनुष्ण इत्यादिवाक्यवद्वेदोपि न प्रमापयितुं शक्त इति कुतस्तद्विरोधात्तदितराप्रामाण्य

मितिभावः किंच· वेदांतायदि सिद्धं ब्रह्मप्रतिपादयेयुस्तर्हि मानांतरसंवादायत्तप्रामाण्याः स्युः न
दीनीरेफलानीतिवाक्येतथादर्शनात् नचतत्संभवतितत्रमानांतरासंभवात्· वेदस्यानपेक्षत्व
क्षतिप्रसंगाच्चेत्यभिप्रेत्याह किंचेति· सिद्धेषुप्रयत्नानिष्पाद्येषुपराभिमतकार्यविलक्षणेष्वितियाव
त्· उपलब्धपूर्वेति· पूर्वमुपलब्धेत्यर्थः· ततः किंतत्राह ब्रह्मेति· तथातथैव· कुतस्तत्राह· आत्मनस्त्वि
ति। आत्मनोपीत्यर्थः परिनिष्ठितत्वादिति सिद्धत्वादित्यर्थः फलवदित्युक्तदृष्टांतं विघटयन्
दार्ष्टांतिकमपि विघटयति नद्यादीति· सिद्धवस्तुप्रवृत्तेः सिद्धवस्तुनिष्ठत्वेनियतस्यास्तस्याः नु
रवधारणे· तद्वदेवेतिसंबंधः अस्त्वेवं· तत्राह नस्मादिति· वेदांतप्रतिपाद्येमानांतरप्रवृत्तौतत्सि
द्धार्थानुवादत्वात् वेदांतानां तात्पर्याभावेनाप्रामाण्यंस्यात्तदभावेच सिद्धवाक्यप्रामाण्यप्रयोजक
त्वाभावात् अप्रामाण्यंस्यादितिभावः। पूर्वसोयमित्यादि लौकिकवाक्यस्याखंडार्थत्वमुपेत्य वेदांते
लक्षणासंभवेन दूषितं· दृष्टांतेत्रापि तदसंप्रतिपन्नं· कुतस्त्याह दृष्टांतेन वेदांतेषु तद्वकाशोभवे

दित्याह नाखंडेति · असंसृष्टवस्तुविषया नित्यर्थः लोकेपि सोयमित्यादावपि कृत इति चेत्तत्राह
नानेति · अपर्याया नेकपदोपस्थितार्थानां घटेनासंसर्गस्तद्विषयत्वाद्धेतोः वचस इत्यनुषंगः · ननु
यथा प्राभाकराणां लोके लिङादीनां नियोगार्थत्वाभावेपि तदर्थतोतद्वदत्राप्यस्त्वित्याशंक्याह दूरेत्यंते
ति · दूरमेतीति दूरेत्यं अथ याप्यपित्यप्रत्ययासंभवाच्छेषाधिकारे दूरादेत्य इति वार्तिकोक्ते रेत्यप्रत्यय
स्तस्य भावस्तत्ता दूरेगतता · दूरेगतिरितियावत् · तस्याः अखंडवस्तुविषयप्रवृत्तेः वक्ष्यमाणदोषा
दुक्तलिङादिदृष्टांतो संघटतिप्रसंस्वेतिभावः · ननु सोयमित्यादेरर्थांतरासंभवादखंडार्थत्ववदुक्तिलो
कांकाकिं मुख्ययादत्यापहानात द्वाक्यमखंडनिष्ठं गौण्या वा लाक्षणिक्या वा न सर्वथापीत्याद आदाये
ति · अस्त्वेवं किं तत इत्याशंक्याह ओमित्विति · मुख्यादिवृत्तिषु मध्ये इत्यर्थः । एषशब्दः कुतोनवदंतित्रा
ह शब्दांतरेति · एकपदोपात्तविषयादधिकारार्थवृत्तेः शब्दस्येति शेषः अन्यथा वाक्यत्वमेव न स्यादि
तिभावः वाक्यत्वानुपपत्तिमेव स्पष्टयति आधिक्यमिति · पदांतरानुपस्थिति विशेषमित्यर्थः ।उक्त

जति । नवोधयति । शब्दगणः वाक्ये प्रयुक्तः पदसमूहः वाक्यत्वविघाते दृष्टांतमाह नहीति । हस्तः कर इत्यादि
पदगतं । तत्र वाक्यत्वं । एषां वा द्विनां । श । द्वानां वा । यद्वि वाक्ये प्रयुक्तानि पदानि मुख्याद्यन्यतमया वृत्त्याऽन्यमन्य
मर्थं विशेषं न प्रतिपादयेयुः किं त्वेकमेव । तदा तेषां पर्यायित्वापत्तेः हस्तादिपदसमूहवद्वाक्यत्वं न स्यात् । अप
र्यायिपदसमूहस्यैव वाक्यत्वादिति । किं च ब्रह्मणो वेदांतज्ञानविषयत्वाभ्युपगमे सिद्धांतहानिरित्याह किं चेति ।
स्वप्रभत्वे हेतुरलुप्तेति । अत एव सर्वेषां प्रमाणेनामविषय इत्याह सर्वप्रमाणेति । आत्मानं स्वप्रकाशत्वादि स्वभा
वं सर्वप्रमाणविषयादनात्मनो बहिरन्यमभ्युपेत्येति संबंधः । अत एव वेयं श्रुतिः अन्यदेव तद्विदितादिति । न
ह्ययमभ्युपगमउचित एवेत्याशंक्य वेदांतमेयतात्तस्यैवं नासिद्धो दित्यभिप्रेत्य विपक्षे बाधकमाह आत्मनि
वेति । किं च वेदांतानां ब्रह्मण्याकिंचित्करत्वान्न मानत्वमित्याह सर्वत्रेति । जडेषु स्वप्रकाशेषु घटपटादि
ष्वित्यर्थः । अजडप्रकाशे स्वप्रकाशे विषयस्फुरणं । घटादीनां जडत्वात् स्वतः स्फुरणासंभवाच्चक्षु
रादिस्तत्र स्फुरणमादधद्व्यवहार उपयुज्यत इति तत्र तस्य प्रामाण्यं युक्तं । ब्रह्मात्मनस्तु अजडस्य स्व
पतयाः स्वमहिम्नैव सिद्धेस्तदन्याः जडप्रकाशसंभवाच्च । किं तत्र जनयित्वा वेदांतास्तत्र प्रामाण्यं लभेरन्नि

साहचर्यात्मेति । अजडेति शेषः । किंच वेदांतानां सिद्धब्रह्मनिष्ठत्वेन कृतपदानां परस्परमन्वय एव न सिद्ध्ये
त् क्रियापदेनैव हि सिद्धपदानामन्वयनियमात् ब्रह्मवाक्ये च क्रियासंभवादित्याह किंचक्रियेति । इह लोके
नन्वेवं त्वप्यसि अस्मीत्यादि क्रियापदमस्तीति चेत्तत्राह नात्रेति । वेदांते अस्यादि क्रियापदमपेक्षितं विवक्षि
तार्थं वेदांतिनो नाम नंतीति संबंधः । अस्यादिपदस्यापि सन्मात्रनिष्ठत्वाभ्युपगमात् तस्य क्रियापदत्वं
साध्यार्थस्यैव तथात्वादतस्तन्निमित्तो न पदसमन्वय इत्याह वाक्यमिति । ननु तर्हि पदविधयैव वेदांतप
दानि ब्रह्म प्रमापयिष्यंतीति नेत्याह नापूर्वमिति नुरवधारणे नैवास्तीति संबंधः । कुतः सामर्थ्याभावस्त
त्राह स्वार्थेति । तत्रापि हेतुमाह लोक इति । इह व्यवहार इत्यर्थः । अन्यदनुभवरूपं । पदानि हि इह व्यव
हारे स्वार्थगृहीतसंगतिकान्येव वाक्यार्थं वाक्यविधया बोधयंतीति वाच्यं । अन्यथा अव्युत्पन्नानामपि वा
क्यश्रवणे तदर्थानुभवप्रसंगात् । एवं च पदानि पदविधया पूर्वानुभूतस्वार्थस्मृतिमेव जनयंति न त्वनुभ
वं । अपूर्वार्थत्वाभावात् । वाक्यभावे नैव तस्यापूर्वार्थेपि लंभने शक्तिर्वाक्यार्थस्य विशिष्टस्य वैशिष्ट्यस्य

वापूर्वत्वात्तदभावे च वेदांतानां नापूर्वोपलंभनशक्तिरस्तीति भावः तर्हि वर्णानामेव प्रागनवगतार्थतया प्रा
माण्यं स्यादिति तत्राह कृत्वेति वाक्यपदते - वाक्यतां पदतां चेत्यर्थः - वेदो वाक्यपदतो हित्वा कथं च न कथमपि व-
र्णात्मनापि कदाचिदपि प्रतिपत्तिहेतुर्भवेदिति कश्चिदपि वक्तुं नेष्टः तत्रैवं सति श्रुतीनां प्रामाण्यमात्म
निकृतो भवेदिति वर्णयंति - वर्णनीयमित्यर्थः । अथवा - एवं सत्यात्मनि श्रुतीनां यत्प्रामाण्यमिति वर्णयं
ति तत्कुतः केवलादित्यर्थः - नहि वर्णमात्रात्कोप्यनुभवोस्तीति भावः । किंच - वेदांतस्य सत्यज्ञानादि
पदानां अनात्मनि संगतिग्रहो न संभवति - नह्यात्मातिरिक्तं सत्यादिस्वभावं किंचिदस्ति - नाप्यात्मनि
तेषां संगतिग्रहः - तद्ग्राहकमानानामात्मनि प्रवृत्तौ वेदांतवाक्यमनुवादकं स्यात् - आत्मनि मानांत
राभावे च तत्र सदादिशब्दस्य कथं संगतिग्रहः स्यात् - तेन विना वाक्यं वेदांतानां तत्प्रामाण्यमित्याह -
किंच प्रमाणांतरमिति - अभ्युपयन्नंगीकुर्वन् - कथमिति प्रतिपादनीयमिति - न कथमपि स्यादित्य
र्थः । एवं सिद्धांतानां सिद्धब्रह्मबोधकत्वेन वा तीरे फलसत्त्ववाक्यवन्मानांतरसापेक्षतापत्तिर्मानां

तदभावे च संगतिग्रहासंभवान्न तत्र तेषां प्रामाण्यमित्युक्तं । इदानीं सिद्धवस्तुज्ञानेन प्रवृत्तिनिवृत्त्यसंभ
वात्प्रवृत्तिनिवृत्ती च विना सुखप्राप्तिदुःखपरिहाररूपप्रयोजनासंभवात्तेन विनाध्ययनविधिपरि
गृहीतवेदांतानां प्रामाण्यायोगादपि न सिद्धनिष्ठवेदांतप्रामाण्यमित्याह किंच प्रवृत्तीति । प्रवृत्तिविनिवृ
त्तिविहीनं तद्योग्यं यद्वस्तु तत्त्वमात्मतत्त्वं तत्प्रतीतिजननादित्यर्थः । हेयोपादेययोः कलंजभक्षणाद्यग्नि
होत्राद्योरनर्थार्थसाधनयोर्ज्ञानात्तद्भक्षणान्निवृत्तिरग्निहोत्रादौ च प्रवृत्तिः संभवतीति भवति तद्वाक्यं
प्रयोजनवदर्थनिष्ठमात्मतत्त्वं तु नित्यसिद्धत्वान्न हेयं नाप्युपादेयमिति न तज्ज्ञानात्प्रवृत्त्यादिसंभव
इति निःप्रयोजनमेवात्मवाक्याध्ययनं स्यात्तच्चानुपपन्नं न ह्यपेक्षाज्ञानेन तदध्ययनविधिः फलवान्
भवतीति न तत्र वेदप्रामाण्यं युक्तमिति भावः । किंच । अज्ञातार्थाधिगमकं प्रमाणमिति प्रमाणसामान्यल
क्षणं वेदविद आहुः । विशिष्य च वेदस्य तथैव वक्तव्यं । अर्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्येति जैमिनि
नोक्तेः । अन्यतोऽज्ञातेऽर्थे मानाभावप्रयुक्ताऽसत्त्वशंकाभावेन वेदस्य तत्र तात्पर्यकल्पनासंभवाच्च । न च

तात्पर्यं विना शब्दः स्वार्थे प्रमाणमित्याह अज्ञातमिति । अवबोधयतः चक्षुरादिकरणस्येति शेषः । ततः किं
तत्राह । अज्ञाततेति । चोऽवधारणे दुर्निरूपएवेति संबंधः तत्र हेतुर्विज्ञानेति स्वप्रकाशचैतन्यात्मनिप्रतीचि
नाज्ञानवकोशः । नहि प्रचुरप्रकाशे सवितरि तमः संभवति । ततोऽज्ञातार्थविगमलक्षणप्रमाणत्वस्याभा
वादात्मनि वेदांतप्रामाण्यं संभवतीति भावः । ननु नेदं प्रमाणसामान्यलक्षणं । धारावाहिकद्वितीयादिबुद्ध्यव
भावात् किंतु यथार्थानुभवः प्रमा तत्करणं प्रमाणमिति सामान्यलक्षणमिति चेन्न । धारावहनबुद्धिस्थलेपि
तद्विषयस्य प्रथमज्ञानेन निश्चितस्यासत्त्वशंकानुदयेन द्वितीयादिज्ञानानां तदनिवर्तकानां प्रमेयसत्त्व
प्रयोजकप्रामाण्याभावेन तत्र लक्षणागमनस्यादोषत्वात् । यथार्थानुभवत्वं च शुक्तिरजतादिज्ञानसा
धारणं । अबाधितार्थज्ञानं प्रमेत्यपि न । बाधस्य बोध्याभावप्रमारूपतया त्वाश्रयादित्यज्ञातार्थबोधक
त्वमेव परीक्षकसंमतं प्रामाण्यं तच्चात्मनि वेदांतानां न संभवति । अज्ञानाभावादित्युक्तम् । तदभ्युपग
मे च तस्य स्वप्रकाशता हीयते । न ह्यात्मतत्त्वं स्वप्रकाशमनुद्भूमिति वचनद्वयं प्रामाण्यं संभवतीति सह

अबाधस्य बोध्याऽप्रमाभावरूपतया ३

ष्टांतमाह बोधस्वभावकमिति· आहुः· वेदांतिन इति शेषः। नन्वज्ञानविशिष्टेन प्रमाणगोचरस्तस्या
पि प्रमाणविषयत्वापत्तेस्तस्य ततोनि दत्स्वप्रयोगाच्च· नापि तदुपलक्षितं वस्तुमात्रे प्रमाणप्रसंगेन तदभावेप्य
नुपपत्त्यभावादित्याशंक्य नाज्ञानं तत्र प्रविशेषणं· न चोपलक्षणं किंतूपाधिः उपाधिश्च यावत्कार्यविस्थायी
तदन्वयी यथा श्रोत्रस्य कर्णशष्कुली· एवं चाज्ञानाभावे वस्तुनः प्रमेयत्वं भवति· कर्णशष्कुल्यभावे इव ७४
श्रोत्रत्वमित्यभिप्रेत्याह· उपाध्यभाव इति कर्णशष्कुल्याद्यभाव इत्यर्थः। उपाधिमत्त्वे तत्प्रयुक्तश्रोत्रत्वा
दि· तटस्थं प्रमेयादि किं भवति किं तदुपलक्षणं नेत्याह· उपाधिरिति· अत्र तटस्थमित्यनेन नाविशेषणादुपाधे
विशेषो दर्शितः उपाध्यभाव इत्यादिनोपलक्षणादित्यादि द्रष्टव्यं· प्रमाणवृत्तेरुपाधिरिति संबंधः· अज्ञा
नस्योपाधित्वे फलितमाह न तदात्मेति· तदज्ञानं स्वयंप्रकाशे आत्मवस्तु निन तटस्थे नाप्युपाधिः सं
गच्छत इत्यर्थः· यत एवमज्ञानासंभव आत्मनि ततो हेतोरस्यात्मनि नमानधीः संभाव्यत इत्युपसंहारः
किंचाद्वैतब्रह्मवादिनां वेदांतार्थविगता प्रमाता· वेदांतः प्रमाणं तदुपदेष्टा गुरुस्तदुपकरणं युक्त्यादि

अभ्युपगम्यते न वा · आद्ये व्याहतिः द्वितीये न प्रमेयसिद्धिः · एवं स्वप्रकाशं स्वातिरिक्तप्रमाणागम्यमित्य
पि विरुद्धमित्याह · अद्वैतमिति · आहुः वेदांतिन इति शेषः · द्वैतं · उक्तप्रमात्रादि · प्रमाणं · प्रमितिसाधनं
चेति संबंधः · पांडित्यमित्याद्युपहासः । ननु प्रमात्रादिविभागः सर्वोप्यस्त्येव · न चैवमद्वैतक्षतिः · अद्वै
तब्रह्मण एव निखिलप्रपंचपरिणामितया मात्रादेस्तदभिन्नत्वादित्येवं वदंतं बौद्धगंधिनमेकदेशिनं
प्रत्याह मातृप्रमाणेति · मितिः प्रमा · तत्र च वर्ण्यामो दूषणमिति संबंधः तदेवाह · कूटस्थतापहतिरिति
निर्विकारस्य ब्रह्मणः प्रमात्रादिविकाराभ्युपगमेपि विकारस्याभिविरोधः । एवमनेकात्मकप्रपंचाभे
दे विज्ञानघन एवेत्यादिश्रुत्युक्तसर्वगतैकरसत्वहानिः एवं ज्ञानात्मनो ब्रह्मणः स्वावभास्यप्रपंचाकारत्वेश्वा
क्ये विज्ञानवादिभिः संधिः कृतः स्यात्तन्मतप्रवेशापत्तिरिति यावत् · चकारदर्शितं दूषणांतरमप्याह ·
अन्यच्चेति · युगपदेकत्र भेदाभेदविरोधादित्यर्थः ननु प्रमात्रादिविभागः सत्यो न भवति येनोक्तदूष
णं स्यात् · किंतु हेयत्वात् शुक्तिरजतवत्तत्राज्ञानकल्पितमिति न कोपि दोष इत्याशंक्याह · अज्ञानके

ष्टांतमाह यो धर्मस्वभावकमिति · आकुः · वेदांतिन इति शेषः । नन्वज्ञान विशिष्टेन प्रमाणगोचरस्तस्या
पि प्रमाणविषयत्वापत्तेस्तस्य ततो नि र्देश्यप्रयोगाच्च · नापि तदुपलक्षितं वस्तुमात्रे प्रमाणप्रसंगेन तदभावेप्य
नुपपत्त्यभावादित्याशंक्य नाज्ञानं तत्र प्रविशेषणं · न चोपलक्षणं किंतूपाधिः उपाधिश्च यावत्कार्यविस्थायी
तदन्वयी यथाश्रोत्रस्य कर्णशष्कुली · एवं चाज्ञानाभावे वस्तुनः प्रमेयत्वं भवति · कर्णशष्कुल्यभावे इव
श्रोत्रत्वमित्यभिप्रेत्याह · उपाध्यभावदिति कर्णशष्कुल्याद्यभावइत्यर्थः । उपाधिमत्त्वे तत्प्रयुक्तः श्रोत्रत्वा २४
दि · तटस्थं प्रमेयाद्यभिहितं किं तदुपलक्षणं नेत्याह · उपाधिरिति · अत्र तटस्थमित्यनेन नाविशेषणादुपाधे
विशेषोदर्शितः उपाध्यभावइत्यादिनोपलक्षणाद्विशिष्टव्यं · प्रमाणवृत्तेरुपाधिरिति संबंधः · अज्ञा
नस्योपाधित्वे फलितमाह ततदात्मेति · तदज्ञानं स्वयंप्रकाशेऽऽत्मवस्तु नि ननाटस्थ्येनाप्युपाधिः सं
गच्छत इत्यर्थः · यत एवमज्ञानासंभवे आत्मनि ततो हेतोरत्रात्मनि नमानधीः संभाव्यत इत्युपसंहारः
किं चाद्वैतब्रह्मवादिनां वेदांतार्थविगंता प्रमाता · वेदांतः प्रमाणं तदुपदेष्टा गुरुस्तदुपकरणं युक्त्यादि

ल्पितमिति॰ ननु तदपि सच्चेत्कथं नोक्तदोषस्तत्राह अनिर्वचनीय इति॰ सदसद्विलक्षणमिति नोक्तदोष
इत्यर्थः एतस्मात्राद्यज्ञानकल्पितमिति संबंधः॰ माता आदिर्यस्य मानफलपर्यवसाने चयस्य तत्तथोक्तं
द्वैतरूपत्वेन प्रमात्रादेः कल्पितत्वे ब्रह्मण्यपि तत्प्रसंगस्तस्यापि वेदांतवेद्यतया द्वैतरूपत्वादित्याह तदेत्यादिना
ननु नास्ति ब्रह्मणो द्वैतरूपत्वं स्वप्रकाशत्वादिति चेत्तर्हि तत एव वेदांतप्रमेयमपि न स्यात् अद्वैतरूपस्य मानवि
षयत्वानुपपत्तेरित्याह ब्रह्मेति॰ अथ चेदित्यर्थः ब्रह्म प्रमेयं नेष्टं चेत्तर्हि इह ब्रह्मणीति संबंधः। पक्षपराहति
मेव सदृष्टांतं व्यनक्ति॰ नेदमप्रमेयमिति॰ अदाह्यं गगनादि तस्य दाहक इत्यर्थः॰ अज्ञानकल्पितमनिर्वचनी
यमित्यत्रोक्तं मात्रादेरनिर्वचनीयत्वमुपेत्य ब्रह्मणोपि तत्प्रसंग इति दूषितं॰ इदानीं तदेवासंप्रतिपन्नमि
त्याह किं चाप्रसिद्धमिति॰ इदं चाद्यार्थमाह स्याज्ज्ञानेनेति॰ एकं॰ एकमपि वस्त्वनिर्दोषः॰ ननु लोकाप्रसिद्ध
मपि कस्मिंश्चिच्छास्त्रे वैशेषिकाभिमतविशेषवत्सिद्धं स्यान्नेत्याह निःशेषेति॰ तीर्थकृतः शास्त्रार्थविदः
वैशेषिकादिनिखिलशास्त्रार्थविद्भिः त्वदीरिततंत्रमार्गे॰ तंत्र्यत इति तंत्रं शास्त्रार्थस्तत्प्रतिपत्त्युपायेस

रोक्षां नाद्य इत्याह · इंद्रियेति · इंद्रियजन्यज्ञानवद्वाक्यजन्यामतिरर्थापरोक्षस्यस्यार्थाभिव्यक्तेर्जननी भवि
तुं समर्था न वाक्यजन्यत्वान्नापरोक्षेत्यर्थः · ततो द्वितीयः परिशिष्यत इत्याह · तेनेति · तत्र दोषमाह भ्रां
तिरिति · तदर्थं ब्रह्मात्मानं विशिनष्टि · सदेति · सदाऽपरोक्ष इति संबंधः · तदर्थमाह अनुभव इति · अनुभ
वोपि वेद्यत्वेन न तस्य सदापरोक्षं तदर्थमाह · अजडत्वेति · तथा च वेदांतानां तत्राप्रामाण्यमेव स्यादिति भा
वः · नन्वात्मा चेन्नित्यापरोक्षस्तर्हि घटादिविंद्रियजन्यज्ञानमिव वेदांतजन्यमपि तत्रापरोक्षमस्तु मा
स्तु वेदांताप्रामाण्यमिति · नेत्याह नित्यापरोक्षमिति · स्वभावात् शब्दस्वभावात् · शब्दो हि लोके घटादिगो
चरो वेदे चाग्निहोत्रादिगोचरस्तत्र परोक्षज्ञानमेव जनयतीति शब्दस्य परोक्षज्ञानजनकत्वमेव स्वभावः
न त्विंद्रियस्येवापरोक्षज्ञानजनकत्वमिति कथं वेदांतानामपरोक्षे वस्तुन्यपि परोक्षज्ञानं जनयतामप्रा
माण्यं स्यान्नेत्यत इत्याह प्रामाण्यमिति · नन्वपरोक्षं सत्यज्ञानादिस्वभावं ब्रह्म तथैव बोधयंति वेदांता
न विपरीततयात स्वज्ञानं शब्दस्वभावात् परोक्षमित्येतावन्मात्रमिति कथं प्रामाण्यं न स्यादित्यत आह
न ह्यन्यदिति · वेदांतजन्यज्ञानस्य परोक्षत्वेन तद्विषयब्रह्मापि परोक्षं वाच्यं · परोक्षार्थविषयस्येव ज्ञानस्य

परोक्षत्वदर्शनात्· एवंचपरोक्षंब्रह्मयत्साक्षादपरोक्षादहंब्रह्मास्मीतिवाक्यमपरोक्षतयाप्रतिपादय
त्कथंप्रमाणं· नचापरोक्षज्ञानविषयःपरोक्षंब्रह्मास्तियेनसेदर्थेतयावाक्यजन्यंपरोक्षज्ञानंप्रमाणंभवे
दित्यर्थः अन्यत्परोक्षंब्रह्मो अन्यादिति अपरोक्षमितिबोधयतइत्यर्थः · नन्वग्निहोत्रादिवाक्यस्यप
रोक्षज्ञानजनकत्वेपितद्वदस्यनतत्स्वभावःकल्पनीयः इदमस्त्वमसीत्यादिवाक्यस्यापरोक्षज्ञान
जनकत्वात्· अन्यथातत्रापरोक्षोद्दशमत्वभ्रमस्ततोननिवर्ततेइत्याशंक्यदृष्टांतासंप्रतिपत्त्यादू
षयति॰ वस्त्वेस्त्विति॰ अपरोक्षंयथास्यात्तथानदृष्टत्ववद्कुमयुक्तौ क्तमित्यर्थः अदशमत्वादिभ्र
मस्यतत्रेंद्रियजन्यसाक्षात्कारादेवनिवृत्तेः शब्दस्यतत्रापिपरोक्षज्ञानजनकत्वमेवेतिनतत्स्वभा
वभंगइतिभावः। पूर्वंघटादौचक्षुरादिप्रमाणस्यस्वप्रकाशस्फुरणाधानवच्छिदात्मनिवेदांता
नांतदसंभवान्नप्रामाण्यसंभवइत्युक्तं· इदानींवेदांतजन्यवृत्त्यातत्रस्फुरणाजननेपिनवेदां
तानामानर्थक्यं· अविद्यानिवृत्तेस्तत्साध्यत्वेनतत्रवेदांतप्रामाण्यसंभवादितिसिद्धांतशंकांदूषय

धितुमनुवदति अत्राहेति · उपनेयं आधेयं स्फुरणं अनन्यमाने स्वप्रकाशे तत्रास्त्येवेति संबंधः। ज्ञानम
ज्ञानमात्रं निवर्तयति · प्रपंचस्तु तन्निवृत्त्या निवर्तते · अथवा प्रपंचोपितद्विकारस्तदात्मकः तदात्मक
एवेति मात्रमित्युक्तं · एतद्दूषयितुं नैतदिति · त्वदुक्तं नेत्यर्थः कुतस्तत्राह प्रमाणमिति · न तावत्प्र
माणं सतोऽज्ञानस्यापनेतृ निवर्तकं · सतश्चात्मवदनिवर्त्यत्वात् · एतत्प्रमाणमसतोप्यज्ञान
स्यापघातसिद्धौ निवृत्तिसिध्येन्नियोज्यं योजनीयं न असतो निवृत्त्यनुपपत्तेः नप्येतत्पक्षद्वयादन्य
त् सदसदात्मकमज्ञानमस्ति यदनेन प्रमाणेनापोह्यं स्यात् · विरोधेनैकस्य सदसदात्मत्वायोगात् · य
स्मादज्ञानस्योक्तकल्पत्रयेपि निवृत्तिर्न संभवति तस्माद्युष्माकं मते प्रमाणं वेदांतवाक्यं कस्या
पि न ज्ञानद्वाराऽपनेत्रिति · वेदांतानर्थक्यं तदवस्थमेवेति भावः। किंचाऽविद्यानिवृत्तिरसती चेन्न
प्रमाणेन ज्ञायेत सती चेत्तज्जनकमानस्य कारकत्वापत्तिः जडक्रियापर्यवसायिनस्तन्नियमात् · नच
तदुपपन्नं · मानस्य व्यंजकतयाऽकारकत्वव्याप्तिविरोधादित्यभिप्रेत्याह मानं न कारकमिति · एवं तदोका

रकस्यामानत्वव्याप्तिविरोधंचाहस्याच्चेदिति· कारकमित्यनुषंगः क्रियावत् अग्निहोत्रादिक्रिया
वत् क्रियाजनककारकमितियावत्· स्यादितिसंबंधः॥ इदंमानं· उज्झतीति· त्यजेदिति सोर्थः· ननु
चक्षुरादेः प्रमाणस्यजडज्ञानक्रियाजनकत्वंसर्वसम्मतमित्याशंक्यतदपिनभवतांसंम
तमित्याह जन्यंनमानफलमिति संविदुतेसंजानतेअंगीकुर्वतइतियावत्· अजडाजन्या· व्यक्ता
नुभवस्यैवसर्वप्रमाणफलत्वेनब्रह्मवादिभिरंगीकारात् जडवृत्तिमात्रनिष्ठंनचक्षुरादिप्रामा
ण्यमितिभावः॥ अथवा माननकारकमितिनियममाह· एवंचमानफलमित्यपिस्वरूपानुभव
स्यैवसर्वप्रमाणफलत्वमिष्टंतावार्तिककृत्प्रभृतयो गीकुर्वते· तदप्येवंमतेविरुद्धंस्यादित्याह
जन्यंनमानफलमिति· अस्तुतर्हिघटादावच्छिन्नब्रह्मण्येवाभिव्यक्तंचैतन्यंप्रमाणफलमित्या
शंक्यब्रह्मणः फलाव्याप्यत्वान्नैतदित्याह नखल्विति· जात्वकदाप्यस्मिन्नक्षरेभिव्यक्ताचितिर्
नखल्विति· वेदांताभिव्यक्तचैतन्यस्यनिष्प्रपंचात्मस्वरूपतयातत्फलत्वासंभवादितिभावः

नन्वज्ञानस्यसदादिविकल्पेनाऽनिर्वर्त्यत्वमुक्तमनुपपन्नमनिर्वचनीयत्वात्तस्यज्ञाननिवर्त्यत्वसं
भवात्· नचैवंभानस्यकारकत्वप्रसंगोपि· अनिर्वाच्यस्याभिव्यक्तेरधिष्ठानचिन्मात्रतयातत्पर्यवसा
यिभानस्यव्यंजकतयाऽकारकत्वादित्याशंक्याह नाद्यापीति· वैशेषिकादिनिखिलशास्त्राभ्यासा
नंतरमपीत्यर्थः अनिर्वचनीयभाषांसदसद्विलक्षणरूपांतांतर्हिसम्यक्शास्त्रांतरानभ्यासात्तद
ज्ञानंनेत्याह सर्वेति· सर्वशास्त्रतात्पर्यावगाहमानो विचारयन्नपीति संबंधः· तात्पर्यतस्तज्ञ
तमनसा ततेश्च तदभावादेवनतज्ज्ञानंनान्यनिमित्तमादितिदर्शयन्लोकेपितदप्रसिद्धिंदर्शयति
नचेति· तथासदसद्विलक्षणरूपानिर्वचनीयं· इयंअनिर्वचनीयभाषालौकिकरजतादिभ्रम
स्याप्यन्यथाख्यात्यादिरूपत्वेनलोकेपितदप्रसिद्धिरितिभावः एवंवेदांतानामुक्तन्यायैर्ब्रह्मणि
प्रामाण्यासंभवसमर्थनमुपसंहरतितस्मादिति· अत्रस्फुरणविद्यानिवृत्त्योर्मध्येकिंचिदपिनिरू
प्यमाणंदृढब्रह्मात्मवस्तुनिसंभवतीतिसंबंधः· चोऽवधारणे· नैवशक्यमितिसंबंधः एतच्चेपारोक्ष्य

सद्रूपत्वादिकृतविरोधादेरप्युपलक्षणं · एवं वेदांतानां मानांतरविरोधादिभिर्न सिद्धोदासीनब्रह्मग
भिन्ने ब्रह्मणि प्रामाण्यमित्युक्तं · इदानीं सर्वस्य वेदस्य कार्यपरत्वनियमान्न शुद्धे ब्रह्मणि प्रामाण्यं
लोके वृद्धानां कार्यव्युत्पत्तिबलेन वेदस्यापि तदर्थत्वादित्यभिप्रेत्य कार्ये सर्वशब्दशक्तिग्रहं लोके दर्श
यति · कार्यान्वयेति · बालो हि गामानयेत्यभियुक्तवाक्यश्रवणानंतरं प्रवर्तमानस्य श्रोतुर्ग
वानयनादिचेष्टावलोकनात्प्रवर्तकधियं गवानयनादिकार्यमिति ज्ञानं · विमता प्रवृत्तिरेतत्कार्यज्ञानपू
र्विका एतत्प्रवृत्तित्वात् यदेवं तदेवं यथा मम स्तनपानादिप्रवृत्तिरिति परिकल्पितस्य कारणमो
जोऽन्वयन् गामानयेत्यादिशब्दान्वयव्यतिरेकाभ्यां शब्दजन्यत्वं निश्चित्य तज्ज्ञो चरेवस्तुनि कार्ये
प्रसक्तवाक्यसामर्थ्यं स्वयमेव वेत्तीत्यनुषंगः । तत्किं वाक्यप्रयुक्तसर्वपदानामविशिष्टेऽर्थे शक्तिः
तथा सति पर्यायता स्यात् · न · वक्ष्यमाणन्यायेन पृथगर्थत्वादित्याह पुनरपीति · संक्षिप्ततया
वाक्यसामर्थ्यग्रहणानंतरं वाक्यभागपदान्यविभज्य तत्तत्पदस्य भागस्य कार्यान्वितं तदर्थस्य

वाचकमित्यपि वेत्तीत्यर्थः। लोके हि शब्दानां वृद्धव्यवहारानुसारेण सामर्थ्यमवगम्यते· वृद्धव्यव
हारश्च प्रवर्तकवाक्याधीनः अन्यस्मात्प्रवृत्तिहेतुज्ञानासंभवात्· नहि गोस्तिष्ठतीतिवाक्यात्
कश्चित्प्रवर्तत इति प्रवर्तत इति प्रवर्तकवाक्ये प्रथमं सामर्थ्यं ग्राह्यं प्रवर्तकं च तत्· यद्बुध्वा प्रव
र्तते तच्च स्वस्मिन्कार्यमिति निर्णीतं· अतस्तज्ज्ञानमेव गामानयेति वाक्यश्रवणानंतरं मध्यमवृ
द्धस्य गवानयनादिप्रवृत्त्यानुमीयते· तच्च तस्य गवानयनादिवाक्यजन्यमिति च· ततस्तद्गोचरवि
शिष्टकार्यमत एव वाक्यं समर्थमिति निश्चीयते· प्रवर्तकवाक्यस्य तदन्यज्ञानस्य जनकत्वासंभवेनत·
द्शक्तत्वात्· एवं संमुग्धतया पदसमुदायस्य विशिष्टकार्ये सामर्थ्यमवगत्य पश्चात् गावधान
वत्समानयेत्यादौ विभज्य तत्तत्पदप्रयोगे अन्वयव्यतिरेकाभ्यामेव कार्यान्विततत्तदर्थे तत्पदं
शक्तमिति वेत्तीति सर्वशब्दानां कार्यमर्थः· न च पर्यायता कार्यविशेषस्य व्यभिचारेऽपि कार्य
सामान्यस्य तद्भावेन तदन्वितस्य शब्दार्थत्वोपपत्तेरिति· नन्वेवं कार्यपदस्य कथं शक्तिः का

यंतराभावेनतदन्वितकार्यासंभवात्· नापिगवादौतच्छक्तिरस्ति· नचकार्यपदंकार्यमात्रेशक्त
मितिवाच्यं· शब्दार्थस्यानेकरूपत्वप्रसंगादितितत्राह अन्वयेति· कार्यस्येयोन्वयः संबंधस्तद
न्वयिनितदाश्रये· कार्यस्यहिसिद्धेनान्वयः सिद्धकार्येचप्रवर्त्तते· अन्वयस्यदृष्टत्वादितिन
शब्दशक्तिप्रयोजकरूपस्यानेकरूपत्वमिति· ननुकार्यान्वयान्वियत्वापेक्षयाऽन्वितत्वस्यल
घुशरीरत्वात्तत्रैवशब्दशक्तिरस्तु· अन्यथागौरवात्· नचैवमतिलाघवेनतत्तदर्थमात्रेश
क्तिरस्त्वितिवाच्यं· अन्वितस्यैवशब्दश्रवणानंतरंनियमेनप्रतीतेरित्याशंक्यपूर्वपक्षीतद
नुमोदते स्यक्तइति· एषपक्षइत्यनेनसंबंधः· अलंसमर्थः तर्हिकिंयोग्यतरान्वितेशक्तिरा
श्रिता· तदपिन· अतिगौरवादित्यभिप्रेत्याहनोक्तइति· अस्माभिरितिशेषः। कस्तर्हितवश
शब्दार्थस्तत्राह किंतुस्यादिति· अस्यशब्दस्यनिजसहजवशान्नैसर्गिकस्वभावादन्वितार्था
भिधानेशक्तिरितिसंबंधः· तर्हिसिद्धेपिवेशाब्दार्थः स्याद्धितिनेष्टसिद्धिस्तत्राहयोग्यत्वादेरितिन ६६

उपनिपतति · आयाति · आगच्छेदित्यर्थः सिद्धपदार्थानां साध्येन कार्येणैवान्वयो न तु सिद्धेन · सिद्ध
साध्ययोरेवान्वये आकांक्षायोग्यतासंभवात् न्वितमात्रे शक्तादपि गवादिपदाद्योग्यतादिमहिम्ना
स्य ३ गवादेः कार्यान्वय एव सिद्ध इति सर्वत्र शब्दस्य कार्येदमर्थ्यं कार्यविशेषत्वं कार्यप्रतिपादकत्वमिति · न
नु किमिदं कार्ययोग्यता यद्बलाद्यदन्वयः पदार्थानामुपनिपतेत · न तावद्धात्वर्थस्तस्य स्वर्गसाधन
स्य स्वर्गकामिकार्यत्वासंभवेनान्येषां नदेदमर्थ्यायोगात् · नापि नियोगरूपं तत् · लोके तदभावा
त् · न चोभयसाधारणं कृतिसाध्यत्वविशिष्टं तदिति वाच्यं · स्वर्गघटादेरपि नियोगवत्परंपरया त
त्संभवेन तदन्वयस्यापि शब्दार्थत्वप्रसंगेन मतान्तराद्विशेषाद् अतो लोकवेदयोरनुगतं शब्दार्थता
प्रयोजकं न सिद्धमित्याशंक्याह · प्रवृत्तीति · यन्निमित्तं पुरुषस्य कामनादियुक्तस्य नियमेन
प्रवृ. सभावो न भवेत्तद्रागादावतिव्याप्तिवारणाय तद्धिशिनष्टि कालत्रयेति · भूतभविष्यद्वर्त
मानान्यतमकालाऽनन्विततया प्रतीयमानस्वरूपेण कार्यस्य भविष्यत्कालान्वयित्वादित्यर्थः

यत्कालत्रयानन्वितं अस्त्यभावस्य विरोधि तत्कार्यं · रागादौ घटादिपदात्प्रतीयमानघटादौ चातिव्या
प्तिवारणाय दलद्वयं · एके · गुरुमतैकदेशिनः अन्येषां तन्मतानुसारिणां नियोगकार्यलक्षणमाह
स्वगोचरस्येति · अथवा · अत्र प्रेरकं कार्यमित्युक्ते रागेतिव्याप्तिरत उक्तं स्वगोचरस्येत्यादि · तावति
विज्ञापयस्वं तेउक्तोइष्टसाधनत्वबोधकप्रमाणेपि प्रसंगोस्त्यादिस्यत उक्तं प्रेरकमिति · प्रमाणस्य
बोधकत्वादेव न प्रेरकत्वमिति ततो व्यावृत्तिसिद्धिः । इदं तु लक्षणं धात्वर्थकार्यविलक्षणनियोगा
ख्यकार्यविषयं · स्वगोचरस्येष्टसाधनत्वज्ञापकत्वानिर्देशात् · न च नित्यनियोगेऽव्याप्तिः तद्विष
यस्येप्सितसाधनत्वानंगीकारादिति वाच्यं · तत्रापि नियोगस्यैव क्रत्वादुद्देश्यतयेष्टत्वात्तत्र धात्व
र्थस्यापीष्टसाधनत्वोपपत्तेस्तत्रापि लक्षणसंभवादिति द्रष्टव्यं · एवं च सति कृतिसाध्यत्वा
दिना येन केन चन विशेषणेन विशिष्टतयेष्टसाधनत्वज्ञानस्य प्रेरकत्वकल्पनेपि न कार्य
लक्षणं तत्र गच्छति · इष्टसाधनत्वज्ञापकस्येष्टसाधनेऽभावादिति भावः स्वर्गकामो यजेते

६७

स्यादेलिङादिना लोके कार्यव्युत्पत्त्यनुसारेण कार्यमवगम्यते· तच्च कार्यं धात्वर्थातिरिक्तमेव का-
म्यमानस्वर्गसाधनस्यैव तत्कामिकार्यत्वात् यागस्य च तदभावात्· तच्च शब्दात् प्रतीयमानं कार्यं
कस्य कुत्रेति नियोज्यविषयावपेक्षते कृतिसाध्यस्वरूपेण शब्दात् प्रतीयमानस्य किंविषयकृति-
साध्यं तदिति कृत्याश्रयविषययोः कृतिनिरूपकतयापेक्षितत्वात्· तत्र स्वर्गकामः कार्यस्य कृ-
तिसाध्यतयावगच्छतीति नियोगः धात्वर्थश्चाव्यवधानेन कृतिसाध्यः कृत्यवच्छेदद्वारा नियोगम-
वच्छिनत्तीति यागविषयकृतिसाध्यं तदिति प्रतीतेरिति स तद्विषयस्तदुभयविशिष्टं च कार्यं स्वर्गका-
मो यजेतेति वाक्यार्थः एवं च कार्यस्य धात्वर्थातिरिक्तस्य स्वतः कार्यत्वासंभवात् स्वस्य कृतिसा-
ध्यत्वनिर्वाहार्थं स्वविषयस्य धात्वर्थस्य कृतिसाध्यत्वमाक्षिपति· तच्च परंपरया काम्यस्वर्गसाधन-
त्वाभावे अनुपपन्नं· न हि कामी कश्चित् तदसाधनं करोतीति तदेव कार्यं धात्वर्थस्येप्सितसाधन-
त्वमप्याक्षिपत् तत्र पुरुषं प्रेरयतीति तदेवैके प्रेरकं कार्यमाहुरित्यर्थः· अनन्योद्दिष्टकृतिसाध्यत्वं-

कार्यत्वमितितदभियुक्तसंमतंलक्षणमाह॰ यानन्यमिति॰ प्राभाकराहीत्थंवदंति॰ कार्यमेवकृ
तिसाध्यस्वभावंपुरुषार्थः नतुस्वर्गादिः स्वतस्तथात्वस्यकार्यरूपेणैवतत्साध्यस्यापिगर्भदासवच्छे
षत्वादतः कार्यमुद्दिश्यैवतत्कृतिःप्रवृत्तेतिया ऽनन्यमुद्दिश्यप्रेरकत्वं॰ व्याप्यतयासाध्यतया॰ ननु
लोकेरागएवधात्वर्थगोचरप्रवर्तकोदृष्टः नकार्यंतदतिरिक्तंकिंचिद्दृष्टमस्तीत्याशंक्यतस्यराग
व्यावर्तकंरूपंतावदाह भूत्वेति पूर्वक्षणेऽस्थित्वेत्यर्थः कार्यरूपं॰ कृत्युद्देश्यस्वरूपं॰ अन्येनरूप
णसिद्धस्वरूपेण॰ अस्याः पुंप्रवृत्तेःरागोहिनिष्पन्नः सर्वत्रप्रवृत्तौकारणंनचासिद्धोरागः क्वचि
त्प्रवर्तयति कार्यंतुविपरीतं असिद्धावस्थस्यैवकृत्युद्देश्यत्वात्तस्यैवचस्वसिद्ध्यर्थं पुंप्रवर्तकत्वात्
सिद्धस्यकार्यस्यकृत्युद्देश्यत्वायोगेनतदयोगात्॰ नचलोकेरागातिरिक्तंनप्रवर्तकंदृष्टमिति
वाच्यम्॰ नतावत्फलरागस्यसाक्षाद्धात्वर्थप्रवर्तकत्वंभिन्नविषयत्वात् धात्वर्थगोचरेच्छायाश्चकृ
तिसाध्यत्वप्रकारिकायास्तद्गोचरकर्तव्यताज्ञानंविनाऽसंभवात्॰ नचसमानाकारज्ञानंविनातदा

कारेच्छा भवति तस्य च कर्त्तव्यताज्ञानस्यावलंबनांतराभावाद्धात्वर्थ एव तदालंबनमिति तदेव लोके कार्यमि
त्यभिप्रेत्याह· भिंदंतीति· भेदेनावगच्छंतीत्यर्थः· एवं कार्यान्विते गवादिपदशक्तिं निर्वाह्य लौकिकवै
दिककार्यस्वरूपं निरूप्येदानीं भागंभागस्य वाचकमिति स्वयमेव वेत्तीति प्रागुक्तं कार्यान्विते तत्तद
र्थविशेषे गवादिपदशक्तिनियममुपपादयति· आवापोद्वापहेतोरिति· नयनिपुणमतिः। नये नि
पुणा मतिर्यस्य सः। तटस्थ उदासीनः पार्श्ववर्त्ती· व्युत्पित्सुः भूयो बहुशः आलोच्यार्थान्वयमिति
शिक्षति· आवापोद्वापहेतोः इदं गवादिपदममुकस्य गोत्वादेः कार्यान्वितस्याभिधाने कथने स्वोत्पत्ते
वस्वभावत एव समर्थमिति भागशः प्रतिपदमिमं शक्तिप्रतिनियमं प्रतिपदार्थनियतशक्तिं कार्य
मुक्तेर्वक्तुर्विजानातीति संबंधः· पार्श्ववर्त्ती व्युत्पित्सुर्हि मध्यमवृद्धस्य प्रवृत्त्या प्रवर्त्तकं गवाद्यान
यनकार्यताज्ञानमनुमाय तच्च गामानयेत्यादिवाक्यस्यान्वयव्यतिरेकाभ्यां कारणत्वमनुमाय तद्वाक्य
तद्वाक्यस्य तस्मिन्प्रवर्त्तके संमुग्धतया शक्तिमवगच्छतीत्युक्तं· तदनंतरं गां बधानेत्यादिप्रयोगांतरे गोप

दस्यावापोद्वापयोगेनतदर्थंभागवगतंपदद्वयन्वत्समानमेतिप्रयोगांतरेतदभावात्तदर्थेचापद्रूपन्नन्वयव्यति
रेकाभ्यांगोपदंयत्किंचित्कार्यान्वितगोत्वेशक्तंकार्यसामान्यस्याव्यभिचारात्· एवमानयनादिपद
मपियत्किंचित्कारकान्वितानयनादौ· एवंकारकपदांतरंक्रियापदांतरमपितत्तत्पदावापोद्वापाद्
तोस्तत्तत्कार्यान्वितेर्थेशक्तमितिप्रतिपदंशक्तिप्रतिनियमंजानाति प्राथमिककार्यान्वयार्थेति
गृहीतसंगतिभंगप्रसंगेनकेवलेवस्तुनिसंगतिग्रहायोगात्· सोयंनयनिपुणमतिरित्यनेनोक्तो
नयः· अन्यापिप्रवर्तकवाक्याधीनाव्युत्पत्तिः प्रवर्तकंचकार्यज्ञानमित्येवमादिनयः भूयोस्त्यालो
च्येतिदर्शितं· ततोन्यायसिद्धगवादिपदानांकार्यान्वितेशक्तिरितिवेदांतानामपिकार्यशेषएव
ब्रह्मणिप्रामाण्यमित्यर्थः· नन्वेस्त्वेवंगवादिपदानांशक्तिग्रहः कार्यपदस्यकथंशक्तिग्रहः॰ नि
योगस्यमानांतरागोचरतयातत्रलिङादेःशक्तिग्रहायोगात्· नचलिङादिनैवोपस्थितेतस्मि
न्शक्तिग्रहइतिवाच्यं· शक्तिग्रहात्पूर्वंलिङादेस्तदुपस्थापकत्वायोगादित्याशंक्यप्राभाकरा

९६

णां मतभेदेन लिङादिसंगतिग्रहप्रकारान्दर्शयति तत्र लोके आज्ञादय एव प्रवर्तकाः । वेदे तु स्थायिका
र्यं प्रवर्तकं उभयत्र च प्रवर्तकसामान्यमेकमस्ति तत्र लिङादेः संगतिग्रह इति केचित्तन्मतमाहुः ।
आज्ञादीति · उत्कृष्टस्य पुरुषस्य निकृष्टपुरुषप्रेरणा आज्ञा आदिपदेन या अनिकृष्टस्य उत्कृ
ष्टप्रेरणा गृह्यते · प्रवर्तकत्वं शब्दाभिधेयत्वयोग्यप्रवृत्त्यभावस्य विरोधिमात्रं प्रवर्तकसामान्यं · एवं
च गोत्वादिसामान्यवच्छक्तात् गवादिपदात् व्यक्तिरिव लिङादिपदादभिहितप्रवर्तकसामान्याप
र्यवसानादाज्ञादयो नियोगश्चैव सिध्यतीति भावः । अन्ये तु · अस्ति लोकेपि नियोगः स च सोपाधिकः वे
दे तु स्वतंत्र एव · तत्रोभयानुगतनियोगत्वसामान्ये लिङादिसंगतिग्रह इत्याहुः तन्मतमाह अन्य
दिति · वैदिकनियोगस्य निरुपाधित्वे युक्तिमाह · अपुरुषप्रभव इति · अपौरुषेय इत्यर्थः अतस्तत्रा
ज्ञाद्यसंभवान्न नियोगस्तदुपाधिरित्यर्थः अत एव स्वतंत्रं लोके तु वैपरीत्यमाह लोक इति · पुनः श
ब्दो विशेषद्योती · विशेषमेवाह सोपाधिकमिति · वक्ष्यमाणोपाधियुक्तमिति · तत्कार्यं वदतीति संबंधः

तदुपपादनायकारणतइत्युक्तंतदेवविवृण्वन्वचांसिविविनक्तिपुरुषधीरचितेष्विति·पुरुषसंबं
धाल्लौकिकवचसामित्यर्थः लोकेकोयमुपाधिरितिजिज्ञासायामाह· आज्ञायांत्वादीति· माणवका
दिर्हिउपाध्यायाद्याज्ञादिनैवगवानयनादौप्रवर्तते·तथाचाज्ञानुपायेउपाधिर्निमित्तंतस्मिन्नप्रति
पत्तितेनसंबद्धवपुर्यस्याः फलसाधनेहायाः साऽनुबंधोयस्येतत्तु· अथवा· वपुरंतसाधनेहा
नुबंधत्वंचपृथगेवविशेषणंतस्यवैदिककार्याद्विलक्षणत्वांतरमप्याह· विज्ञातोपायभावस्मिन्निति
नियोगप्रतीतेः प्रागेवहितोपायत्वमवगतंतंविषयंधात्वर्थमनुसरन्त्वर्थोयत्फलसाधनत्वे·
नप्रागवगतस्तदनुसरत्तदनुकूलंनतुधात्वर्थस्यतदधीनंफलसाधनत्वमित्यर्थः· कार्यमितिपू
र्वस्माल्लौकिकादनुपजनीयंभवति विशेषः· पौरुषेयीषुवाक्षु आज्ञायामित्यादिसंबंधः।वेदेनिरूपा
धिनियोगानुपपत्तिमित्युक्तमुपपादयति· कर्तुस्यरागादीति· वेदेकर्तुरागाद्युपाधिरहितमित्यर्थः।कु
तइत्यतआह कर्तृशून्यइति· अपौरुषेयेवेदेकर्तुरभावात्तदाज्ञा दिकमपिनास्तियस्मात्तत्तत्रे

१०

रूपाधिकमित्यर्थः नन्वेवं लोकवेदयोर्नियोगवैलक्षण्ये कथं लिङाद्यर्थैकत्वं तत्राह ततोस्मिन्सर्वत्रेति
लोकवेदयोरेकस्वभावतया नियोगरूपेणास्थितत्वपुषितस्मिन्नियोगे नियोगत्वे इतियावत् · लिङा
दिर्लब्धशक्तिर्भवेदिति तदैकार्थ्यं युक्तमितिभावः अभिनवगुरुमतमाह अन्यइति · विविधमित्य
स्य विवरणं भिन्नस्वभावमिति · आनुरूप्येण योग्यतामहिम्ना हे विध्यमिचाह लोकइति संमुग्ध
धात्वर्थनियोगत्वरूपेण विवक्षितविशेषे तत्र कार्यमात्रे आदितः प्रथमतः · न्यायचक्षुः वृद्धि
मार्नैन्यायज्ञः तमेव न्यायं दर्शयति धात्वर्थेति · लोके हि प्रवर्तकवाक्यात्कार्ये प्रथमं लिङादेः स
गतिग्रहः कार्यं च लोकवेदयोर्विलक्षणं · न च लिङादेरनेकार्थत्वं न्याय्यं · न च कार्यत्वसामान्यं लि
ङ·र्थइति नोक्तदोषः तदपर्यवसानाच्चैकार्थ्यं श्रुति तिर्गवादिपदात्तु गवादेरिवोभयत्रापि भविष्यती
ति वाच्यं · वैदिकस्यालौकिककार्यस्य गवादिव्यक्तेरिवानुपलब्धार्थत्वात् मानान्तरेणाभिधेयसामान्यसं
बधितयावगतस्यैव गवादेरेवापर्यवसानलभ्यत्वाच्च · तस्मादेकत्र लिङ् · रस्य लौकिकी निकुब्जलक्षण

कुत्र शक्तिरिति विचारणीयं यदि धात्वर्थे लिङादिपदं शक्तं तदा गुणत्वलक्षणया वैदिके कार्येऽप्ययं लि
ङादिर्विवर्तितुमनलमसमर्थः कुतः संबंधाज्ञानहेतोः वाच्यार्थसंबंधितया मानांतरावगते तीरादौ गंगा
दिपदस्य लक्षणा दृष्टा· न च धात्वर्थसंबंधितया वैदिककार्यं मानांतरेणावगतं· अपूर्वत्वरूपस्य तस्य तद
योगात्वात्· अतः संबंधाज्ञानात्तस्मिन् लिङादिपदस्य न लक्षणेत्यर्थः। अथ यदि शक्तिमान् स्यात्
अयमित्यनुषंगस्तत्संबंधान्मुख्यार्थनियोगसंबंधात्· क्रिया· धात्वर्थ· यदि लिङादिना वैदिककार्य
मभिधीयेत तदा विषयभूतधात्वर्थसंबंधितयैव लिङादिनाऽभिधानाद्वाच्यार्थसंबंधितया ज्ञाते धा
त्वर्थे लक्षणा युक्ता· यद्यपि लौकिकी क्रिया न तत्संबंधितयाऽवगता· तथापि· तत्संबंधिधात्वर्थजा
तीयते तत्रैव लक्षणा· वैदिककार्यं तु लोके संगतिग्रहणकालेऽनवगतेऽपि कामी नियोज्यसमभि
व्याहारादवगते शक्तिरेवोचितेत्याशयेनाह· तेनेति ॥१५९॥ ननु लिङादिपदसमभिव्याहारम
तरेणापि अभिन्नकमलोदरे मधूनि मधुकरैः पिबतीत्यादौ प्रसिद्धपदसमभिव्याहारेण मधुकरा

तत्राह वाक्यादिति॰ भूतार्थनिष्ठाद्वाक्यान्नृणां शब्दशक्तिग्रहतीति नैवं भवति कुतः नियतलिंगाभावे
नतदर्थज्ञानानुमानासंभवादित्याह लिंगमिति॰ अत्रश्रोतरि॰ लोके वा॰ ननु उक्तं पितुर्मुखप्रसादादि
लिंगमिति तत्राह नह्येतदिति॰ एतच्छब्दार्थमाह यद्वक्ष्यादीति॰ क्षितितलुठनादिलौकिककार्यत
त्पुत्रस्तेमृत इत्यादिवाक्यार्थज्ञाने लिंगमिति यदुक्तं तं प्रत्युक्तं मुखप्रसादादेर्भार्यासुखप्रसवधन
प्राप्तितद्वियोगादिज्ञानादपिसंभवेन पुत्रजन्माद्यसंगतिर्नैयत्याभावेन ततस्तदनुमानास
भवान्नसिद्धान्वितः शब्दार्थ इति भावः तस्माल्लोके सर्वपदानां कार्यान्वित एव संगतिग्रह इ
ति वेदेपि तेषां स एवार्थो न्याय्यः लोकवेदयोः पदतदर्थभेदासंभवात्॰ एवं च वेदांतानामपि का
र्यान्वित ब्रह्मणि प्रामाण्यं वक्तव्यमिति न कार्यशून्ये स्वप्रधाने परब्रह्मणि कथमपि प्रामाण्यं
संभवतीत्याह तस्मादिति॰ श्रुतिशिरसि निराकांक्षप्राधान्यं भवतीति संबंधः। किंच तद्भूतानांक्रि
यार्थेन समाम्नायः भूतभव्य समुच्चारणे भूतं भव्यायोपदिश्यत इति जैमिनि शाबरस्वामिनोर्मत

दिपदानां शक्तिर्गृह्यते· तत्र कुतः सर्वपदानां कार्यान्विते शक्तिरित्यत आह एवमिति· शब्दांतराणां भ्रम
रादिशब्दानां शक्तिविद्भवतीति संबंधः सः व्युत्पित्सुः· तत्रापि हि प्रवर्तकवाक्यात्कार्ये गृहीतसंगतिक
पदप्रयोगादेव भ्रमरादिपदानां शक्तिग्रह इत्युपजीव्यकार्यव्युत्पत्त्यनुरोधेनाध्याहृतकार्यान्वित एव त
दर्थ इति· जानातीति· नास्तिकश्चिद्व्यभिचार इत्यर्थः। तदिदमुक्तं नयनिपुणेति· प्रक्षेपोद्धारदृशे· भ्रम
रादिपदप्रयोगस्य तत्र तदितरपदाप्रयोगस्य च दर्शनेत्यर्थः। तत्र तत्र· कार्यान्वित इति शेषः· फलितमाह
तस्मादिति· भूताद्यर्थेति· भूतमतीतं· आदिपदाद्वर्तमानभविष्यतोर्ग्रहणं· शास्त्रे नो भूताद्यर्थवती
तिं प्रतीति संबंधः४· ननु न प्रवर्तकवाक्याधीनं प्राथमिकसंगतिग्रहो येनैवं स्यात्· किंतु पुत्रस्ते जात इत्या
दिवाक्यादेरपि प्रथमं संगतिसंवेदनं स्यात्तच्छ्रवणानंतरं पितुर्मुखप्रसादादिलिंगेन पार्श्वस्थस्य
श्रोतरि तद्वाक्यार्थज्ञानोन्नयनसंभवात्तत्र वाक्यस्यान्वयव्य तिरेकाभ्यां कारणत्वावगमसंभवाच्चा
न्वित एव पदानां शक्तिरस्तु· नापि योग्यतादिमहिम्ना ऽन्विते गृहीतसंबंधानां कार्येदमर्थ्यमिति

तोचवेदार्थनिर्णयेधिकृतावितितदुक्तमेवग्रहीतुमुचितमित्यभिप्रेत्याहभूतमितिसिद्धमित्यर्थः।भव्यंसा-
ध्यंप्रधानंयस्यभव्यशेषमित्यर्थः स्वप्रधानंनेभव्याऽनन्वयियच्छास्त्रप्रतिपाद्यइत्यर्थः।गुणस्तस्याःजै
मिन्यादयः।एवमाहुः।एवमित्येताहिवृत्तंभूतंभव्येत्यादिना·शब्दशक्तीति·वैदिकशब्दशक्तिव्यवस्था
यांनिपुणधियः।ऽप्रबाधितमतयइतियावत्·एवंवर्णितन्यायबलात्जैमिनिमताद्विवचनबलाच्चकार्या
न्वितेश्रुतितात्पर्यमित्यद्वयस्वप्रधानब्रह्मणोवाक्यप्रमाणकत्वंभवदुक्तमसंगतमितिपूर्वपक्षमु
पसंहरति·तस्मादसंगतमिति·इदंशब्दार्थमाह·यद्वाक्यप्रमाणकमिति·एवंविधपूर्वपक्षकरणे
नेत्वस्मिन्गुरूणांबुद्धिस्थितत्वभ्रममपनयन्प्रार्थयतइत्येवमिति एवमुक्तप्रकारे विरोधः वेदान्ता
नांब्रह्मणिप्रामाण्यासंभवः समबुद्धिपथंप्राप्तोऽतोममैवबुद्धिदोषा । दसंगतमिवभवदुक्तंवाक्यप्र
माणमद्वयंप्रतिभातिनतुभवताऽसंगतमुक्तमित्यर्थः।प्रभोइति । तत्परिहारोक्तिरेरनायासंद्योत
यति·एवंविरोधं।१४५।एवंजगत्यगभिन्नेऽद्वयेप्रधानेब्रह्मणिवेदान्तप्रामाण्यासंभवेचोदितेकिंजी

वत्रह्मणोस्तत्त्वंपदवाच्ययोरभेदोनसंभवतीतिचोदयसि· उत· तदुभयलक्ष्ययोः तत्राद्यमंगीकरोति·
सत्यमिति· यदाह· भवानितिशेषः। गरुमान्· शिक्षितमतिः। अन्यस्यसूक्ष्मेर्थेएवंविधाक्षेपायो
गात्· संसर्गरूपंमंत्र्यार्थयोस्तादात्म्यं· अंगीकृतमेवदर्शयति·। । अस्त्येवेति। तत्र· वाच्यार्थाभे
दे· ननुसंसर्गोवाविशिष्टोवावाक्यार्थइतिविद्वद्भिरंगीकृतमिति· वेदांतवाक्यस्यापितदन्यतरो
र्थः स्वीकर्तव्यस्तत्रचेत्परतदर्थयोर्विरोधअंगीकृतः कथंतर्हितद्वाक्यार्थःसिद्ध्येदित्याशंक्यवे
दांतव्यतिरिक्तानामेवार्थस्तथाभ्युपेयः· ननुवेदांतानां· वेदमात्रस्यवाऽतस्तद्विरोधोत्रनदोषा
येत्याह· यत्कर्मकांडनिपुणैरिति· यद्वाक्यार्थलक्षणमितिसंबंधः। पुरस्तात्· पूर्वतंत्रे· अदः· तल्ल
क्षणं· अत्रवेदांते· वाक्यविशेषार्थलक्षणंवाक्यविशेषार्थोऽनंगीकृतंचेत्तर्हिकाक्षतिः। ननुवा
क्यार्थसामान्यलक्षणमेवतदस्तु· अन्यस्यसामान्यलक्षणस्याऽसंभवात्· अन्यथावेदांतवा
क्यविशेषस्यकीदृशोर्थःस्यादितिलक्षणांतरासंभवमन्वानंप्रत्याह· भेदादीति· भेदःसंसर्गःआ

द्विपदाद्विश्लिष्टग्रहणं · अखंडं · अपर्यायानेकपदप्रतिपाद्यं असंसृष्टमेकप्रातिपदिकार्थमात्रं वा ·
उक्तंति · कमनीयतया कथयंति यस्माद्भेदादीति संबंधः । श्रीवादरायणमतानुगनाइति · भगवान्वादरा
यणः खलु तत्तु समन्वयादिति सूत्रेण खंडैकरसे ब्रह्मणि वेदांतप्रामाण्यमन्यूनमुपपादयत् · अतस्तन्म
तानुसारिणः शंकरभगवत्पादास्तच्छिष्याश्च तथैवोचुरिति वेदांतवाक्यार्थलक्षणोत्तरासंभव
वादरायणमतानुगतानामहत्त्वपक्षपातराहित्येनैव विचारकौशल्यं · नापि सामान्यलक्षणासंभ
वः वाक्यप्रतिपाद्यत्वस्यैव तत्सामान्यलक्षणं न संसर्गादिरूपमननुगमादिति भावः · ननूक्त
वाक्यार्थलक्षणभेदव्यवस्थायां किंमानमित्याशंक्य तत्र हि वाक्याद्यतिस्यात्तस्य वाक्यस्य तात्प
र्यग्राहकं प्रमाणं भवेत्तत्र प्रमाणमिति श्लोकद्वयेनाह · तत्र प्रथमं यत्कारुनिपुणैरित्यनेन भे
दवाक्यार्थस्योक्तं लक्षणं स्वीकरोति · भेदादिति · लौकिकं गामानयेत्यादि · वैदिकं अग्निहो
त्रं जुहोतीत्यादि च · अत्रोक्तविषये भेदादिरूपे वाक्येनास्माकं कदाचिदपि विमतिरस्ति · न

अपर्थ

ह्वित्यसनिनयाखंडार्थत्वंवयमिच्छामइतिभावः इदानींभेदादिवर्जितमित्यनेनकथितं·वेदांतवाक्या
र्थस्वरूपंसोपपत्तिमुच्यतइत्याह· यद्वाक्येति· अथेतिपक्षांतरोपक्रमार्थः।वेदांतेषुनिर्दिष्ट·
सत्यंज्ञानमनंतंब्रह्म तत्त्वमसीत्यादिवेदांतवाक्यं· लौकिकंप्रकृष्टप्रकाशश्चंद्रः· सोयमित्यादिवा
क्यं· अन्यद्वस्तुवदितुंनशक्नोतितदग्रेषमखंडमेवब्रूयादित्यनंतरमेवोपपादयिष्यतइत्यर्थः।
ब्रह्मास्मीतिवेदांतवाक्यं· द्विविधमेकमहंकारादिसाक्षिणः प्रत्यक्चैतन्यस्यनिरतिशयानंदाद्वयनि
त्यमुक्तब्रह्माभेदपरंपरोयथातत्त्वमसीत्यादि· एतच्चपरमपुरुषार्थप्रत्यक्ब्रह्मैक्यनिष्ठत्वान्म
हावाक्यं· अपरंतत्त्वंपदार्थस्वरूपपरं· यथाविज्ञानमानंदंब्रह्म· योयंविज्ञानमयः प्राणेष्वित्यादि·
एतच्चपदार्थनिष्ठत्वादवांतरवाक्यं· तत्रमहावाक्यस्याखंडार्थत्वे· लोकेपिसोयमितिवाक्यमु
दाहरणं· इतरस्यप्रकृष्टप्रकाशश्चंद्रइति· तत्रसोयमितिवाक्यस्याखंडार्थत्वंप्रमाणाभावान्ना
स्तीत्याशंक्याह· सोयमिति· मुख्यपदार्थेति· तदिदंशब्दयोर्यौमुख्यार्थौतदेतद्देशकालवैशिष्ट्य

नृपतत्तेदंताविशिष्टो· तद्धकस्तन्निरूपितोयोवाक्यार्थः अभेदस्तद्बुद्धिजननस्येतत्सोयमितिवाक्यंने
शीतेतिसंबंधः। सोयमितिवाक्येहिं स्वसमानाधिकरणवाक्यत्वादेकार्थनिष्ठंवाच्यं· तत्रयदिमु
ख्य। पदार्थयोरेक्यं· तदातद्देशकालविशिष्टद्वयस्यविरोधेनाभेदासंभवादिति· इदंवाक्यंतत्प्रतिपाद
यितुमसमर्थमितिभावः। ननुदेवदत्तस्यतत्तेदंताभ्यामुक्तरूपाभ्यांसंसृष्टः। देवदत्तेतत्तेदंतेइतिवा· वा
क्यार्थोस्तुनविरोधइतितत्राहवाच्यमेवलेति· वाच्ययच्छवलंविशिष्टंतन्निष्ठपदद्वयेनेस्यर्थः। सः अ
यमितिपदाभ्यांतत्तेदंतयोः पुरुषविशेषणतयोपस्थितयोः स्वातंत्र्यासंभवेन पुरुषेचप्रथमांतपदेनोप
स्थितेसप्तम्यर्थासंभवेनचोक्तप्रकारद्वयासंभवः। किंचदेवदत्तेतत्ते दंतेइतिज्ञानेननभेदभ्र
मनिवृत्तिः संभवति· इदंचवाक्यंतदर्थमेवदृढहेतुः प्रयुज्यते· देवदत्तभेदेपितत्संभवात्· नचैकस्मिन्
देवदत्तेतत्तेदंतेइतिज्ञानाद्भेदभ्रमनिवृत्तिसंभवइतिवाच्यं· समानाधिकृतपदद्वयव्यतिरेकेण
तदेकत्वेप्रमाणाभावात्· तस्मादर्थांतरासंभवाद्वाच्यशवलस्थपदद्वयेनसंसृष्टबुद्धिजननमेववाच्यं

तच्च न संभवति · पदयोर्विरुद्धत्वादित्यर्थः · अस्तुतर्हि एकस्मिन्नेव पदे लक्षणा · तथा च न विरोधः प्रति-
योग्यंतराभावात् · नाप्यखंडार्थता · देवदत्ते एकस्य विशिष्टस्यानेन तादात्म्यप्रतिपादनात् इत्याशं-
क्याह एतद्वीति · अखंडनिष्ठं पदद्वयं लक्षणयेति शेषः · अत्र · अस्मिन्वाक्ये · गतिः त्वदुक्तप्रकाराव
गतिः कुत इति चेत्तत्राह तद्देशकालेमिति · सइत्यनेन सइतिपदेन तद्देशकालविशिष्टमनु
रूप्यादायायंपदार्थं · अयमितिपदस्य लक्षितमर्थं नोपढौकयन्ते प्रापयितुं न शक्नोतीत्यर्थः । सोय
मितिवाक्यमिति शेषः । द्वीतिदृष्टांतार्थं · यथा तत्पदस्य वाच्यं इदंपदलक्ष्येन प्रापयति · एवमेतत्पद
मपि स्ववाच्यं नोपढौकते · तत्पदलक्ष्यमिति शेषः । एकपदलक्षितस्वरूपस्य पदांतरवाच्यात्भे
दनिष्ठत्वे वाक्यस्य यावद्देवदत्तस्वरूपविशिष्टमेवस्यात् · अन्यथा वर्तमानसमयस्थदेवदत्ते तद्दे
संज्ञायादिनिवर्तकता ऽस्य वाक्यस्य न स्यात् । निवर्तते चास्माद्वाक्यात् ॥ तत्संज्ञयादिरिति पदद्वय
लक्षणया तदेतद्देशकालद्वयहानि देवदत्ता ऽभेदपरमितीदं वाक्यमखंडार्थनिष्ठमेव · न चैवं तत्त्व

रूपस्यैकैकपदादपिप्रतीतेरेकपदार्थज्ञानादपितन्निवृत्तिप्रसंगः· वक्तव्यंवापदार्थस्वरूपादधिकं
वाक्यप्रमेयं अन्यथावाक्यादपितदयोगादितिवाच्यं· पदद्वयलक्ष्यवाक्यार्थयोरन्यूनाऽनतिरिक्तत्वेपि
वाक्यात्तद्देशकालपरामर्शपूर्वमखंडदेवदत्तस्वरूपाऽभेदप्रतिपादनेभवतितज्ज्ञानेनिश्चयरूपम·
अतस्ततःसंशयादिनिवृत्तिरुपपद्यते· नैवमेकैकपदलक्ष्यज्ञानमितिनततःसंशयनिवृत्तिःए
वंचसोयमित्यादेरर्थांतराऽसंभवादबाधाच्चाखंडार्थतैवेतिभावः॥ ॥१५१॥ ॥दार्ष्टांतिकेपि
तदाह· एवंसतीति· लोकेपदद्वयलक्षणयासोयमितिवाक्यस्याखंडार्थत्वेसतीत्यर्थः। तथाचना
स्माकमलौकिककल्पनेतिभावः लाक्षणिकवृत्तिंपदद्वयेपीतिशेषः तत्त्वमसीतिवाक्यमखंडार्थ
निष्ठं· अकार्यकारणद्रव्यमात्रविषयसमानाधिकरणवाक्यत्वात्· यच्चासोयंपुमानितिवचनमि
त्यान्वयेनदृष्टांतमाह· सोयंपुमानिति· तथाइदंतत्त्वमसीतिवाक्यमखंडधीनिष्ठमस्त्वितिसंबंधः
पदद्वयलक्षणयाऽखंडार्थत्वानंगीकारेपूर्वपक्षदशायामुक्तवाक्याप्रामाण्यमाह तावदिति· अति

शुष्कं अच्छिद्रं केवलमलाबु अप्सु निमज्जतीति वचनं यथाऽप्रमाणं तथेदमपीत्यादित्यर्थः तत्त्वमसी
तिवाक्यस्यापि वक्ष्यमाणविरोधेन संसर्गादिवाक्यार्थासंभवेन पदद्वयलक्षणयाऽखंडार्थत्वबोधि
तेति भावः। एतेनासिद्धांतोपक्रमे उत्तानदुभयलक्ष्ययोरिति द्वितीयविकल्पे विरोधबीजाभावात्त
च्चोद्यमनुपपन्नमित्युक्तमिति द्रष्टव्यं· यत्तु· पूर्वपक्षावसरे वाच्यार्थसंबंधितया मानांतराधिगति
लक्षणाबीजमिति तथाऽनवगते ब्रह्मणि न लक्षणा स्यादित्युक्तं तदनूद्य दूषयति· मानांतरेति·
अधिगतेति भावे निष्ठा गतिरित्यर्थः प्रलापोऽसदभिलापः ननु लाक्षणिकपदस्य लक्ष्येन साक्षा
त्संबंधानवगमात्स्वार्थप्रणाड्यैव तदुपस्थापकत्वं वाच्यं· तच्च मानांतरेण तथाऽवगमं विना नेति
कथमयं प्रलाप इति चेत्। सत्यं। मानांतरं विनापि तदर्थसंबंधितयाऽवगममात्रेण सा सिध्यतीति· स
चावगमस्त्वहमादिपदलक्ष्येऽहंकारादिसाक्षिणि स्वप्रकाशे तद्बलात्सिद्ध इति· ब्रह्मादिपदलक्ष्यं
चाद्वयं ब्रह्मादिपदवाच्यं एवं वस्तुतः स्वसंसर्गशून्ये चैतन्ये कल्पितं एवं लत्वादध्यस्तत्वाद्धि· एव

लां तरवद्रजतादिवदिति तर्केण तत्संबंधितया सिध्यतीति न मानांतरापेक्षेत्याह सिद्धत्वेति ज्ञातत्वमा
त्रमित्यर्थः। इह लक्ष्ये नतु तीरादेर्गंगादिपदलक्ष्यस्य मानांतरेण तथाधिगतिर्नियमेन दृष्टा तत्कथंसा
तत्राऽप्रयोजिकेति चेत्तत्राह मानांतराधिगतेति हीतिद्वयं प्रसिद्धौ किंचित्करीनभिमित्तंनभवतीतितिसं
बंधः नियमेन तत्र विद्यमानस्यापि गौरवेणाऽप्रयोजकत्वे दृष्टांतमाह तावदिति अग्रेरूपमिवकिंचित्क पिंगल ४
रीनभवतीति संबंधः। दृष्टांतं विवृणोति धूमस्येति नहेतुरिति संबंधः अग्नित्वमेवादिधूमजनकतायाम
ग्नेः प्रयोजकंनतुपिंगलाग्नित्वमपि गौरवादितिभावः॥ शुक्तिरजतादेरपीदमित्यादिपदांतरेणतस्या
वगत्यभावान्नमानांतरगम्यत्वं तत्प्रयोजकमिति भावः॥ ननुब्रह्मात्मादिशब्दानां अन्यत्रसंगत्यसंभवा
त्तत्रैवशक्तिः कल्पनीया एवंचकथं तत्रैव तेषां लक्षणा तच्छक्यपदलक्षितार्थोपादानेचेदमपिब्रा
स्त्रमनात्मनि ष्टं स्यादित्याशंकां परिहर्तुं लक्षणात्रैविध्यमाह॰ अथवा लोके लक्षणाऽनेकविधा तं
त्रकासोलक्षणा तत्त्वमसिवाक्ये संमतेत्याशंक्यतां विविक्तुं लोकप्रसिद्धभेदंमत्वाह शब्दस्येति एषालाक्ष

णेकदृत्तिरितिसंबंधः त्रैविध्यमेवाह काचिदित्यादिना काचिद्वाच्यंजहातिजहल्लक्षणेत्यर्थः अन्यावाच्यं
नजहाति अजहल्लक्षणेत्यर्थः अन्यो भागंवाच्यार्थैकांशंजहाति अन्यंभागंनजहातिचजहदजहल्लक्षणे
त्यर्थः तत्त्रैविध्यमुपसंहरतिसोयमिति लोकेक्रमेणतासामुदाहरणमाह गंगापदमितिपदंहियेन
निजमर्थस्ववाच्यप्रवाहं अघास्यत्यक्त्वा यत्तस्माद्घोषाः श्रोणिमगणाः अश्वत्थानियताः। सोयमिति उ
भयप्रकाराजहदजहद्रूपा तदेवोपपादयतिदेशादीति तदेतद्देशकालवैशिष्ट्यरूपभागवर्जनात्केवलंय
थास्यात्तथा। तदिदंपदाभ्यांपुंसउपात्ततयाचेत्यर्थः उपसंहरति एवंत्रिविधेति गंगायांघोषइत्यत्रहि
वस्तुतोगंगासंबंधियत्तीरं घोषान्वययोग्यंतदेवलक्षणयाप्रतीयते ततुगंगाविशिष्टतीरंतस्यतेनरू
पेणघोषान्वयायोग्यत्वात्ततोगंगापदेजहल्लक्षणैव एवंबहिःश्रोणास्ति इतीत्यादौनिकृष्टद्रव्यगुण
मात्रस्यबहिर्देशस्थित्यनुपपत्तेः श्रोणगुणविशिष्टस्यैवाश्वस्यनियमेनास्थित्यवगमात्साऽजहल्लक्ष
णा। स्वार्थमुपादायैवतस्यद्रव्येवृत्तेः सोयमित्यादौतुप्रागुक्तन्यायेनाऽभेदविरुद्धदेशादिपदार्थभाग

परित्यज्य धर्मिस्वरूपं पदार्थभागमुपादेयं वाक्यमभेदं प्रतिपत्स्यतीति तत्र साजहदजहत्स्वरूपेति लाक्ष
णिकी वृत्तिस्त्रिधा भवतीत्यर्थः। एवं वेदेऽपि तत्त्रैविध्यमुदाहरणेनाह वेदेऽपीति· यज्ञायुधी यजमानः स्वर्ग
लोकमेतीति वाक्येऽस्येष्टिप्रकरणस्थेऽग्निहोत्रकपालादिपात्रैर्विशिष्टो यजमानः स्वर्गं गच्छतीति प्रतीय
ते· तदनुपपन्नं· अग्निहोत्रपात्राणां प्रत्यक्षेणैव दाहात् यजमानस्याग्निहोत्रकपालादियज्ञायु
धविशिष्टस्य स्वर्गगमनायोगाद्यज्ञायुधीशब्दस्तस्मिन्स्वार्थं परित्यज्य प्रवर्तत इति सा जहल्लक्षणा
मत्वर्थप्रत्ययस्य संबंधमात्रनिष्ठत्वमभिप्रेत्य संबंधिनि यजमाने जहल्लक्षणेत्युक्तं· अन्यथा य
स्य कस्य चित्स्वर्गगमनाभावे यज्ञायुधसंबंधिनो वक्तव्यं· तथा च यथाकथंचित्स्वैरूप्यापत्तेः। विशि
ष्टात्केवलमन्यदित्याशयेन वा· जहदजहद्वृत्तिः जहदजहल्लक्षणावृत्तिः। वैश्वानरादिवचनेष्विति। प्रा
देशमात्रमभिविमानमात्मानं वैश्वानरमित्यत्र वैश्वानरशब्दो जाठरेऽग्नौ रूढस्तदवच्छिन्ने आत्म
नि वर्तते· अन्यथात्मानं वैश्वानरमिति सामानाधिकरण्यायोगात्· तथा च स्वार्थापरित्यागे

नसहात्मनिवर्ततइतितस्यतत्राजहल्लक्षणा·आदिशब्देनस्वष्टीरूपंदधातीत्यत्रस्वष्टस्यस्वष्टीएकारश्चव
र्तमानत्वस्वष्टिशब्देनगृहीतः।तत्त्वंगिरोरिति।तत्त्वमसिवाक्यस्थतत्त्वंपदयोरित्यर्थः।उभयरूपतया·ज
हदजहत्तद्रूपतया·पदद्वयार्थप्रभेदविरोधिविशेषणांशपरित्यागेन।परोक्षचैतन्याद्वयानंदप
दद्वयेप्रवृत्तेः भागजहदजहल्लक्षणेत्यर्थः एतेनब्रह्मात्मनिरुक्तब्रह्मादिपदस्यकथंतत्रलक्षणा·ब्र
ह्मादिपदलक्ष्यस्यस्वरूपस्वार्थत्वमिदमपिनिरस्तंमनात्मनिःक्षिपेदितिपदगुणद्वयंपरिहृतम्·शबलेब्र
ह्मणिगृहीतसंगतिकस्यशुद्धेब्रह्मात्मनिलक्षणोपपत्तेरिति।ननुकथंतर्हिब्रह्मशब्दस्यपूर्णब्रह्मा
र्थत्वंब्रह्मातिरिक्तस्यसर्वस्यपरिछिन्नत्वेनतच्छब्दवाच्येपूर्णतानुपपत्त्यासंभवादित्याशंक्याह
ब्रह्माज्ञानेनेति·ब्रह्माश्रयविषयाज्ञानइत्यर्थः।द्वियस्माद्ब्रह्माज्ञानेएकमद्वितीयत्वमस्तितस्य
सकलप्रपंचविवर्ताश्रयतयाब्रह्मणएवध्वस्तत्वेनतदंतर्भूततयाचसजातीयादिभेदशून्यत्वात्·
ब्रह्मणिशुद्धेचान्यदद्वितीयत्वमस्ति·तदतिरिक्तस्यसर्वस्यमिथ्यात्वेनजीवानांचतन्मात्रत्वेन

सजातीयादिभेदशून्यत्वात्· तत्संपर्कात्तयोः परस्परमधिष्ठानाध्यस्तत्तया तादात्म्यात्संवृत्तेस्तत्र तदुभयात्मके
शबले ऽन्याऽद्वैततास्ति· अद्वितीयात्मकस्य तस्याप्यद्वैततानियमात्· एवं सति ब्रह्मशब्दस्य वेदांतेषु जग
त्कारणे वृद्धैः प्रयोगात् जगत्कारणत्वस्य केवले ऽसंभवात् मायां तु प्रकृतिं· देवात्मशक्तिमित्यादिवचने
र्ईहितिशबलेव्युत्पत्तिरविरुद्धेत्याह व्युत्पत्त्येति। एवं महावाक्यस्थब्रह्मादिपदवाच्यशबलं तत्र शब्दस्य
शक्तिं व्युत्पत्तिं च दर्शयित्वा तद्वाक्यस्थाहमादिपदवाच्यशबलं तत्राहमादिपदसंबंधग्रहं च दर्शयति·
प्रत्यगभावइति· अंतरत्वमितियावत्· वुद्धौ अंतःकरणशरीरेंद्रियाद्यपेक्षया हि तदधिष्ठानं तःकरणमात्र
मित्यर्थः। अन्यः आपेक्षिकादंतःकरणं नैष प्रत्यक्त्वाभ्यां क्त्वः प्रतीचि साक्षिणि तस्य प्रत्यगात्मा सर्वांतर इति
श्रुतेः सर्वांतरत्वमन्यः प्रत्यगभावोस्तीत्यर्थः। तदुक्तं। ताभ्यां प्रत्यक्त्वाभ्यां क्तत्व ॥ तत्र· तदुभयेशबले·
अन्यः ताभ्यां प्रत्यक्त्वाभ्यामन्यः प्रत्यगभावोस्तीत्यनुषंगः। ततः किं तत्राह· व्युत्पत्त्येयमिति· तत्र शबले
आत्मेति शब्दः। त्वमहमादिशब्दः। यद्यप्यहमादिशब्दसंगतिर्यह समये तद्दर्थशबलत्वं न प्रतीयते तथा

पितस्मिन्विचारकालेतत्सिध्यतीतिवक्ष्यति· ततस्तदापितदुभयात्मकमेवेत्येवमुक्तं· एवंपदद्वयवाच्यशब
लेतत्रब्रह्मादिपदसंगतिग्रहंचोक्त्वावाक्यस्यजहदजह ल्लक्षणयाऽखंडार्थप्रतिपादनप्रकारमाह·
तच्छब्दवाच्यगतमिति। वाक्यार्थेऽविरोधमपेक्ष्यमाणेऽधिकारीतच्छब्दवाच्यशबलगतंप्रविष्टएकमद्वयमं
गंपारमार्थिकाद्वयभागंत्वंशब्दवाच्यशबलस्थप्रत्यक्त्वंसर्वांतरंचजहदजहल्लक्षणयोपाददानोऽनंतरंतत्व
मसीतिवाक्यादखंडंविद्यादितिसंबंधः। ननुतत्त्वंपदयोरेकार्थत्वमनुपपन्नं· तथासतिपर्यायतापत्तेस्त्वंतभि
न्नार्थत्वेचसामानाधिकरण्यायोगादितिभेदाऽभेदनिष्ठंतद्वाक्यमित्याशंक्याह· भागेद्वयेति· तात्पर्यविष
येलक्ष्येअपरोक्षचैतन्याद्वयभागइत्यर्थः। अलुप्तोचापि· ईषदपि· चैतन्यानंदयोरभेदात्· अन्यथाऽनं
दस्याभानप्रसंगात्चैतन्यैकाकल्पितत्वंस्यात्· अन्यथातदसंबंधात्· एवंचैतन्यस्याप्यानंदभेदउपेक्ष
णीयतापत्तिः। भेदाऽभेदोन्दविरुद्धावितितदुभयमेकरसंतत्तुभिन्नाभिन्नमित्यर्थः। एवंचेत्कथमपर्याय
तापदयोरित्याशंक्योक्तानुवादेनतामुपपादयति· यद्यप्येवमिति· भिन्नपरस्परमितिशेषः। आदौ· तत्त्व

त्वंतम ४

७९

मादिशब्दो · वाच्यं · वाक्यार्थबुद्धि भूतं · हेतुं · शब्दप्रवृत्तिनिमित्तं वाच्यमित्तियावत् · जामिता · पर्यायि
ता · पदद्वयलक्ष्यस्यैकरसत्वेपि वाच्यभेदादपर्यायितेत्यर्थः । ननु जीवब्रह्मणोरत्यंतभेदे घट टशब्द
वत्तत्त्वपदसामानाधिकरण्यं न स्यात् नीलमुत्पलमित्यादावीषद्भेदे सत्येव सामानाधिकरण्यदर्शनादि
त्याशंक्याह · अर्हतेर्थइति · शुद्धानंदात्मा नंदइत्यर्थः । प्रत्यगर्थः केवलसाक्षी सर्वांतिर इत्ति · तद्भिन्नइति
यावत् · तद्ध्यप्रत्यगभिन्नाद्वयवस्तु प्रत्यक्तत्त्वे उक्तसाक्षिणि · अद्वयस्यापि भावः । अस्त्येवेति संबंधः
अद्वयार्थो पि प्रत्यगभिन्न इत्यर्थः । यद्यपि शब्दो सतीत्यस्यार्थो । एवं सतीत्यर्थः । अतिरेकः । ईषद्भेदः ।
अथवादेतेत्यादिना प्रत्यगद्वयोर्भेदो दर्शितः । यद्यपीत्यादिना सामानाधिकरण्यनिमित्तं भेदमनूद्य दूषय
ति · एवमपि सामानाधिकरण्यादेनिरेकावकाश इति यद्वित्तन्नेत्यर्थः । तत्र हेतुमाह पूर्णेति लब्ध इति · न
तदा खलु ब्रह्म प्रतीचो व्यावर्तेत प्रत्यगपि ब्रह्मणः । एवं च तदर्थब्रह्मणो निरवधिकं द्वैतस्य · त्वमर्थस्य च ब्र
ह्मणश्च · सर्वांतरत्वं न स्यात् · पूर्णत्वे सत्येकत्वमर्थयोस्तदुपपन्नेत्यर्थः । नन्वेकस्मिन्वाक्ये प्र

युक्ता निखिलपदलक्षणानुपपन्ना· लोके तथाऽदर्शनात्· शक्तपदं विना वाक्यार्थानुभवायोगाच्च· तस्यैव तत्
ज्जनकत्वादिति चेत्· न· तावल्लोके तददर्शनं· विषं भुंक्ष्वेत्यादौ तद्दर्शनात्· तेन हि वाक्येन शत्रुगृहान्नोदका
देर्भक्षणपानादीष्टसाधनं न भवतीति प्रतीयत इति सर्वपदलक्षणा। एवमर्थवादवाक्यस्थसर्वपदे पिधाराऽस्ते
लक्षणा दृष्टा। किंच तात्पर्यानुपपत्तिर्हि लक्षणाबीजं नान्वयानुपपत्तिः। क्रय्येयं गौर्यतीव कुक्षीरेत्यर्थवा
दवाक्ये तदभावात्। एवं च यथा तात्पर्यमेकस्मिन्सर्वस्मिन्वापदे लक्षणा न विरुद्धाऽतएव सोयमित्यत्रा
पि पदद्वयलक्षणैव न्याय्या· शब्दस्य वाक्यार्थानुभवजनकत्वे चान्वीयमानोपस्थापकत्वमेव तंत्रं न तु शक्त्या
तदुपस्थापकत्वं गौरवादित्युपक्रमाद्यनुरोधेन प्रत्यगद्वयमात्रपर्यवसायी तत्त्वमसिवाक्यस्थपदद्वय
लक्षणा न विरुद्ध्यते· आवश्यकी च· अन्यथा श्रुतितात्पर्याऽनिर्वाहात् इति न्यायासिद्ध्यर्थे ऽविनिगमे
न तर्कमप्यनुग्राहकमाह·। न च विनिगमनायामिति·। चकारेणोक्तं न्याय्यं समुच्चिनोति· अस्मिन्नेव पदे
लक्षणा नान्यत्रेति· निर्द्धारणायामित्यर्थः। शस्यते प्रशस्यते यतो विनिगमनायां स्फुटं कारणं नास्ति अत
किमपि

उभयपदस्थेत्यादिसंबंधः॥ ननु तिष्ठतु कारणांतरगवेषणं श्रोतुरिच्छैव तन्निमित्तमित्याशंक्य तर्हि
वाक्यार्थव्यवस्थानसिद्धेत्. सर्वेषामेकस्य वाक्यश्रोतुर्नियतेच्छाभावादित्याशयेनाह. नहीति द्वयमेक
पदलक्षणा. ननु यस्मिन्वाक्ये यत्पदं प्रथमं श्रूयते तेन तदसंजातविरोधितया प्रबलं स्वार्थं निष्टंत
द्विरुद्धार्थं द्वितीयं तदनुकूलं लक्षयिष्यतीति तत्र कारणाभावोऽसिद्ध इत्याशंक्यात्रापि वाक्या
र्थाऽव्यवस्थैव दोषः॥ प्राथम्यादेरपि तूणस्वाभेदेनाऽव्यवहितस्थितत्वादित्याह. प्रथमेति. नि
र्णये. लक्षणानिर्णये. अस्य प्रथमचरमभावस्यान्यथादर्शनमेवाह. प्रथमेति. तत्पदमहंब्रह्म
अध्वर्युवेदे४ बोधकं सामवेदे तत्त्वमसिवाक्य इत्यर्थः॥ यजुर्वेदेऽहं ब्रह्मास्मीतिवाक्ये. एतत्. तत्पदार्थबोधकं ब्र
ह्मपदमित्यर्थः। एवं च तत्त्वमसिवाक्येन जगत्कारणत्वादिविशिष्टस्य ब्रह्मणस्त्वंपदलक्ष्यसाक्ष्यभेदः
प्रतिपाद्यः॥ यजुर्वेदेन तु अहंकारकर्तृत्वादिविशिष्टस्य शुद्धब्रह्मणा भेदः प्रतिपादनीय इति सर्व

याभेकरूपंब्रह्मनसिद्ध्येत्. तच्चायुक्तमेकरूपस्यवैरूप्यायोगाद्युक्तं निर्विकल्पासंभवाच्चेतिभावः ॥ प्र
थमचरमभावस्यानिर्णायकत्वं सोयमित्यादिलौकिकवाक्येष्वपि सोयंपुमानिति. अत्रवाक्ये त
च्छब्दः पूर्वोऽयंशब्दः पश्चात्प्रयुक्तः अयमसावितिवाक्येतुविपरीतः ॥ प्रयोगः तदिदमाहव्यतिह
तइति. व्यत्यस्तइत्यर्थः सोयंपुमान्. तथा. तथाविधे. अयमसावितिचव्यवहृतेहेतोऽपौरुषेय.
वाक्येशब्दद्वयोर्मुख्यत्वलाक्षणिकत्वप्रतिद्वंद्वपूर्वापरत्वंविशेषहेतुर्विनिगमनाहेतुरितिवक्तुं
नशक्यतामितिसंबंधः अत्रापिवाक्यप्रयोक्तृणामुच्चारणपूर्वापरत्वनियमाद्दर्शनादितिभा
वः ॥ एवमखंडेब्रह्मणितात्पर्यानुपपत्त्याविनिगमनाभावेनचपदद्वयलक्षणेत्युक्तमिदानीमु
ख्यार्थयोरभेदान्वयानुपपत्त्याप्यविनिगमोपादितंतयासावक्तव्येत्याहन चभवतीति.
षिसेधस्याऽभेदविरोधस्योस्थितस्यज्ञानस्यापनीतिर्निराकरणंपदद्वयलक्षणामंतरेण.
नचनैवभवतीतिसंबंधः । विरोधमेवव्यनक्तिनहीति. तद्वत्सद्वयाभेदइव. एतेनतदादिश

द्रस्योपस्थितवाचकत्वात् शुद्धस्यचतात्पर्यविषयतयोपस्थितत्वाद्विनैवलक्षणांततः शुद्धोपस्थि
तिसंभवइतिप्रत्युक्तं· उपस्थितिविशिष्टस्यशुद्धत्वासंभवात्तदादिपदघटितवाक्यगर्भमहावाक्याति
रिक्तावांतरवाक्यस्यशुद्धेतात्पर्यासंभवाच्च· नहिमहावाक्यतदर्थप्रतिसंधानंविनावाक्यैकदेशस्यशु
द्धेतात्पर्यनिरूपणंसंभवति· महावाक्यतदर्थप्रतिसंधानंतुतत्पदतदर्थप्रतिसंधानमंतरेणनभवतीति
तात्पर्यनिरूपणेप्रागेवतत्पदार्थनिर्णयोवाच्यइतिस्पष्टत्वादिवाक्यानुरोधेनविशिष्टमेवतत्पदार्थइ
तितत्रापिलक्षणैवरूपकीतिभावः। अत्रत्वमर्थगतसद्वितीयत्वांशपरित्यागवदापरोक्ष्यस्यापिपरि
त्यागेविरोधस्यपरिहारादुद्देरूपविशेषणत्वेनतस्यापिपरित्याज्यत्वादितिनशंकास्पदं· प्रत्यगू
मात्रस्यत्वपदलक्षणयोपादेयस्यचैतन्यमात्रस्यापरोक्ष्यस्वभावत्वात्स्वभावत्यागेचभावत्यागा
पत्तेः· नहिग्रहगतमेकत्वमविवक्षितमितिग्रहत्वमप्युद्देरूपविशेषणत्वादविवक्षितंभवति
तस्यतत्स्वभावत्वात्· नचस्वयंचात्मापरोक्षस्स्वेतिक स्यचिदनुभवः· तस्मात्पारोक्ष्यसद्वय

त्वपरिहारायोभयपदेलक्षणाऽवश्यंआश्रयेतिभावः · नन्वेकपदेलक्षणाव्यर्था · एकस्यैवब्रह्मणोविशेष
णद्वयविशिष्टतया · पदद्वयवाच्यत्वेनदंडीकुंडलीतिप्रयोगादिवाभेदप्रतीत्युपपत्तेरितिचेन्न · विशिष्टा
भ्यांतदुभयाश्रयकेवलस्वरूपस्यान्यत्वेनलक्षणांविनातत्पदाभ्यामुप स्थित्यसंभवात् · तथाहि
इदानीमयंदंडीनभवतीतिहिदंडिनोदेवदत्तात्केवलेतस्मिन्भेदःप्रतीयते · अभेदनिषेधस्यभेदविष
यतयाऽन्यत्रक्लृप्तस्यविशेषणमात्रसंसर्गाभावविषयत्वायोगात् · अन्यथाघटःपटोनभवतीति
प्रतीतेरपिघटत्वात्यंताभावविषयत्वप्रसंगेनक्वापिभेदोनासिद्ध्येत् · नचप्रागदंडोवायमितिप्रत्य
भिज्ञयात्तदभेदेसिद्धेनिषेधधियोविशेषणाभावविषयत्वेनिर्वाच्यं · भेदबुद्ध्यनुरोधेनप्रत्यभिज्ञा
याएवतज्जातीयविषयतापत्तेः · आत्मैवेदंसर्वमित्यादिनासर्वाभेदसिद्धेर्घटाद्यभेदनिषेधोपिनस्या
त् · विशिष्टभेदस्तूभयत्रापिसमानएव · अभेदबुद्धिरपिस्वरूपमात्रेभेदविषयैवेतितयोर्भिन्न
विषयत्वेव · एवंसतिदंडिकुंडलिनोरपिपरस्परंस्व समानसत्ताकभेदवत्त्वात्तत्रापिलक्षणैव

तदुभयाश्रयाभेदसिद्धिः। एवमेकदेकत्वाविरुद्धविशेषणद्वयविशिष्टयोरपि परस्परभेदेन यदेकत्वं न घटते तदा किमुवक्तव्यं विरुद्धविशेषणद्वयविशिष्टयोर्जीवेश्वरयोरित्याह· अविरुद्धेति· स्पष्टं ननु विरुद्धरूपयोरपि जीवेश्वरयोः सत्वादिनाकेनचित्स्वरूपेणैकत्वसंभवात्तत्वमादिवचनेन कथं लक्षणां विनैव न प्रतिपाद्यत इति शंकते· अथेति· किं तत्स्वरूपं· पदेन केनचिदुपस्थापनीयमुत न· आद्ये· तद्वाचकपदाभावेनादृष्टपदयोस्तत्र लक्षणाप्रसंगः॥ द्वितीये त्वशब्दानुपस्थितस्यापि वाक्यप्रतिपाद्यत्वे गंगासंबंधिनस्तत्पदादनुपस्थितनीरादावपि घोषान्वयित्वप्रतीत्युपपत्तेः। एवं शोणादिना लक्षणामंतरेणाश्वादेर्बुद्धिः स्थित्यन्वयसंभवात्तथा सोऽयमित्यत्रापि शुद्धस्य वाक्यार्थत्वसंभवात्प्रसिद्धलक्षणोच्छेदप्रसंगः· तस्मात्पदोपस्थितपदार्थयोरभियोर्वाच्यद्वयभेदयोग्यस्वरूपोपस्थितये पदद्वयलक्षणाऽवश्यं वाच्येत्याशयेनाह· नदस्कंदराभिति· एवमेवसतिस्फुटमस्तमेनीति संबंधः॥ एवं ब्रह्माऽहंपदयोर्लौकिकवेदव्यवहारानुरोधेन शबलवाचकयोर्जहदजहल्लक्षणया

ऽखंडार्थत्वमुक्तं · इदानीमज्ञानमात्रवाचीब्रह्मशब्दः मम योनिर्महद्ब्रह्मेत्यत्र केवलाज्ञाने ब्रह्मशब्दप्रयो
गात् · एवमहंशब्दोपिव्यवहारबलेनलाघवार्थं केवलाहंकारवाचीभवतीतिताभ्यांजहल्लक्षणयैव
खंडवस्तुज्ञप्तिप्राप्तिरितिपक्षांतरमाह · साभासाऽज्ञानेति · चिच्छायायुक्ताऽज्ञानवाचीत्यर्थः। य
दीतिनिश्चयार्थे · जहल्लक्षणायामतिप्रसिद्धतयाप्रसक्तंतदौचित्यार्थंदृष्टांतमाह · नौरिति · रौति
शब्दंकरोति · नादःशब्दकर्तृत्वानुपपत्तेस्तत्तीरस्थःपुरुषोलक्ष्यते · एवमुत्तरत्रापिलोहरज्जुश
ब्दाभ्यांवह्निसर्पयोर्लक्षणा · रज्जुर्विषधरइति · लोकसिद्धप्रयोगानुवादत्वात्ग्रंथकर्तुर्नविलिंगप्र
योगदोषः विषधराउइतिछेदेवाऽस्तु · विषधरपदंवादीर्घद्रव्यलक्षकं · तथाचन विलिंगता · दा
र्ष्टांतिकमुपसंहरतिआत्मवस्त्विति · अत्राऽनिश्चितार्थयदिशब्दस्वारस्येनप्रौढवादोयंग्रं
थकारस्येतिकेचित् · तत्रचबीजंब्रह्मशब्दस्यजगत्कारणेप्रचुरप्रयोगानुरोधः · अज्ञानेतत्प्रयो
गस्यकाचित्कत्वादेवमात्मवचनादहंशब्दस्यापिनियमेनशबलएवप्रयोगइति · निर्गुणेके

८२

स्यापि ग्रहणस्याभावात् सोऽपि वादेनैव पक्षांतरमाह प्रत्यक्त्वादीति आदिपदेन दृहत्वं गृह्यते · तयोः प
रेतरदृष्ट्योः ईश्वरजीवयोरिति सप्तम्यौ · यदि प्रत्यक्त्वादिग्रहणान्वयेन वृत्तिस्तर्हि गौण्यस्त्विति संबं
धः। तयोर्ब्रह्माहंपदयोरितिवान्वयः किंलक्षणयोः परेतरदृष्ट्योः परापरयोः प्रत्यग्ब्रह्मोत्तमनोर्दृक
त्वानेक्षाभ्यां तयोरिति विग्रहः तत्रैं मुख्य इति · ननु लक्षणमंतरेण गौणी काचिद मुख्यवृत्तिर्न लोक
सिद्धेत्याशंक्याह मुख्यार्थेति · मुख्यार्थान्वयानुपपत्तिहेतुर्यस्याः सा तथेत्यर्थः तत्र दृष्टांतमेवहे
तुमाह यथेति · अभिवस्तुरग्निः अग्निर्माणवकः सिंहो देवदत्त इत्यादौ अग्न्यादिशब्दस्य स्वार्थग्र
हणयोगेन माणवकादावनेकत्र प्रयोगाल्लोके गौणीवृत्तिर्यतः प्रसिद्धेत्यर्थः · ननु स्वार्थं विहाय
अर्थांतरे वृत्तिः गौण्यामप्यस्ति चेत्क स्तर्हि लक्षणागौण्योर्भेद इत्याशंक्याह यद्यतयोरवांतरभेदोस्ती
त्याह परत्वादवृत्तिरिति परस्य लक्ष्यमाणादन्यस्य गंगादेर्माणवकादन्यस्य चाग्नेर्नादेर्वाचकत्वाद्वृ
त्तिरित्यर्थः अपरत्र स्वार्थादन्यत्र उभयोर्लक्षणागौण्योः सदृशं यद्यपीति संबंधः अनयोरित्यादि स्पष्टं

अवांतरभेदमेवदर्शयतिग्रहणतइति· लक्ष्यमाणयोगेनस्वार्थादन्यत्रवृत्तिर्गौणीलाक्षणिकीत्वपराऽन्या
सासंगतेः स्वार्थसंबंधमात्रादर्थांतरेवृत्तिर्नतुग्रहणयोगादित्यर्थइति· अनेनप्रकारेणलक्षणाग्रहणदृ
स्याभेदकमस्तीतिवेदवादिनोमीमांसकाअभिधेयाविनाभूतेप्रतीतिर्लक्षणोच्यते। लक्ष्यमाणगुणै
र्योगाद्वृत्तेरिष्टातुगौणतेत्याहुरित्यर्थः। गंगादिपदंहिस्वार्थान्वयानुपपत्तौसत्यांजहद्विहायतत्संबंधि
निवस्तुनिवर्ततेनतुतद्गुणयोगमपेक्षतेतीरेगंगासादृश्याप्रतीतेः ज्वलनादिपदंतुस्वार्थाऽसंबंधिन्य
पिमाणवकादौलक्षितस्वार्थशुचित्वादिग्रहणयोगेनवर्तते· अतएवाग्निसदृशोमाणवकइतिततः
प्रतीयतइतितयोःस्फुटमस्तिभेदकमित्यर्थः। एवंजहदजहल्लक्षणयातत्त्वंपदाभ्यामुपात्तप्रत्यगब्र
ह्माभेदनिष्ठंमहावाक्यमित्युक्तमिदानींतदनुवदन्नुपाध्यप्रत्यग्ब्रह्मणोरवांतरस्फुरिततात्पर्यगोचे
रस्वरूपमाहनित्यइत्यादिना· वस्तुतःकालत्रयापरिच्छेद्योनित्यःशुद्धोऽविद्याकलंकरहितः। बुद्धः
स्वप्रकाशोऽवबोधः· ननुबोधविषयःमुक्तोरागद्वेषादिबंधरहितः। सत्यःत्रिकालाबाध्यः। सूक्ष्मःस्थौ